॥ श्रीः ॥

सांब्रायपरब्रह्मणे नमः ॥

126

शिवार्चनाचन्द्रिका ॥

श्रीमदप्पयदीक्षितविरचिता ॥

इयं किल,

कण्डदेव्यग्रहाराभिजनेन,

काळीश्वरशिवाचार्येण,

कृष्णतटाकाभिजनानां,

श्री कृष्णशास्त्रिणां अन्तेवासिना,

N. कृष्णशास्त्रिणा-T. M. नारायणशास्त्रिणाच

परिशोधिता,

देवसालपुरी शिवागमसङ्घाध्यक्षैः

कुम्भघोणनगरविराजमान,

शारदाविलासमुद्राक्षरशालायां मुद्रिता,

देवसालनगरे प्रकाशिताच

विजयतेतराम् ॥

दुर्मतिवत्सरस्य कुम्भमासि

1922.

(Copyright.)

சிவமயம்,

ஸ்ரீமத் அப்பயதீக்ஷிதரவர்களியற்றிய,

சிவார்சனசந்திரிகை.

இஃது

கண்டதேவி ஸ்ரீ-ல-ஸ்ரீ காளீசுவர சிவாசாரியரவர்களாலும்

சிவாகம சித்தாந்த பரிபாலன ஸங்க வித்வான்,

பிர்மஸ்ரீ N. கிருஷ்ணசாஸ்திரிகள் அவர்களாலும்

பிர்மஸ்ரீ T. M. நாராயணசாஸ்திரிகள் அவர்களாலும்

பரிசோதனை செய்யப்பெற்று,

தேவகோட்டை

சிவாகம சித்தாந்த பரிபாலன சங்கத்தாரால்,

கும்பகோணம்.

சாரதாவிலாஸ அச்சுக்கூடத்தில் பதிப்பிக்கப்பெற்று,

தேவகோட்டையில் பிரசுரிக்கப்பட்டது.

துன்மதி-ஐப்பசி-மீ.

1923.

ரிஜிஸ்தர் செய்யப்பட்டது.

श्रीः ॥

शिवार्चनाचन्द्रिकाया भूमिका



भोभोः पण्डितमणयश्शिवभक्तिपराश्श्रीमन्तोमहान्तः विदितमेवेदं भवतां, यत्किलास्मिन्जगतीतले मार्कि चतुश्शतमितवर्षेभ्यः प्राक् प्रचरत्सुविशुद्धलंकुमतग्रन्थाभासेषु विलुप्तप्रायेषुचशैवग्रन्थरत्नजातेषु भगवान् श्रीकण्ठपरमेशः करुणानिधिः साधुजनानुजिघृक्षया निखिलभुवनतललललामायमान तुण्डीरमण्डलभूषणायमान काञ्चीपुरपरिसरवर्तिन्यटय्यप्पलनामन्यग्रहारे अष्टमहाक्रतुयाजिनां स्वचर्यासार्थीकृतनिगमागमानां आचार्यदीक्षिताना मात्मजानां श्रीरङ्गराजाध्वरिणां पुत्रोऽप्ययदीक्षितइतिसुगृहीतनामधेयोऽवातरदिति। तेषामवतारप्रभृति विचित्रं वृत्तं यद्यपि पतञ्जलिप्रभृतिरपिनवर्णयितुं शक्यं। तथापि पण्डितप्रकाण्डैः कैश्चित्तत्र तत्र किञ्चित्किञ्चित्प्रदर्शितमिति मयाविरम्यते। एतेचाप्ययदीक्षिताः स्वानुग्रहभाजनस्य श्रीचिनवोम्मभूपालस्य प्रार्थनां स्वावतारञ्च सार्थयन्तस्तदा तदा स्वप्रेपरमेश्वरेणाज्ञप्ताः लीलयैव चतुश्शास्त्रराद्धान्तप्रकाशकान् नैकान्ग्रन्थान् शैवानिसद्योमुक्तिप्रदानि विमलानिग्रन्थरत्नानिच प्राणैषुः। तेषुचैकतमभिदमात्मार्थपूजाप्रतिपादकं सिद्धान्तागमानुसारि शिवार्चनाचन्द्रिकाख्यं ग्रन्थरत्नं। अस्य च श्रीमदप्पयदीक्षितप्रणीतत्वमेतद्ग्रन्थावसानगतेन 'वेलूरधीशचिनवोम्मविभोरुदारे चित्तेचधामनि चिराद्भिवर्धमानाम्। अर्चाविधां पशुपतेरमराभिनन्द्याभिधं समाचकलमीश्वरशासनेने'तिपद्येनैवस्पष्टीकृतं। अन्यत्रापि तएव दीक्षितवर्याः स्वकृतीः परिगणयन्तः चतुश्शास्त्रविषयिणीः स्वकृतीः काश्चिदुक्त्वा 'श्रीकण्ठभाष्यव्याख्याच शिवार्कमणिदीपिका। श्रीशिवानन्दलहरी शिवाद्वैतविनिर्णयः ॥ रत्नत्रयपरी-

क्षाचपञ्चरत्नस्तवस्तथा । तथा शिखरिणीमाला ब्रह्मतर्कस्तवादयः॥ शिवतत्वविवेकश्च शिवकर्णामृतन्तथा ।शिवार्चनाचन्द्रिकाच तद्व्याख्याबालचन्द्रिके'त्यादिपद्यैश्शिवार्चनाचंद्रिकायाअपिस्वकृतित्वंप्रतिपादितवन्तः। तस्मान्निरङ्कुशमप्ययदीक्षितविरचितमेवेदं ग्रन्थरत्नमिति । अस्यचग्रन्थरत्नस्यदुर्लभतयाविरळप्रचारतामालोकयन्तः परोपकारधुरन्धराश्शिवभक्तिभरिताःश्रीमन्तोदेवसालपुरवास्तव्याश्श्रेष्ठिवर्याः स्वपुरे शिवागमपरिपालनार्थं प्रतिष्ठिते अन्वर्थाभिधाने शिवागमपरिपालनसङ्घे ऽग्रासनाधिपोपाग्रासनाधिपकार्यदर्श्यागमार्जकागमपोषकादिपदभाजः निखिलशैवग्रन्थरत्नमुद्रणकार्यमङ्गळत्वेन शिवार्चनाचन्द्रिकामेनां प्रथमंमुद्रयित्वाप्रकाशयामासुः । अन्यान्यप्यष्टप्रकरण सिद्धान्तशेखर पौष्करवृत्ति मृगेन्द्रवृत्त्यादीनि ग्रन्थरत्नानिकामिकादिमूलागमांश्चाचिरादेवमुद्रणेनप्रकाशयिष्यन्ति ॥

(आदर्शदातृनामानि)

अस्यच शिवार्चनाचन्द्रिकाख्यग्रन्थस्य मुद्रणविषये प्रथमं मातृकादातारः कण्डदेव्यग्रहाराभिजनाश्शिवागममुद्रणप्रोत्साहकाःश्रीमन्तःपण्डितवर्याः काळीश्वरशिवाचार्याः । एतेषां मातृकामनुसृत्यैवमुद्रितमेतद्ग्रन्थरत्नम् ॥ शोधनार्थन्तु काळीश्वरपुरवास्तव्याः काळीश्वराशिवाचार्याः तथामधुरान्तकवास्तव्याः सुब्रह्मण्यशिवाचार्याः तथा कुंबघोणनगरवास्तव्यास्सबृजिष्टराधिकारस्थिताः कृष्णस्वामिशास्त्रिणश्च एकैकंमातृकारत्नं प्रदाय उपाकुर्वन् । एतेषां प्रत्युपकारविषये अशक्ताः प्रेमपूर्वकाननन्तान् प्रणामान् समर्पयन्ति शिवागमसङ्घाध्यक्षा इति शिवम् ॥

इत्थं, अळ. अरु. राम. अरुणाचलश्रेष्ठी.

देवसालपुरी जमीन्तार् ,

आगमार्जकः.

முகவுரை.

சிவபெருமானிடத்திடையறாத அன்புஞ் செல்வமும் உடைய பண்டித மணிகளே!

இவ்வுலகமானது சுமார் ஈராயிரு வருடங்கட்கு முன்னர் புறமதங்களால் சைவசமயவிளக்கம் சிறிது குன்றி, அதனால் சைவசாத்திரங்களும் விளக்கமுறாமலிருத்தலையின், அக்குறையை நீக்கிச் சைவசமயத்தையும், சைவசாத்திரங்களையும் விளக்கமுறச் செய்யத் திருவுளங்கொண்டு, ஸ்ரீகண்டபரமேசுவரர், தொண்டை நாட்டினுள் காஞ்சிபுரத்திற்குச் சமீபத்திலுள்ள அடையப்பலம் என்னும் சிற்றூரில், எட்டு மகாயாகங்கள் செய்தவராயும் தன்னுடைய ஒழுக்கத்தினால் வேதாகமங்களைப் பிரபோசனமாகச் செய்யப்பெற்றவராயும் உள்ள ஆசாரிய தீக்ஷிதராவர்களின் புத்திரர் இரங்கராஜதீக்ஷிதராவர்களுக்குப் புத்திரராக அப்பய தீக்ஷிதர் என்னுந் திருநாமத்துடன் அவதாரஞ்செய்தருளினர் என்பது யாவரும் அறிந்த விஷயமே.

ஸ்ரீமத் தீக்ஷிதராவர்களுடைய அவதாரத்தில் நிகழ்ந்த சரிதங்கள் பதஞ்சலி முனிவர் முதலியவர்களாலுஞ் சொல்லுதல் அரிது. ஆயினும், பண்டிதமணிகள் சிலர் ஆங்காங்கு சிறிது சிறிது கூறியுள்ளார்கள். ஆதலின் அது விஷயத்தில் நான் உபசாந்தியடைகிறேன்.

ஸ்ரீமத் தீக்ஷிதராவர்கள் தமக்கபிமானியாயுள்ள வேலூர் சின்ன பொம்மமகாராஜாவின் பிரார்த்தனையை அனுசரித்தும், தன்னுடைய அவதாரத்தின் பயனை உலகிற்குபகரிக்கக்கருதியும், அவ்வப்பொழுது கனவில் சிவபெருமானுல் உத்தரவுசெய்யப்பெற்று, நான்கு சாஸ்திரங்களின் சம்பந்தமான கிரந்தங்களைச்செய்தருவருகின்ற லீலையின் நடுவில், இலகுவில் முத்தியைத்தருதற்கு உபாயமான சைவக்கிரந்தங்கள் பலவற்றையுஞ்செய்தருளினர். அவற்றுள், ஆன்மார்த்த பூசையைத் தெரிவிக்கக்கூடியதாயும், சித்தாந்தமென்னுஞ் சிவாகமங்களை அனுசரித்ததாயும் உள்ள சிவார்ச்சனசந்திரிகை என்பதும் ஒன்று.

இது ஸ்ரீமத் தீக்ஷிதராவர்களாலேயே செய்யப்பெற்றதென்பது, இச்சிவார்ச்சனசந்திரிகையின் இறுதியிலுள்ள "வேலூரதிப" என்றற் றொடக்கத்தைச் சுலோகத்தாலினிது விளங்கும். இன்னும் ஸ்ரீமத் தீக்ஷிதராவர்களே தாம் செய்தருளிய கிரந்தங்களின் பெயர்களைக் கூறுமிடத்து நான்கு சாத்திர சம்மதமான கிரந்தங்களைக்

கூறிவிட்டு, சைவசாத்திர கிரந்தங்களைக் கூரப்புகுந்து, ஸ்ரீகண்ட பாஷிய வியாக்கியான்மாகிய சிவார்க்கமணிதீபிகை, சிவானந்தலகரி என்னும் ஆனந்தலகரி, சிவாத்வைதவிநிர்ணயம், இரத்தின்த்திரய பரீக்ஷை, பஞ்சரத்தினஸ்தவம், சிகாரணிமாலை, பிரம்மதர்க்கஸ்தவம், சிவதத்துவவிவேகம், சிவகர்ணமிர்தம். சிவார்ச்சனசந்திரிகை, இதன் வியாக்யானமான பாலசந்திரிகை, என்பன வாதியாக கூறியிருக் கின்றமையாலும் விளங்கும்.

இந்தச் கிரந்தம் இதுகாறும் அச்சுக்குவராமலிருந்தது. அதனால் இதன்கண் உள்ள அருமையான விஷயங்களைப் பலரும் அறிந்தனுபவிக்காக்குறையைநிவர்த்திக்கக்கருதி பரோபகாரசீலர்களாயும் சிவபத்தசிரோமணிகளாயும், பிரபுக்களாயுமுள்ள தேவகோட்டை வாசிகளான தனவைசியர்கள், சிவாகமங்களின் ஜீரணோத்தாரணத்தின்பொருட்டு, "சிவாகமசித்தாந்தபரிபாலன சங்கம்" ஒன்று நிருவி, அதில் அக்கிராசனதிபதி, உபஅக்கிராசனதிபதி, காரியதரிசி, போஷகர், ஆகமார்ச்சகர் முதலிய அங்கத்தினர்களாக இருந்து சிவாகமங்களை அச்சிட்டுதவுதற்கு மங்கலமாய், முதலாவதாக இந்நூலை பண்டிதர்களாற் சோதித்து அச்சிட்டு உதவியிருக்கின்றனர்.

இன்னும், அஷ்டப்பிரகரணம், சித்தாந்தசேகரம், பௌட்கர விருத்தி, மிருகேந்திரவிருத்திகளையும், மூலாகமங்களையும் அச்சிட்டுதவுதற்கு வேண்டும் பிரபல முயற்சிகள் செய்துவருகின்றனர்.

பிரதி உதவினவர்கள்.

சிவாகமங்களை அச்சிட்டு உபகரிக்கவேண்டுமென்ற பெருநோக்கமுடைய கண்டதேவி ஸ்ரீலஸ்ரீ காளீசுவரசிவாசாரியாரவர்கள். இவர்கள் பிரதிதான் முதலாவதாகக்கிடைத்தது. பின்னர் சோதிப்பதற்காகக்காளையார்கோவில் ஸ்ரீலஸ்ரீ பெரிய காளீசுவரசிவாசாரியாரவர்களும், மதுராந்தகம் ஸ்ரீலஸ்ரீ சுப்பிரமணிய சிவாசாரியாரவர்களும், கும்பகோணம் சப்ரிஜிஸ்டர் பிர்ம்மஸ்ரீ கிருஷ்ணசாமி சாஸ்திரிகளவர்களும் தங்களிடத்திலுள்ள பிரதிகளை உதவினர். இப்பெரியாரனைவருக்கும் இச்சங்கத்தார் மனமார்ந்த வந்தனத்தை கன்றியறிதலின் அறிகுறியாக அன்புடன் செலுத்துகின்றனர். இங்ஙனம்

அழ. அரு. ராம. அருணாசலஞ் செட்டியார்.

சிவாகமசித்தாந்தபரிபாலன சங்கம், தேவகோட்டை.

தேவகோட்டை ஜமீந்தார்,
ஆகமார்ச்சகர்,

श्रीः ॥

शिवार्चनाचन्द्रिकायाः विषयसूचिका ॥

विषयाः	पृष्ठे	विषयाः	पृष्ठे
दन्तधावनविधिः ...	३	लिङ्गशुद्धिः	४०
स्नानविधिः	४	शिवासनार्चनं... ...	४४
संक्षिप्तशैवसन्ध्याविधिः	५	पाद्यादिप्रकारः ...	६८
भस्मधारणविधिः ...	१०	पुष्पोपचारः	७०
रुद्राक्षधारणविधिः ...	१४	धूपदीपोपचारः ...	७४
सकळीकरणप्रकारः ...	१६	आवरणार्चनं	७६
द्वारपालार्चनम् ...	१७	नैवेद्यविधिः	८१
आत्मशुद्धिः	२१	तांबूलदानं	८९
देहशुद्धिः	२२	आरात्रिकविधिः ...	९०
भूतशुद्धिः	२५	पञ्चाक्षरजपविधिः ...	९१
अन्तर्यागक्रमः... ...	२९	प्रदक्षिणविधिः ...	९९
अग्निकार्यक्रमः... ...	३०	प्रणामविधिः	१००
स्थानशुद्धिः	३१	अग्निकार्यविधिः ...	१०१
द्रव्यशुद्धिः	३१	शिवज्ञानपूजाविधिः...	१०३
पाद्यादिपूजा	३३	कपिलापूजा	१०८
पञ्चगव्यविधिः ...	३५	परार्थालयदर्शनं ...	१०८
पञ्चामृतविधिः ...	३६	चुल्लीहोमः	१११
स्नपनोदकविधानं ...	३७	निर्माल्यविचारः ...	१११
मन्त्रशुद्धिः	६९	भोजनविधिः	१२६

श्रीः ॥

॥ श्रीगणेशायनमः ॥

॥ शिवार्चनाचन्द्रिका ॥

यस्याहुरागमविदः परिपूर्णशक्तेः रंशे क्रियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय नारायणीसहचराय नमशिवाय ॥

अवश्यकार्यं शैवाना मात्मार्थशिवपूजनम् । तच्च वैदिकमिश्राभ्या मेतेषां शैवमुत्तमम् ॥ तदप्यशक्तिकाच्छुद्धात् मिश्रात्सौरादिकादपि । सशक्ति केवलं श्लाघ्यं संक्षिप्तं भुक्तिमुक्तिदम् ॥ तस्मादात्मार्थयजनं शम्भो रंबिकया सह । संगृह्य दर्शयिष्यामि सर्वदिव्यागमोद्धृतम् ॥ दिव्यागमार्थसाङ्कर्यमैकतंत्र्यान्नदोषकृत् । किन्तु पाशुपतार्थं च साङ्कर्यं तेषु दोषकृत् ॥ तेष्वप्येकं समाश्रित्य ग्राह्यमन्यदपेक्षिते । इत्येतन्मानुषे लिङ्गे नतु स्वायंभुवादिषु ॥ एकागमावलंबेऽपि प्राविहाय तदीरितम् । (१) प्रशस्तमन्यतो ग्राह्यमित्युपादिशदीश्वरः ॥ प्राशस्त्यस्योभयोस्साम्येऽप्यर्चनाङ्गमपेक्षितम् । तत्रोक्त(२)मन्यतन्त्रोक्तं सममित्यप्युपादिशत् ॥ तस्मादिव्यागमेभ्योऽसौ अखिलेभ्यस्समुद्धृतैः । अपेक्षितांशैः क्रियते श्रीशिवार्चनचन्द्रिका ॥

आचम्य भस्मरुद्राक्षविभूषितकळेबरः । सकळीकृत्य संस्कुर्यात्सामान्यार्घ्यं यथाविधि ॥ शुद्धविद्यात्मकं ध्यात्वा शिवपूजानिकेतनम् । तद्वारे

---

१. प्रशस्तमित्यारभ्यार्चनाङ्गमपेक्षितमित्यन्तं पुस्तकांतरे नास्ति ।
२. अन्यत्रोक्तमिति पाठभेदः ।

ऽनुत्तरे कुर्यात् द्वारपालार्चनं क्रमात् ॥ विघ्नत्रयं समुत्सार्य प्रविश्यास्त्रादि-पूजनम् । कृत्वा पूजोपकरणं सकलं सन्निधापयेत् ॥ देवस्य दक्षिणे भागे (१) पावकस्योत्तरामुखम् । विहितासनमास्थाय पञ्चशुद्धिं समाचरेत् ॥ आदित्यस्योदयात्पूर्वं मुहूर्तद्वितये स्थिते । उत्थाय धौतांघ्रिकरः कृतभस्मावकुण्ठनः ॥ हृदि सामान्यसमयी चिन्तयेत्परमेश्वरम् । विशिष्टसमयी बिन्दौ मूर्ध्नि निर्वाणदीक्षितः ॥ आचार्यबोधकश्चैनं (२) द्वादशान्ते विचिन्तयेत् । नामानि चास्य हृद्यानि चरित्राणि च कीर्तयेत् ॥ विण्मूत्रोत्सर्जनं कुर्यात् गत्वा देशं यथोचितम् ॥ उदङ्मुखोऽहस्सन्ध्यासु रजन्यां दक्षिणामुखः । प्राक्प्रत्यग्वदनो यद्वा दिनपूर्वापरार्धयोः ॥ उदङ्मुखस्तु मध्याह्ने रजन्यां दक्षिणामुखः । नभोविण्मूत्रदिक्चन्द्र (३) सूर्यतारााग्निदर्शनम् ॥ (४) देवगोमुनिस्त्रीसम्मुखं च विवर्जयेत् । तृणैःपायु मयज्ञार्हैं रिज्याद्यनुपयोगिभिः ॥ लोष्टाद्यैर्वा न सत्पुष्पपर्णकाष्ठफलादिभिः । अधोदृष्टिः प्रजननं गृह्णन्वामेन पाणिना । जलाभ्याशमुपागम्य शौचं कुर्वीत मृज्जलैः ॥ एकालिङ्गे गुदे पञ्च दश वामकरे मृदः । षट्टं च पृष्ठे चाग्रे च करयोस्सप्त मृत्तिकाः ॥ वल्मीके वृक्षमूले च गृहे मार्गे जलान्तरे । ऊषरे मूषिकोत्खाते गोव्रजे देवतालये ॥ वापीकूपतटाकादिमूले च सिकतास्थले ॥ वीथ्यां श्मशाने कीटास्थितुषाङ्गारादिदूषिते । पांसुले परशौचार्धशिष्टमृत्कीर्णभूतले ॥ हलोत्खाते च जंबाले शर्करे नाहरेन्मृदम् ॥ शुद्धभूमौ च मृत् ग्राह्या व्यपोह्योपरि मृत्तिकाम् । यथा स्यात् शौचपर्याप्ता नावशिष्येत वा यथा ॥ प्रथमं पायुशौचं स्यादर्धप्रसृतिमानतः । तदर्धमानतः पश्चात्तदर्धे-

१. पावकेचोत्तरामुखं इति पाठभेदः ।
२. साधकश्चैतमिति पाठभेदः ।
३. सूर्येंद्रधनुस्ताराभिदर्शनमिति पाठभेदः ।
४. देवालयद्विजाश्वत्थ इति पाठभेदः ।

न ततः परम् ॥ आर्द्रामलकमानं स्यान्मूत्रशौचेतु मृत्तिका । द्विगुणं मृत्तिकाशुक्लये त्रिगुणं दारसङ्गतौ ॥ एतच्छौचं गृहस्थस्य भावशुद्ध्यै ततो ऽधिकम् । ब्रह्मचार्यादिकानां तु क्रमात्द्वित्रिचतुर्गुणम् ॥ यस्य यावद्दिवा शोचं तदर्धं निशि तस्य तत् । तदर्धमातुरे चोक्त मातुरार्धं वनाध्वनि ॥ आ॰ गुल्फं चरणौ मृद्भिः करावामणिबन्धकौ । संक्षाल्य क्षाळयेत्पश्चा दाचान्वा॰ कूर्परं जलैः ॥ धाराशौचं न कर्तव्यं शौचशुद्धिमभीप्सता । चुळकैरेव कर्तव्यं हस्तौ शुद्धिविधानतः ॥ शौचे मृज्जलदानार्थं कर्तव्यौ परिचारकौ । सव्यहस्तगृहीता च क्षेप्या मृद्वामहस्तके ॥ कुर्याद्वादश गण्डूषान् पुरीषोत्सर्जने कृते । कुर्वीत चतुरो मूत्रे भोजनान्ते तु षोडश ॥ (१) प्राङ्मुखः क्षाळयेत्पादौ हस्तौ वक्त्रमुदङ्मुखः । (२) उदङ्मुखः प्राङ्मुखो वा ततस्त्वाचमनं चरेत् ॥

॥ दन्तधावनविधिः ॥

हन्मन्त्रेण ततो ग्राह्यं दन्तकाष्ठं त्वगन्वितम् । अपर्वाग्रसमच्छेदमाद्य मग्रे च कूर्चितम् ॥ कनिष्ठिकासमस्थौल्यं सूक्ष्मं वा दन्तसौक्ष्म्यतः ॥ अष्टांगुळं नैष्ठिकानां भोगिनां द्वादशांगुळम् । वर्णानां दशकं चाष्टसप्तांगुळिकमेवच ॥ षडंगुळं प्रहीणानां नारीणां चतुरंगुलम् । जंब्वाम्लककुभाशोक कपित्थवकुलोद्भवम् ॥ प्लक्षौदुम्बरफुल्लांघ्री जाजीचम्पकशंखजम् । अतिमुक्तकदंबोत्थमपामार्गं च भोगिनाम् । ग्राह्यमेतच्च शैरीष चिरिबिल्वकरञ्जकम् । श्रीपर्णदारुनिर्गुण्डी सारसं खादिरायते ॥ अक्षक्षीरिधवैरण्डवटाश्वत्थाम्राशिग्रजम् । अकुलीशेलुवानीर धात्री (३) चोदुम्बरोद्भवम् ॥ ख॰

१. प्राङ्मन्त्रीतिपाठभेदः ।
२. प्राङ्मुखोवाथकुर्वी तेतिपाठभेदः ।
३. निम्बशरोद्भवमिति पाठभेदः ।

जूरनालिकेरोत्थं पालाशं तालवंशजम् । तृणपर्णपिशाचोत्थमिष्टकाङ्गारभस्मजम् । अंगुलीच विवर्ज्यानि सुवर्णादिकृतं तथा ॥ प्रतिपन्नवमीषष्टी द्वादशी पञ्चपर्वकम् । उपवासदिनं जन्मनक्षत्रं च शनिवासरम् ॥ भानुवारंव्यतीपातं ग्रहणश्राद्धवासरम् । सूर्योदयानन्तरं च विवर्ज्य दन्तधावनम् ॥ अलाभे दन्तकाष्टानां निषिद्धदिवसेषु च । गण्डूषैर्द्वादशावृत्तैर्दलैर्वा शोधयेद्रदान् ॥ जिह्वानिर्लेहनं कुर्याज्जिह्वामलविशोधनैः ॥ फालाक्षिश्रोत्रनासास्यरेतोविण्मूत्रगात्रजम् । करपादगतं यद्वच्छोद्धृयं तत्सकलं मलम् ॥ नासिकाश्रोत्रनेत्रादिक्षालनेन विशुध्यति ॥ एवं मलानि संशोध्य वारुणस्नानमाचरेत् । अशेषमालिन्यहरं दुस्वप्नादिविनाशनम् ॥

॥ अथ स्नानविधिः ॥

विधिवदाचान्तः कृतकरन्यासः प्राणानायम्य दर्भान्धारयन् ॥ अमुकस्थे रवौ मासि तिथौ वारे सरिद्वरे । स्नानं देव करिष्यामि त्वत्पूजार्थंप्रसीद मे ॥ इति विज्ञाप्य शुद्धभूमि मट्टांगुलपर्यंतं हुंफडन्तास्त्रेण खात्वा तेनैव मन्त्रेण मृदमुद्धृत्य तद्वस्तुनि मृदं मूलमन्त्रेण नमोन्तहृदयेनवाऽऽदाय नमोन्तहृदयेन प्रथममुद्धृतया मृदा खातमापूर्य नमोन्तशिरसा सरित्सरस्तटाकादितीरे विशुद्धे निक्षिपेत् । सरिदादीनां दक्षिणतीरं स्नानार्थं मतिप्रशस्तम् । ततो हुंफडन्तास्त्रेण मृदमभ्युक्ष्य नमोन्तशिरसा मृदमस्त्रेण मूलादीन्युद्धृत्य नमोन्तकवचेन तां त्रिधा विभज्य नाभ्यादिपादान्त मेकांशेन प्रक्षाल्य द्वितीयमंशं सप्तवार मस्त्रमन्त्रजप्तमस्त्ररश्मिसम्पर्काद्दीप्तं विभाव्य सर्वमङ्गं तेनालिप्य जलं प्रविश्य जलमस्त्रेणालोड्यांगुष्ठाभ्यां कर्णौ तर्जनीभ्यामक्षिणी मध्यमाभ्यां नासिकेच दृढं पिधाय प्रणवं मूलसहितं वा जपन् हृदये ज्वलदस्त्रं देहं तत्तेजःपुञ्जपिञ्जरच्छायं विभावयन् जले निमग्नो यावच्छक्ति अवतिष्ठेत । अथवा मृदं द्वेधा विभज्य अस्त्रजप्तेन एकेन भागे-

न सर्वमङ्गमालिप्य स्नायात् । तदेतन्मलस्नानम् । यद्वा– वक्ष्यमाणविधिस्नानार्थमेव मृदाहरणम् । मलस्नानं तु हरिद्रामलकादिपिष्टैरेव कार्यम् । अत्र रेतोविण्मूत्रनासिकामुखचक्षुश्रोत्रनखपादमलरूपाणां शारीरमलानां शौचादिमलस्नानान्तकर्मान्तर्गतैः मृदन्तकाष्ठहारिद्रामलकादिघर्षणैरुदकसेचनैश्च शुद्धिः । (१) वाचिकमलस्नानं स्नानकालिकैः प्रणवादिजपैः । मलस्नानमस्त्रमन्त्रस्नानादिभिः । ततो जलादुत्थाय आदित्यं निरीक्ष्य अस्त्रेण मूर्ध्नि निक्षिप्य जलादुत्तीर्याचम्याविरक्तो द्विजश्चैद्वैदिकसन्ध्या मुपास्य संक्षेपतः शैवीमपि सन्ध्यामुपासीत । विरक्तो द्विजश्चतुर्थश्च शैवीमेवोपासीत ॥

॥ संक्षिप्तशैवसन्ध्याप्रकारः ॥

अस्त्रमन्त्रेण शिरसि त्रिवारमंगुल्यग्रगतै र्जलबिन्दुभिः प्रोक्ष्य 'शिवास्त्रायविद्महे कालानलाय धीमहि । तन्नश्शस्त्रः प्रचोदयात्' । इत्यस्त्रगायत्र्या सूर्यमण्डलस्थाय अस्त्राय त्रिवारमर्घ्यं दत्वा यथाशक्त्यस्त्रगायत्रीं जपेत् । यद्वा अस्त्रसन्ध्यास्थाने हृदये ज्वलन्तमस्त्रमन्त्रं ध्यायेत् । ततो विधिस्नानार्थं बिन्दुस्थानाङ्गादितीर्थानां मध्ये एकतमं तीर्थं अंकुशमुद्रया वौषडन्तहृदयेनाकृष्य उद्भवमुद्रया नमोन्तहृदयेन पुरतस्संस्थाप्य तेनापूरितं सरित्तटाकादिकं सञ्चिन्तयेत् । तदनु विधिस्नानार्थं स्थापितमृद्भाग मादाय नाभिदघ्नजलं प्रविश्य । नदीषु प्रवाहाभिमुखोऽन्यत्र प्राङ्मुख उदङ्मुखो वा मत्स्यमण्डूकादिवासभूत जलदोषपरिहारार्थं हस्तमात्रं चतुरश्रं शिवतीर्थं पुरतः परिकल्पयेत् । तत्रायं क्रमः–मृद्भागं वामकरे पूर्वयाम्यसौम्यदिक्षु त्रिधा विभज्य पूर्वं सप्तवारावृत्तेनास्त्रमन्त्रेणाभिमन्त्र्य याम्यमष्टवारावृत्तेन कवचान्तैरङ्गैर्वा सौम्यं दशवारावृत्तेनास्त्रमन्त्रेण शिवेनचाभिमन्त्र्य तत्रास्त्रजप्तं

१. शुद्धिर्वामूर्ध्निनिषिच्यजलादुत्तीर्याचम्यार्थिनको इति पाठभेदः ।

हुंफडन्तास्त्रेण नाराचमुद्रया पूर्वादिषु सर्वासु दिक्षु क्षिपेत् । एवं दिग्वि-घ्नानामधिपस्य इन्द्रस्य दिशि स्थितस्य मृद्भागस्य दिक्षु क्षेपेण तत्तद्दिगवस्थि-ताः सर्वे विघ्नाश्शमं यांति । तदनु शिवजप्तमृद्भागार्धं मूलेन जले शिवतीर्थ-सिध्यर्थं निक्षिप्य तदपरार्धं शिवतीर्थसमानसिध्यर्थं मूलमन्त्रकृतेन बाहुपरिभ्र-मणेन समन्तान्निक्षिपेत् । एवं सोमदिशि स्थापितो मृद्भागः केवलममृतमय-स्सन्शिवमन्त्रेण लोठनात् क्षरतीति तत्तीर्थममृतमयं भवति । इत्थं शिव-तीर्थं परिकल्प्य विधितस्स्नायात् । तदर्थं प्रथमं ब्रह्माङ्गजप्तेन मृद्भागेन स-र्वमङ्गं लिपेत् । धर्मराजदिशि स्थितस्य मृद्भागस्य संस्पर्शनात्सर्वपापक्षयो भ-वति । अतष्वण्मुखीकरणमुद्रया श्रोत्रादिद्वाराणि पिधाय शिवतीर्थमध्ये निमज्ज्य शिवमन्त्रं ध्यायन्नन्तर्जले यावच्छक्ति अवतिष्ठेत । अन्तर्जले स-र्वाङ्गनिमज्जनमुत्तममर्द्धाङ्गनिमज्जनं मध्यमं मुखमात्रनिमज्जनं कनीयः । ततो जलादुत्थाय वामदक्षिणहस्तौ सोमसूर्यात्मकौ शक्तिशिवौ वा विचिन्त्य ताभ्यां कृतया कुम्भमुद्रया वौषडन्तसहिताभिमंत्रितैः जलैश्शिरस्यभिषिच्य हुंफडन्ता-स्त्रेण विघ्नशमनार्थं जलं दिक्षु विदिक्षुच विनिक्षिप्य तत्तीर्थजले शिवतीर्थ-सिद्ध्यर्थं निक्षिप्य तदपरार्द्धं शिवतीर्थसीमनि संहारमुद्रया उपसंहरेत् । इत्थं सरिदादिकं गत्वा स्नातुमशक्तौ गृहएव शुद्धे गोमयलिप्ते भूभागे पीठस्थः शीतजलपूरितैश्शिवमन्त्रजप्तैः नवभिरष्टभिः पञ्चभिर्वा कुम्भैस्स्नायात् । राजानः स्त्रीबालरोगिणः प्रवासिनश्च शीतोदकस्नानाशक्तौ उष्णोदकेनस्नानं कुर्युः॥ शिरसिस्नानाशक्तौ कण्ठस्नानादिकं कुर्युः । राजानश्चेत् शिवपूजार्थं शिवस्नपनोक्तसर्वोपचारस्नानसहितस्नानविधानात् सुवर्णपीठे स्थित्वा सुवर्ण-कुम्भाहृतैर्जलैश्शङ्खादिमङ्गलवाद्यघोषपुरस्सरं स्नानं कुर्युः । तदनु शुद्धमृदु-वस्त्रेण देहसम्मार्जनं धौतवस्त्रद्वयपरिधानं आचमनं सकलीकरणं भस्मस्ना-नं त्रिपुण्ड्रधारणमित्येतत्सर्वं निर्वर्त्य सन्ध्यां वन्देत् ॥

शैवसन्ध्याप्रकारः ॥

॥ तत्प्रकारः ॥

संहितया गायत्र्यावा त्रिः प्राणानायम्य ह्रौं नेत्राभ्यां नमइत्यंगुष्ठाभ्यां नेत्रयोर्दिव्यमुद्रां विन्यस्य नमोन्तमूलेन जलं निरीक्ष्य तेनैव सप्ताभ्य वौषडंतकवचेनाभ्युक्ष्य वौषडंतहृदयेनांकुशमुद्रया बिन्दुस्थानाद्गङ्गादीना मकतमं तीर्थमाकृष्य नमोन्तहृदयेनोद्भवमुद्रया तत्तीर्थं जले निक्षिप्य मूलेनाभिमन्त्र्य हुंफडन्तास्त्रेण संरक्ष्य नमोन्तकवचेनावकुण्ठ्य वैषडन्तशक्तिमन्त्रेण धेनुमुद्रया अमृतीकुर्यात् । अथ संध्यां ध्यायेत् । संध्या त्रिविधा ब्राह्मी वैष्णवी रौद्रीति । तत्र 'रक्तस्त्रग्वसनारक्ता रक्तालङ्कारशोभिता। हंसासनसमासीना यज्ञसूत्रजटाधरा ॥ चतुर्भुजाचतुर्वक्त्रा लोचनाष्टकभूषिता॥ अक्षमालां स्रुचं सव्ये वामे दण्डं कमण्डलुम् ॥ दधाना ब्रह्मदेवत्या प्रातस्सन्ध्या त्रिधाच सा । प्रातःकालेऽल्पनक्षत्रे सुबाला मुक्तिदा प्रभुः॥ प्रातस्तु लुप्तनक्षत्रे भुक्तिमुक्तिप्रदायिनी । ज्ञानशक्तिस्वरूपा सा मध्यमा बाल्यमाश्रिता ॥ भुक्तिप्रदायिनी भानो रर्द्धमण्डलदर्शने । क्रियाशक्तिस्वरूपासा प्रौढा बाल्यं समाश्रिता ॥ सुवर्णपङ्कजासीना सितवस्त्रादिभूषिता। वनमालोपवीताभ्यां भूषिताच द्विलोचना ॥ एकवक्त्रा चतुर्हस्ता दक्षिणे सगदांबुजा । शङ्खचक्रधरा वामे मध्या सन्ध्यातु वैष्णवी ॥ साचद्वितीया यामस्य तुर्यभागे त्रिधा भवेत् । आद्यांशे मुक्तिदा साच किञ्चिदुद्भिन्नयौवना । मध्यांशे मध्यतारुण्या वागीशी भुक्तिमुक्तिदा ॥ ज्वालाभिधा तृतीयांशे मुक्तिदा प्रौढयौवना । वृषपङ्कजमध्यस्था त्रिणेत्रा चन्द्रशेखरा ॥ शार्दूलचर्मवसना मेघश्यामळविग्रहा । त्रिशूलाक्षधरा सव्ये वामे साभयशक्तिका ॥ सायं सन्ध्या स्मृतारौद्री त्रिविधासापि पूर्ववत् । आरक्तार्ककरे काले किञ्चिच्चलितयौवना ॥ वामाभिधाना सारौद्री ध्यातृणां मुक्तिदायिनी ।

यौवनार्धच्युताऽर्धार्के ज्येष्ठाख्या भुक्तिमुक्तिदा ॥ भुक्तिदास्तमिते सूर्ये रौद्र्याख्या गतयौवना । एवं नवविधास्संध्या शिवशास्त्रे शिवोदिताः ॥ साक्षिभूतास्समस्तस्य पूजिता वांछितप्रदाः ॥ ब्राह्मी हृत्पङ्कजगता वैष्णवी बिन्दुमद्यगा । ब्रह्मरन्ध्रगता रौद्र्य स्स्वस्वकालेषु चिन्तयेत् ॥ प्रातस्सन्ध्या समयिनो मध्यमाच विशेषिणः । निर्वाणदीक्षितस्यैव संध्यात्रितयमिष्यते ॥ तत्र यस्यात्सप्तकलाप्रासादप्रवणो बुधः । सबिन्दुशक्तिस्समनास्थानत्रितयवर्तिनीः । मृणाळतन्तुवत्तन्वीं रारक्तश्वेतचामराः ॥ ध्यायेत्क्रियादृगिच्छाख्याः प्रासादोचारपूर्वकम् ॥ यस्य तु द्वादशकले प्रासादे निष्ठितामतिः। तेन सन्ध्या परा चिन्त्या या निशीथे विभाव्यते ॥ नाम्यादिद्वादशान्तान्तं ततो(१)नाभ्यवसानकम् । गमागमवती तुर्या निरूपा मेचकाऽथवा ॥ ज्ञानिनां तु वरा सन्ध्या शिवबोधस्वरूपिणी । द्वादशांतस्थितं शंभुं चन्द्रकेन्दुमिथाश्रिता ॥ एकैव वस्तुतस्सन्ध्या शिवशक्तिस्वरूपिणी । कालाधिकारिभेदेन सैव भिन्ना त्रिधा मता ॥ सन्ध्याचिन्तनमेवेदं सन्ध्यावन्दनमुच्यते । अङ्गमस्य प्रधानस्य यदन्यन्मार्जनादिकम् ॥ एवं कृतसन्ध्योपासनादिकर्मणा शिवपूजा समारम्भणीया ॥

तत्रायं क्रमः—ततोंगुष्ठमीशान मनामिका ममृतकलां च ध्यात्वा अंगुष्ठयुक्तयाऽनामिकया चक्षुषी नासिके श्रोत्रे अंसौ हृदयं नाभिं शिरश्च क्रमेण आदित्यस्तृप्यतु विष्णुस्तप्यत्विति भावयन्नेव स्पृशेत् । एवं कृते शिवतेजस्संपर्कात् क्षुभितानामिकामृतप्रवाहतृप्ताः नेत्राद्यधिष्ठातार स्सूर्यादयो विष्वन्ता देवाः कर्तुरधिष्ठानोपबृंहिका भवन्ति । तदनंतरं शरीरगतपञ्चत्रिंशत्तत्वशुद्ध्यर्थं चिन्मात्राचमनं कुर्यात् ॥

तत्रायंविशेषः—सुवर्णवर्णं पद्माक्षमालास्त्रक्कुण्डिकालंकृतकरश्चतु-

१. नासा इतिपाठभेदः ।

ष्टयं चतुर्वक्त्रमात्मतत्त्वरूपं ब्रह्माणं ध्यायामीति आत्मतत्त्वध्यानपूर्वकं हां आत्मतत्त्वायस्वधेति प्रथममाचामेत् । अनेन स्वशरीरे पृथिव्यादिमायांते एकत्रिंशत्तत्त्वशुद्धिं भावयेत् । ततो नीलवर्णं चक्रबाणकमलचिन्मुद्राशङ्खकार्मुक कमण्डल्वभयमुद्रांकितकराष्टकमेकवक्त्रं विद्यातत्त्वरूपं विष्णुं ध्यायामीति विद्यातत्त्वपूर्वकं हिं विद्यातत्त्वाय स्वधेत्याचामेत् । अनेन शुद्धविद्येश्वरसदाशिवाख्यत्रितत्त्वशुद्धिंभावयेत् । ततस्फटिकवर्णं पद्माक्षमालाशूलकमण्डलुधरकरचतुष्टयं पञ्चवक्त्रं शिवतत्त्वरूपं रुद्रं . ध्यायामीति शिवतत्त्वज्ञानपूर्वकं हुं शिवतत्त्वायस्वधेत्याचामेत् । अनेन शक्तितत्त्वशुद्धिंभावयेत् । ततोऽस्त्रमन्त्रेण ओष्ठं द्विः प्रमृज्य हृन्मन्त्रेण नेत्रादीन्स्पृशेत् । अन्यत्तु तत्तद्देवतातृप्तिध्यानादिकं पूर्ववत्कुर्यात् ॥ इत्याचमनक्रमः ॥

ततोऽभिषिच्य देवेशं निवेश्य कमलासने । तत्रासनंच मूर्तिंच विद्यादेहं च पूजयेत् ॥ आवाह्याथ महादेवं संपूज्य स्थापनादिभिः । मनसा स्नापयित्वाच दद्याद्वस्त्रोपवीतकम् ॥ ततस्सम्पूज्य देवेशं गन्धपुष्पविभूषणैः । धूपं दीपञ्च दत्वाऽथ कुर्यादावरणार्चनम् । नैवेद्यं मुखवासञ्च तांबूलं च समर्पयेत् ॥ धूपमारात्रिकां दत्वा पवित्रञ्च समर्पयेत् । धारयित्वा सितं भस्म दर्पणाद्यैः प्रपूजयेत् ॥ बलिं दत्वाऽथ पाद्याद्यैः गन्धपुष्पैश्च पूजयेत् । जपस्तोत्रनमस्कारप्रदक्षिणपुरस्सरम् ॥ अष्टपुष्पिकयाऽभ्यर्च्य विशेषार्घ्येण पूजयेत् ॥ पराङ्मुखार्घ्येणोद्वास्य शिवं सावरणादिकम् । काले शिवं हृदि ध्यायन् अश्नीयात्तन्निवेदितम् ॥

एवं संक्षिप्य कथितः शिवपूजाविधिक्रमः । विविच्य दर्शयिष्यामो नातिसंकोचविस्तरम् ॥ तत्र तावदाचमनमुच्यते । हीं शिरसेनमः । आजानुपादा वामणिबन्धञ्च पाणिं प्रक्षाल्य प्राङ्मुख उदङ्मुखोवा कुक्कुटासनस्थः पाणिद्वयं जानुनी अन्तरा निधाय पाणिद्वयेऽपि कनिष्ठिकादिषु

अङ्गुळीषु हां हृदयायनमः। हीं शिरसेनमः। हूं शिखायैनमः। हैङ्कवचायनमः। हौं नेत्रत्रयायनमः। हः अस्त्रायफडिति विन्यस्य दक्षिणपाणिं गोकर्णाकृतिं कृत्वा तेन मापमज्जनार्हं जलं गृहीत्वा संवीक्ष्यांगुष्ठकनिष्ठिके मुक्त्वा तज्जलं शुक्लपक्षे सोमरूपं कृष्णपक्षे सूर्यरूपं च विचिन्त्य तत्प्राशनेन रसनाप्रस्थिताया भारत्यास्तृप्तिः स्वस्यांतर्देहशुद्धिञ्च ध्यात्वा अन्तरान्तरा हस्तप्रक्षाळनपूर्वकं ब्रह्मतीर्थेन स्वधांतेन मूलमन्त्रेण त्रिराचामेत्। तत स्त्वस्याननशुद्धिं ओष्ठसंपुटस्थितायाः प्रणवदेवतायाः शुद्धिंविभावयन् अंगुष्ठमूलेन द्विरोष्ठौ द्विवारं मार्जयेत्॥

अथ भस्मधारणम्॥

चतुर्विधं भस्म कल्प मनुकल्प मुपकल्प मकल्पञ्चेति। तत्र व्याध्यादिरहितां सवत्सां गां संपूज्य तदीयं गोमयं भूमावपतितं आकाशस्थमेव गृहीत्वा पिण्डीकृत्य विशोष्य पञ्चब्रह्ममन्त्रैरिशववह्नौ दग्ध्वा मूलेन विशोद्धय यत्संपादितं यच्चाग्निहोत्रे समुद्भूतं तदुभयं कल्पम्। वने शुष्कं गोमयं गृहीत्वा शिववह्नौ दग्ध्वा मूलेन विशोद्धय संपादितमनुकल्पम्। अटवीगृहे गोवासे इष्टकापाकादिषु दावाग्न्यादिभिर्दग्धंभस्मगृहीत्वा वस्त्रेण संशोद्धय गोमूत्रेण पिण्डीकृत्य पुनश्शिवाग्नौ दग्धं मूलेन शोधितमुपकल्पम्। मन्त्रादिहीनं ब्राह्मणैःस्त्रीशूद्रादिभिर्वा शुचि गोमयं गृहीत्वा संपादितं (१) श्रोत्रियागारचुल्ल्यादिभ्योगृहीतंवा यत्तदकल्पम्। अकल्पञ्चेत्तद्गृहीत्वाऽस्त्रमन्त्रेण दिग्बन्धनं कृत्वा हौं ईशानमूर्ध्नेनमः। हें तत्पुरुषवक्त्रायनमः। हुं अघोरहृदयायनमः। हिं वामदेवगुह्यायनमः। हं सद्योजातमूर्त येनमः। हां हृदयायनमः। हीं शिरसेनमः। हूं शिखायैनमः। हैं कवचायनमः।

१. श्रोत्रियागारचुल्यादिवह्नौदग्धमिति पाठभेदः।

ह्रौं नेत्रायनमः । हः अस्त्रायनमः । ह्रां निवृत्तिकलायैनमः । ह्रीं प्रतिष्ठाकलायैनमः । ह्रूं विद्याकलाये नमः । ह्रौं शांतिकलायैनमः । ह्रौं शान्त्यतीतकलायैनमः । इति पञ्चब्रह्मषडङ्गेन कलामन्त्रैस्संशोधयेत् । एवंभूतस्य भस्मनो धारणं द्विविधं उद्धूळनं त्रिपुण्ड्रंच । उद्धूळनमपि द्विविधम् । मलस्नानरूपं विधिस्नानरूपं च । अम्भसास्नातस्य द्विविधेऽपि भस्मस्नाने अधिकारः । तदशक्तौ कण्ठपर्यन्तं कटिपर्यन्तं जानुपर्यन्तंवा संक्षाळ्य क्षाळितांगान्यार्द्रवस्त्रेण संमृज्य वस्त्रान्तरं परिधायाचम्य ततोहुंफडंतास्त्रेण दक्षिणपादांगुष्ठोत्थितवह्निना देहगतबाह्यमलमात्रं दग्धं विचिन्त्यवह्निसंबन्धक्षुभित बिन्दुस्थानस्थितशक्तिमण्डलस्रवदमृतप्रवाहेण शरीरमाप्लावयेत् । अथ मनसा मूलमन्त्रबादान्तमुच्चरन्नेव तत्संपर्कक्षुभितशक्तिपरिसृतबहुळामृतधारया देहमभिषिक्तं भावयेत् । इदं मानसस्नानमशुचिस्त्रशङ्कायां सदासर्वत्रविधेयम् । अथवा तामेव शक्तिं मोरूपां ध्यात्वा तत्पुच्छकिरणामृतप्रवाहेण शरीरमाप्लावयेत् । एतद्वायस्नानम् । गङ्गायमुनादिदिव्यजलैर्वा शरीरं प्रोक्षयेत् । तत्क्षेत्रमृत्तिकारज्जोभिर्वा पञ्चब्रह्मषडङ्गमूलमन्त्रैर्देहंस्पृशेत् । एषामेकतमप्रकारं कृत्वा पञ्चब्रह्मषडङ्गमूलमन्त्रमेकवारं त्रिवारंवा जपेत् । ततः प्राग्वदाचमनद्वयं कृत्वा संभावितसकलबाह्याभ्यन्तराशुद्धिनिरासकं भस्मस्नानं कुर्यात् ॥

तत्क्रमः ॥



गोब्राह्मणदेवताग्निगुरुविद्यासन्निधिं परिहृत्य म्लेच्छान्त्यजकृतभ्रदर्शनादिरहिते मार्गभिन्ने शुचौ देशे प्राङ्मुख उदङ्मुखोवा निवेश्य कल्पानुकल्परूपं मुष्टिमात्रं विप्रादिक्रमेण निष्कसार्धनिष्कद्वयसार्धनिष्कद्वयप्रमाणं वा भस्मादाय नैर्ऋतकोणे तद्राक्षसांशं निरस्याकल्पं भस्म वेदिग्बन्ध-

नपूर्वकं पञ्चब्रह्मषडङ्गमन्त्रैस्संशोद्ध्य चतुर्विधमपि भस्म सप्तवारं हुंफडन्तास्त्रेणाभिमन्त्र्य तेन विरक्तश्वेत्पादादारभ्यमस्तकान्त मविरक्तश्चेन्मस्तकादारभ्य पादान्तं दक्षिणांगुष्ठतर्जन्यग्रगृहीतेन स्वल्पेन भस्मना तद्गम्यकरपादव्यतिरिक्ताङ्गसंस्पर्शरूप मुद्धूळनं कुर्यात् । तदेतन्मलस्नानम् । ततष्षडङ्गमन्त्रजप्तेन भस्मनेशानादिपञ्चब्रह्ममन्त्रैः मूर्द्धहृदयगुह्यपादावयवानां सद्योजातमन्त्रेणबांऽसयोस्तदितरसर्वाङ्गानां च दक्षिणहस्तेनच तदगम्याङ्गानां वामहस्तेन चोद्धूळनं कुर्यात् । अवशिष्टं भस्म मूलेन कुंभमुद्रया शिरस्यभिषिञ्चेत् । एवं सर्वाङ्गोद्धूळनं ब्राह्मणः कुर्यात् । क्षत्रियादयः क्रमेण ललाटे चतुरश्रत्र्यश्रवृत्तानि कृत्वा कण्ठादधो नाभेरूर्द्ध्वं मुद्धूळयेयुः । शूद्रः उद्धूळनं वर्जयित्वा वक्ष्यमाणत्रिपुण्ड्रात्मकमेववा भस्मस्नानं कुर्यात् । तदेतत्तपस्विव्यतिरिक्तशूद्रविषयम् । अत एव ज्ञानरत्नावल्याम्— तपस्वी चेद्विधिवद्भस्मसङ्गृह्य तेनस्नानमाचरे दित्यादिना मलस्नानविधिस्नानयो रधिकारिविशेषेण तपस्विनामुक्तम् । एवं क्षत्रियवैश्यावप्यतपस्विनौ त्रिपुण्ड्रात्मकमेववा भस्मस्नानं कुर्याताम् । ब्राह्मणादयश्चत्वारोवाऽप्युद्धूळनाशक्तौ त्रिपुण्ड्रात्मकमेव भस्मस्नानं कुर्युः । केवलत्रिपुण्ड्रात्मकभस्मस्नानाभिप्रायेणैव केषुचिदागमेष्वपि विप्रादिक्रमेण निष्कंनिष्कार्द्धं तदर्द्धं तदर्द्धं चेति भस्मप्रमाणमुक्तम् । इदंच विधिस्नानरूपं दीक्षितगृहस्थैस्सन्ध्यात्रयेऽपि जलसंयुक्तं कार्यम् । स्त्रीभिर्यतिभिश्च जलवर्जितं व्रतिवानप्रस्थकन्यकादिभिर्दीक्षाहीनैश्च मद्ध्याह्नात्प्राग्जलसंयुक्तं परतोजलवर्जितञ्च कार्यम् । एवं भस्मस्नानानुष्ठाने वस्त्रांतरं परिधायाचामेत् । अपिधायवा केवलमाचामेत् ॥

॥ अथ त्रिपुण्ड्रम् ॥

तच्च वर्णानां क्रमेण सप्तपञ्चचतुस्त्र्यंगुळं सर्वेषांवा ललाटे हृदि बाह्वो श्चतुरंगुळं अवयवान्तरेष्वेकांगुळमित्यादिनानागमोक्तपक्षाणां मध्ये पूर्वाचारप्राप्तं कञ्चित्पक्षं परिगृह्य ललाटादिषु स्थानेषु तर्जनीमद्ध्य-मानामिकाभिस्तिसृभिरंगुळिभिः कर्तव्यम् । ललाटे मद्ध्यमानामिकांगु-ष्ठैर्वा कर्तव्यम् । त्रिपुण्ड्रं सान्द्रबळित्रयं व्यक्तञ्च यथाभवति तथा कर्त-व्यम् । त्रिपुण्ड्रधारणंच भस्मस्नानञ्च त्रिवक्त्रं त्रिहस्तं त्रिपादं त्रि-णेत्रं भस्मरूषितं ताण्डवं कुर्वन्तं रौद्रं रक्तपुष्पालंकृतं भस्मदेवं ध्या-त्वा कर्तव्यम् । त्रिपुण्ड्रस्थाने कुलाचारप्राप्तं चतुरश्रार्द्धचन्द्रदीपं त्रिपुण्ड्रां-तरं वा धारणीयम् । सर्वञ्च पुण्ड्रं केवलभस्मना चन्दनयुक्तभस्मना जल-सिक्तेन कार्यम् । ललाटे यादृशं पुण्ड्रं तादृशं ललाटहृदयांसनाभिषु पञ्चसु स्थानेषु शिवमहेश्वररुद्रविष्णुपितामहदैवत्यं शिरोललाटगळांसहृदय-नाभिपृष्ठेष्वष्टसु स्थानेषु ब्रह्मवाणीलक्ष्मीविष्णुशिवसूर्याग्निचन्द्रदैवत्यं ललाट-कन्धरांसबाहुकूर्परमणिबन्धवक्षः कुक्षिनाभिपार्श्वद्वयपृष्ठेषु षोडशस्थानेषु शिवमहेश्वरादिपञ्चकवामादिनवकाश्विद्वयदैवत्यं शिरोललाटनेत्रकर्णनासा-वक्त्रगळांसकूर्परमणिबन्धहृदयपार्श्वना भिगुह्यद्वयस्फिग्गूरुजानुजङ्घनपादरूपेषु द्वात्रिंशत्स्थानेषु अष्टमूर्त्यष्टविद्येश्वराष्टदिक्पालाष्टवसुदैवत्यं करपादांगुळि-पङ्क्तिभिस्सह षट्त्रिंशत्स्थानेषु शिवशक्तिमहेश्वरसदाशिवशुद्धविद्यामायावि-द्याकलारागकालनियति पुरुषप्रकृत्यहङ्कारबुद्धिमनश्श्रोत्र त्वक्चक्षुर्जिह्वाघ्रा-णवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलपृथिवीभू-ततत्त्वदेवताकं देशकालाद्यपेक्षया यथावसंभवं कर्तव्यम् । षट्त्रिंशत्-स्थानपक्षे शिवाद्याकाशान्ततत्त्वानि वृत्ताकाराणि स्फटिकसूर्यकान्त चन्द्र-

कान्तगोक्षीर विद्रुमहरिताञ्जनेन्द्रायुधेन्द्रकोपमेघपद्मराग विद्रुमेन्द्रनीलकुंकुम-जपाकुसुमेन्द्रायुध सूर्यकान्तकनक दूर्वा हरिद्रा करवीर काळमेघनीलमणि मौक्तिक माणिक्यकनकस्फटिकवर्णानि कृष्णं चतुरश्रं वायुं वृत्तं त्र्यश्रं वह्निं सितमर्द्धचन्द्राकारं जलं पीतं चतुरश्रं पृथिवीतत्त्वञ्च विभाव्य हां शिवतत्त्वरूपाय शिवायनम इत्यादिमन्त्रैस्तत्तत्स्थानेषु पुण्ट्राणि धारयेत् । एवं पक्षान्तरेष्वप्यूहनीयमेव । तत्तत्पूर्वाचारप्राप्तनानादिव्यागमस्मृतिपुराणाद्युक्तस्थानसंख्यादिव्यान्तरदेवतान्तरयुक्तानिवा पुण्ट्राणि धारणीयानि । इति भस्मधारणक्रमः ॥

॥ रुद्राक्षधारणविधिः ॥

अथरुद्राक्षधारणम् । तदपि भस्मधारणवत् शिवपूजायां नित्यम् । रुद्राक्षश्च ब्राह्मणादिभिः क्रमेण श्वेतरक्तपीत कृष्णवर्ण ग्राह्यम् । उक्तवर्णाभे ब्राह्मणैश्चतुर्विधमपि धारणीयम् । रक्तादिवर्णत्रयं क्षत्रियैः । पीतादिद्वयं वैश्यैः । शूद्रैस्तु कृष्णमेव धार्यम् । सर्ववा सर्वैर्यथालाभं धार्यम् । शिरसि कण्ठे कर्णयो र्बाह्वोर्मणिबन्धयो रुरसिच स्वशिरःप्रमाणाद्युचितसंख्याविशेषयुक्तं वा । शिरसि चत्वारिंशत् कण्ठे द्वात्रिंशत् कर्णयोः प्रत्येकं षट् बाह्वोःप्रत्येकं षोडश मणिबन्धयोः प्रत्येकं द्वादश वक्षसि अष्टोत्तरशत मित्येवं अष्टचत्वारिंशदधिकशतद्वयसंख्याकंवा । शिखायामेकमित्येकाधिकंवा । शिखायामेकं मस्तके षट्त्रिंश द्वक्षसि पञ्चाशत् साष्टशतमुपवीतं कण्ठकर्ण बाहुमणिबन्धे पूर्ववदिति पञ्चनवत्युत्तरद्विशतसंख्याकंवा । शिरसि अष्टोत्तरशतसंख्या नाभ्यन्तमालिकात्रयं कण्ठकर्णवक्षो बाहुमणिबन्धे पूर्ववदिति द्व्यशीत्युत्तरपञ्चशतसंख्याकंवा धारणीयम् । वज्रमाणिक्यवैडूर्य प्रवाळमौक्तिकरूपपञ्चरत्नसहितरुद्राक्षधारणं ज्वरग्रह पिशाच मेह कुष्ठभगन्दरकुमारग्रहापस्मारनिवारकं मकुटकुण्डलकर्णिकाहार-

केयूरकटकोदरबन्धादिषु तद्धारण मपमृत्युविनाशकं आयुश्श्रीकीर्तिवर्द्धन मन्यत्र रुद्राक्षधारणात् । शिखायां तद्धारणं कोटिगुणफलं कर्णयोः कण्ठे भुजयो रुत्तरोत्तरदशगुणफलं हस्तयोरपरिमितफलं । एकवक्त्रस्य रुद्राक्षस्य शिखायां सङ्गोप्य धारणं ब्रह्महत्यादोषशस्त्राग्नि चोरवृष्ट्यादिमहाभयहरं आयुश्श्रीकीर्तिवर्द्धनं भुक्तिमुक्तिकरं सर्वसिद्धिप्रदञ्च । द्विवक्त्रं गोहत्यादोषहरम् । त्रिवक्त्रं स्त्रीहत्यादोषहरम् । चतुर्वक्त्रमगम्यागमनाभक्ष्यभक्षणदोषहरम् । पञ्चवक्त्रं सर्वपापहरम् । षड्वक्त्रं दक्षिणकरे धृतं भ्रूणहत्याहरम् । सप्तवक्त्रं सुवर्णस्तेयगोहत्यादोषहरम् । विषहरञ्च । अष्टवक्त्रं गुरुतल्पदोषहरं सर्वकूटव्यवहारदोषहरञ्च । नववक्त्रं वामकरे धृतं च लक्षकोटिमहापातकदोषहरम् । दशवक्त्रं ग्रहपिशाचवेताळब्रह्मराक्षससर्पसिंहव्याघ्रादिभयहरम् । एकादशवक्त्रं शिखायां धृतं सहस्राश्वमेधशतवाजपेयशतसहस्रगोदानफलप्रदञ्च । द्वादशवक्त्रं कण्ठदेशेधृतं बहुदक्षिणगोमेधाश्वमेधफलप्रद मैश्वर्याभिवृद्धिकारि दंष्ट्रिशृङ्गिचोराग्निभयहरं सर्वपापक्षयकरञ्च । त्रयोदशवक्त्र मतुलभोगप्रदं रससाधनधातुवादघुटिकादि सिद्धिकरं पितृमातृभ्रातृस्त्रीवधदोषहरम् । चतुर्दशवक्त्रं सर्वकार्यसिद्धिकरं सकलव्याधिपापहरं ज्ञानयोगसिद्धिकरञ्च । मूर्द्धभुजकण्ठकर्णव्यतिरेकेणान्येष्वङ्गेषु क्षयवृद्धिसूतकस्त्रीसङ्गतिमलमूत्रोत्सर्जनमत्स्यमांसलशुनकतकशिग्रश्लेष्मातकभक्षणादिसमयेषु रुद्राक्षधारणं वर्जयेत् । रुद्राक्षदानकल्पोक्तप्रकारेण तद्दानं सर्व वेदपुराणाद्ध्ययनसर्वयज्ञदानानुष्ठानसर्वतीर्थाभिगमनफलप्रदं सर्वरोगहरं शतलिङ्गस्थापनशतलिङ्गदानसहस्रश्रीमूर्तिदानसहस्रकन्यादानफलप्रदं पुत्रमित्रादिसहितसकलैश्वर्यभोगप्रदं शिवसायुज्यदं प्रतिग्रहीतुरपि शिवभक्तस्य तावत्फलदञ्च । पौर्णमास्यमावास्यासंक्रान्त्युपरागजन्मनक्षत्रादिदिवसेषु रुद्राक्षधारणं सर्वपापक्षय-

करम् । पूजाकाले रुद्राक्षधारण मीशानमन्त्रेण शिरसिकार्यं कर्णयोस्त त्पुरुषमन्त्रेण कण्ठादिष्वघोरमन्त्रेण वक्षसि व्योमव्यापिमन्त्रेण ॥

॥ सकळीकरणप्रकारः ॥

अथ करन्यासाङ्गन्यासरूपं सकळीकरणम् । तत् त्रिविधम्— गृह स्थानां सृष्टिन्यासरूपं ब्रह्मचारिणां स्थितिन्यासरूपं यतिवानप्रस्थान संहारन्यासरूपम् । इहसृष्टिन्यासरूपमुच्यते— करौ गन्धादिलेपितौ कृत्व वामकरतलं तत्पृष्ठंच मणिबन्धात्समारभ्य दक्षिणपाणिना हः अस्त्राय फडिति प्रतिमार्जनं अस्त्रमन्त्रेण द्विःपरिमृज्य तेनैव मन्त्रेण दक्षिणकरतलं तत्पृष्ठञ्च वामकरेणैकवारं प्रमृज्य करावामणिबन्ध मस्त्रतेजसा व्याप्तौ सञ्चिन्त्य संपुटीकृत्यांगुष्ठद्वयमद्धे अमृतरूपं शक्तिमण्डलं ध्यात्वा तेनामृतेन हांशक्तयेवौषडिति कवचद्वयमाप्लाव्य योजितांगुष्ठद्वयकर्णिकेकरसं पुटकमले ओं हां शिवासनायनमः इति विन्यस्य तन्मद्धे ओं हां हं हां शिवमूर्तयेनम इति तेजोमयीं स्थिरविद्युन्निभां सितवर्णां शिवस्य सूक्ष्ममूर्तिं विन्यस्य हां ईशानमूर्ध्ने नमः इत्यंगुष्ठयोस्तर्जनीभ्यां विन्यस्य तर्जन्यादिषु कनिष्ठान्त मंगुष्ठाभ्यां हृदयाय नम इत्यादि चतुरोमन्त्रान्विन्यस्य हांहौं विद्यादेहायनमइत्यंगुष्ठाभ्यां करतलयो रष्टत्रिंशत्कलामयं सदाशिवात्मकं स्थूलं विद्यादेहं विन्यस्य नेत्रेभ्योनमइति नेत्रं करतलयोर्विन्यस्यहां हौं शिवायनमइति अंगुष्ठानामिकाभ्यां सदाशिवदेहव्यापकं शिवमावाहयेत्। ततः कनिष्ठिकादिषु हांहृदयायनमइत्यादि नेत्रमन्त्रव्यतिरिक्तान् पञ्चमन्त्रान्क्रमेण विन्यस्य वामदक्षिणकरौ तदितरकराभ्यां कवचायनम इति अवकुण्ठ्य करद्वयं संयोज्यवौषडन्तमूलेन परमीकुर्यात् । न्यस्तानां हृदयशिरशिखादीनां कलानाञ्च भिन्नभिन्नवर्णाना मावाहितपरमशिवतेजसाऽतिधवळेन तत्तद्वर्णतात्तिभावनं परमीकरणम् । ततः अङ्गन्यासं कुर्यात् ॥

दक्षिणांगुष्ठानामिकाभ्यां हांशिवासनायनम इति देहमद्ध्ये हृदिवा मूलाधारात् समुद्भूतं श्वेतं शिवस्यासनपङ्कजं विन्यस्य ओं हां हां हां शिवमूर्तयेनम इति नाभीकन्दादि हृदयादिवा भ्रूमध्यपर्यन्तं तेजोमयीं शिवस्य सूक्ष्ममूर्तिं विन्यस्य मुष्टिं बध्वाऽङ्गुष्टेन ईशानमन्त्रं मूर्ध्नि विन्यस्य अङ्गुष्ठयुक्ततर्जन्यादिभिर्वक्त्रे हृदि गुह्ये पादयोश्च तत्पुरुषमन्त्रादीन् क्रमेण विन्यस्य, भ्रूमध्यादिब्रह्मरन्ध्रान्तं हां हीं विद्यादेहायनम इति विद्यादेहं विन्यस्य नेत्रमन्त्रं नेत्रेषु मध्यमांगुळिभिस्तिसृभिर्विन्यस्य तस्मिन्नंगुष्ठानामिकाभ्यां हां हीं शिवायनमइति परमशिवमावाहयेत् । ततो हृदयशिरश्शिखास्थानेषु स्वांगुष्ठयुक्तकनिष्ठिकानामिकामध्यमाभिर्विन्यस्य कण्ठप्रावरणत्वेन स्तनमध्यान्तं कवचतर्जनीभ्यां विन्यस्य हस्ततलयोरस्त्रमनामिकांगुष्ठाभ्यां त्रिवारं विन्यसेत् । सर्वेऽप्येते मन्त्रा नमोन्ताः । अस्त्रमन्त्रस्तु हुंफडन्तः । ततोहुंफडन्तास्त्रमन्त्रेण ताळत्रयपुरस्सरं दिग्बन्धनं कृत्वा कवचेनावेष्टय वौषडन्तमूलेन महामुद्रां प्रदर्शयेत् । मस्तकादिपादान्तं हस्ताभ्यां संस्पर्शनं महामुद्रा । ततश्शिवसमानरूपता मात्मनश्चिन्तयेत् । इत्थं कृताङ्गन्यासो वद्धपट्टशिरोवेष्टनमस्तकत्राणकंकटककरगृहीतास्त्रभीषणो भटइव क्षुद्राणामप्रभृत्योभवतीति सकळीकरणम् । अथ सामान्यार्घ्यपात्र मस्त्रमन्त्रेण प्रक्षाळ्य बिन्दुस्थानस्त्रवदमृततया भावितेन शुद्धजलेन हां हृदयायवौषडिति आपूर्य हांहृदयायनम इति सप्तवारमभिमन्त्र्य कवचेनावकुण्ठ्य गन्धपुष्पादिभिरभ्यर्च्य धेनुमुद्रां प्रदर्शयेत् । इदं सामान्यार्घ्यजलं शिवमपहाय अन्येषां द्वारपालादीनां साधारणम् ॥

॥ द्वारपालार्चनम् ॥

अथ द्वारपालार्चनम् । तस्यायं क्रमः—अस्त्रपञ्जरमध्यस्थं आत्मानं भावयन् पूर्वाद्यष्टदिक्षायान्तमेकत्रिंशत्तत्त्वधर्मं मनसाऽतिलङ्घ्य शिवपूजा-

मन्दिरं वृत्ताकारं रक्तवर्णशुद्धविद्यातत्त्वात्मकं भावयन् भोगमोक्षकामः पूर्वद्वारे द्वारपालानर्चयेत् । कीर्तिविजयसौभाग्यकामः दक्षिणद्वारे केवलं मोक्षकामः पश्चिमद्वारे । उदग्द्वारेतु पूजा न कर्तव्या । सामान्यार्घोदकेन द्वारमन्त्रमन्त्रेण संप्रोक्ष्य बहिर्द्वारपालानर्चयेत् । तेच गणपत्यादयः । तत्र द्वारस्योर्द्वोदुम्बरमुखे दक्षिणवामभागयोर्मध्येच गणपतिसरस्वतीमहालक्ष्म्यः उपविष्टाः । वामदक्षिणव्यवस्था च देवमपेक्ष्य द्वारे प्रविशन्तं पूजकमपेक्ष्य वा ग्राह्या । द्वारस्य बहिःप्रदेशे दक्षिणपार्श्वे नन्दी दक्षिणपार्श्व एव नन्दिन उत्तरभागे गङ्गा वामपार्श्वे महाकाळः वामपार्श्व एव तस्य दक्षिणभागे यमुनाच स्थिताः । हां गणपतयेनमः । श्यामवर्णं ततोक्षसूत्रपाशाङ्कुशान् पुष्करेण बीजापूरञ्च धारयन्तं गणपतिं पूजयामि । हांसरस्वत्यैनमः । श्वेतवर्णां मक्षमालापुस्तकधरां वीणावादनव्यापृतकरद्वयां सरस्वतीं पूजयामि । हां महालक्ष्म्यै नमः । श्रीफलकमलाभयवरधारिणीं उभयपार्श्वस्थितगजयुगळहस्तोद्धृत हेमकुम्भामृत धाराभिषिच्यमानां महालक्ष्मीं पूजयामि । हां नन्दिनेनमः । अरुणजटामकुटधरं त्रिशूलाक्षमालातर्जनीमुद्रधारिणं स्थूलदेहं नन्दिनं पूजयामि । हां गङ्गायैनमः । धवळवर्णां मकरवाहना ममृतकलशचामरधारिणींगङ्गांपूजयामि । हां महाकाळायनमः । कृष्णवर्णं दंष्ट्राकराळभ्रकुटीभीषणस्थूलदेहं शूलकपालमुद्रतर्जनीमुद्राधारिणं महाकाळं पूजयामि । हां यमुनायैनमः । श्यामवर्णां कूर्मवाहनां चामरामृतकलशधारिणीं यमुनांपूजयामि । तत्तत्स्थानेषु पूजयेत् । सर्वेऽते द्वारपालाः गङ्गायमुनेविना त्रिनेत्राः । सर्वेचैते द्वारसमानमुखाः । श्लोकैः कवाटोद्घाटनप्रार्थनापूर्वक मस्त्रमन्त्रेण कवाटमुद्घाट्य । हौंशिवायनम इति नेत्रयोर्विन्यस्य । दिविस्थितान्विघ्नान् दिव्यध्यानदृष्टिसन्त्रस्तान् कृत्वा । नभोगतान् विघ्नान् तर्जन्यंगुष्ठोक्षितपुष्पमन्त्र-

स्तान्कृत्वा । भूमिगतान् विघ्नान् दक्षिणपार्ष्णिघातत्रयतस्तान् कृत्वा । अस्त्रायहुंफडिति मन्त्रेण त्रिविधान् विघ्नानुत्सारयेत् । अथ द्वारस्य देहळीशाखां वामांसंश्रितो दक्षिणां देहळीमस्पृशन् दक्षिणपादेन शिवमन्दिरं
१ प्रविश्य । हां अस्त्रायनमः । अग्निवर्णं चतुर्वक्त्रं शक्तिशूलाभयवरान्वित-करचतुष्टयं जटामकुटालंकृत मर्धेन्दुशेखरं सकलविघ्ननिवारकं अस्त्रं पूजयामीति देहळीमध्ये शिवमन्दिराभिमुखतया स्थितं अस्त्रराजं प्रीत्या परावृत्य तदभिमुखः पूजयेत् । राजा ब्रह्माणं परावृत्य तदभिमुखः पूजयेत् । ततः हांब्रह्मणेनमः। कनकवर्णं सश्मश्रुचतुराननं तुन्दिलं दण्डाक्षवलयस्रक्-मण्डलुधारिणं वास्त्वधिपतिं ब्रह्माणं पूजयामीति । ब्रह्माणमपि देहळीमध्य एव पूजयेत् । ततो द्वारस्याभ्यन्तरे दक्षिणपार्श्वे हां नन्दिकेश्वरायनमः । रक्तवर्णं त्रिणेत्रं चन्द्रकलालंकृतजटामकुटं मृगपरशुनमस्कार-मुद्रान्वितकरचतुष्टयं बाहुमूले वेत्रं कट्यां क्षुरिकांच धारयन्तं भस्मरुद्राक्ष-धारिणं वानरास्यं नन्दिकेश्वरं पूजयामीति द्वारस्याभ्यन्तरदक्षिणे पार्श्वे पूजयेत् । हां सुं सुयशायैनमः । श्यामवर्णां सुत्पलालंकृतदक्षिणकरां सुयशादेवीं पूजयामीति द्वारस्याभ्यन्तरे सुयशादेवीं पूजयेत् । ततश्शिवं प्रदक्षिणीकृत्य निर्ऋतिकोणे ब्रह्माणं पूजयेत् । पूजाचैतेषां आसनदानावाहन स्थापन सन्निधान सन्निरोधन पाद्याचमनार्घ्य गन्धपुष्पधूपदीपदानान्तं नैवेद्यताम्बूलदानान्तंवा प्रत्येकं कर्तव्या । अशक्तौ मध्यएव सर्वेभ्यो द्वारपालेभ्योनमइति गन्धपुष्पादिभिः पूजयेत् । द्वारपा देवदेवस्य द्वारं रक्षत यत्नतः । निवार्य विघ्नसङ्घात मित्याज्ञा पारमेश्वरीति शिवाज्ञां श्रावयेत्। इदञ्च द्वारपालार्चनं आत्मार्थपूजायामागममेदेन विहितप्रतिपिद्धत्वात् तद्विकल्पकमिति नवैकल्पम् । तदकरणे नप्रत्यवायः करणे अभ्युदयः षोडशिग्रहन्यायेन ॥

अथ पूजोपकरणं सर्वं शिवाग्रे सन्निधाप्य देवस्य दक्षिणभागे आग्नेयभागेवा उत्तराभिमुखः स्थित्वा रुचिरं स्वस्तिकं वाऽभ्यस्तमासनमास्थाय पञ्चानामात्मस्थानद्रव्यमन्त्रलिङ्गशुद्धीनां मध्ये प्रथम मात्मशुद्धिं कुर्यात् । अयमूर्द्वेदुंबरादिषु गणपत्यादिपूजाप्रकारो यथोक्तलक्षणशिवमन्दिरसद्भावे आत्मशुद्धेः पूर्वं कर्तव्यः । तद्भेदेवं विहितम् । गृहस्येशानदिग्भागे शिलामयं पक्वेष्टकामयं शुद्धदारुमयं मृन्मयं वा चतुरश्रमायतं वृत्तं पूजागृहं वा यजमानमध्यांगुळिपर्वतृतीयपर्वान्तराळमध्यपर्व दैवत्यरूप उत्तममध्यमाधमभेदभिन्नांगुळिचतुर्विंशत्याद्यहस्तमानेन त्रिपञ्चसप्तनवत्रयोदशसप्तदशविंशत्येकविंशतिद्वात्रिंशद्धस्तान्यतमप्रमाणमेकं द्विभूमं त्रिभूमं वा पूजागारं निर्माय तत्पञ्चधा विभज्य तन्मद्ध्यभागे शिलासुधे वर्जयित्वा मृन्मयी मिष्टकाचितां वा चतुष्कोणस्तंभयुक्तां स्तंभरहितां वा षोडशांगुळोत्सेधां अष्टादशांगुळोत्सेधांवा वेदिकां विरचय्य तदुपरि पश्चिमभागे एकतालविस्तारायामं पञ्चांगुळोत्सेधं गर्भगृहस्थानीयदेशं तस्य पूर्वभागेतादृशायामविस्तारोत्सेध मर्द्धमण्टपस्थानीयदेशं च कृत्वा तस्य पूर्वभागे पञ्चतालायामं चतुस्तालविस्तार मष्टांगुळोत्सेधं बेरमण्टपस्थानीयदेशं च कल्पयेत् । तत्र गर्भगृहस्थानीयदेशे सौवर्णं राजतं ताम्रं दारुमयं वा चतुरश्रमायतं वृत्तंवा पेटकं स्थापयेत् । बेरमण्टपस्थानीयदेशे द्विहस्तायत मेकहस्तविस्तृतंवा द्वादशांगुळोच्छ्रायं वा कमलभूपितपेटकं विन्यस्य तदुपरि नमनीं तन्मानां प्रसार्य तन्मध्ये जीवगजदन्तादिनिर्मितं पीठं विन्यस्य तदुपरि सुवर्णादिरचितं पद्मपीठं पश्चिमभागरचितप्रभामण्डलसहितं पूर्वाभिमुखं स्थापयेत् । पूजामण्टपञ्च प्रकीर्णकुसुमधूमामोदचन्दन चर्चावितान मुक्तादामध्वजपताकादर्पण प्रदीपादिभि रलंकुर्वीतेति । एवंविधपूजामण्टपाभावे शिवपूजास्थानमेव तादृशं पूजामण्टपं मनसि भावयेत् । शिवपीठसमीपोपविष्टः तत्रैव

द्वारपालार्चनमात्मशुद्धेः पूर्वं पश्चाद्वा कुर्यात् ॥ इति द्वारपालार्चनम् ॥

॥ आत्मशुद्धिप्रकारः ॥

अथ आत्मशुद्धिः। सा द्विविधा । पूजकजीवस्य शिवभावापादनात्मिका जीवशुद्धिरूपा पूजकदेहस्य शिवदेहत्वापादनात्मिका देहशुद्धिरूपाच । तत्रायं जीवशुद्धिप्रकारः । त्रिः प्राणानायम्य देहान्तर्गतमशुद्धवायुं रेचकत्रिप्राणायामेनास्त्रमन्त्रेणोत्सार्य बाह्यवायुनोदरं प्रपूर्य पादांगुष्टद्वयादारभ्य यावन्मूलाधारं द्विधाभूतां तत ऊर्द्ध मात्रब्रह्मरंध्र मेकीभूता मधोमुखैः पद्ममुकुळैः युक्तां शरीरान्तराळेतिसूक्ष्मां विद्युल्लेखामिव भास्वरा मन्तस्सुषिरयुक्तां सुषुम्नानाडीं संचिन्त्य तन्मध्ये हूमिति शिखाबीजं ज्वलन्तं संचिन्त्य हृत्कण्ठतालुभ्रमध्यब्रह्मरन्ध्रेष्वधोमुखतया स्थितानि पद्ममुकुळानि पूरककुंभकरेचकैर्विकसितोत्तिभितोर्द्धमुखीकृतानि भावयित्वा मूलाधारप्रदेशे दीपशिखावत् ज्वलन्तं हूङ्कारं हुंफडिति सन्ततोच्चारणेन ऊर्द्धमुद्गच्छन्तंध्यायन् तेन पश्चापि ब्रह्मादिग्रन्धीन्पद्मनाळग्रंथीन् भिन्नान् भावयित्वा हुंकारं प्रतिनिवृत्य वायुं विरेचयेत् । पुनरपि हूङ्कारं मूलाधारे ध्यायन् पूरकवायुनोपसंहृतसर्वशरीरव्यापकचैतन्यं हृत्पङ्कजाश्रितं पुर्यष्टकरूपसूक्ष्मदेहान्वितं जीवं पुर्यष्टकादादाय स्फुरत्तारकाकारमतिसूक्ष्ममेकाकिनं हामिति हृदयबीजसंपुटितं कृत्वा हूङ्कारं मूर्ध्नि निवेश्य कुंभकं कृत्वा वायुमूर्द्धं प्रवर्तयन् संहारमुद्रया तमादाय द्वादशान्तपर्यन्तं नीत्वा तदुपरि स्थितेपरमशिवे योजयेत्। एवंच जीवः स्थूलसूक्ष्माशुद्धदेहोपाधिनिर्मुक्तः शिवसायुज्यप्राप्तनिर्मलज्ञानक्रियाशक्तियुक्तः शुद्धोभवति । यद्वा जीवं द्वादशान्तपर्यन्तं नीत्वा हृयकमलएव शक्तिमण्डलसंपुटितं कृत्वा भूतशुद्धिसमयकर्तव्यदेहदाहतो रक्षेत् । तत्रायं क्रमः हृत्कमलकर्णिकोपरि हां सूर्यमण्डलायनमः । हां सोममण्डलायनमः । हां

अग्निमण्डलायनमः । हां शक्तिमण्डलायनम इति विन्यस्य हां हं हां आत्मनेनमः इति देहव्यापकं जीवात्मानमादायोपसंहृतव्यापकरूपं स्फुरत्तारकाकारं सञ्चिन्त्य तं शक्तिमण्डलस्योपरि विन्यस्य तस्योपरिच शक्तिवह्निसोमसूर्यमण्डलानि क्रमेण विन्यस्य ऊर्द्ध्वधिस्थितशक्तिमण्डलद्वयविनिस्सृतामृतपरिप्लुतं भावयेत् । एवं जीवस्य रक्षामात्रं कर्तव्यम् । तस्य दीक्षाकाल एव शुद्धत्वात् प्रतिदिवसं पूजासमये शुद्धिर्नापेक्षितेति ॥

॥ देहशुद्धिप्रकारः ॥

अथ देहशुद्धिः । सा द्विविधा सूक्ष्मदेहशुद्धिः स्थूलदेहशुद्धिश्च । तत्र शब्दस्पर्शरूपरसगन्धबुद्ध्यहङ्कारमनोरूपपुर्यष्टकात्मकसूक्ष्मशरीरशुद्ध्यर्थं हृत्कण्ठतालुभ्रूमद्ध्यब्रह्मरन्ध्रस्थितेषु ब्रह्मादिषु कारणपुरुषेषु ब्रह्मणि शब्दस्पर्शौ प्रविलापयामि । रसंविष्णौ प्रविलापयामि । रूपगन्धौ रुद्रे प्रविलापयामि । बुद्ध्यहङ्कारौत्वीश्वरे प्रविलापयामि । मनस्सदाशिवे प्रविलापयामीति सूक्ष्मशरीरांशान् शब्दादीन् प्रविलापयेत् । ततः स्थूलशरीरशुद्ध्यर्थं स्वशरीरे पादादि द्वादशान्तस्थानेषु स्थितानि वक्ष्यमाणस्थानाकृतिरूपादियुक्तानि पञ्चमहाभूतानि ध्यात्वा पृथिवीमप्सु प्रविलापयामि । अपोऽग्नौ प्रविलापयामि । अग्निं वायौप्रविलापयामि । वायुमाकाशे प्रविलापयामि । आकाशं पराशक्तौ प्रविलापमामि । पराशक्तिं परशिवे प्रविलापयामीतिभावयेत्। इयं स्वकारणेषु पृथिव्यादिप्रविलापनरूपा भूतशुद्धिः । अन्यातत्तद्गुणक्षपणरूपा। गुणक्षपणरूपाच द्विविधा । प्रत्येकशोधनरूपा परस्परशोधनरूपाच । तत्राद्यायथा-पादाद्यारभ्य जानुपर्यन्तं चतुरश्रं पीतवर्णं कठिनस्वभावं वज्रलांछितं ह्रामिति हृदयबीजेन पार्थिवबीजसहितेन युक्तं ब्रह्मणा कारणेश्वरेणाधिष्टितं निवृत्तिकलारूपं पार्थिवमण्डलं भावयामीति विचिन्त्य ह्रां निवृत्तिकलाये हुंफडिति मन्त्रेण पञ्चभि रुद्धातैः पृथिव्या गन्धरसरूपस्पर्शशब्दगु-

णानुत्सारयेत् । ततोजान्वादिनाभिपर्यन्त मर्धचन्द्राकारं श्वेतवर्णं द्रवस्वभावं पद्मलांछितं हीमिति शिरोबीजेनाप्यबीजसहितेन युक्तं कारणेश्वरेण विष्णुनाऽधिष्ठितं प्रतिष्ठाकलारूपमाप्यमण्डलं भावयामीति विचिन्त्य ह्रीं प्रतिष्ठाकलायै हुंफडिति मन्त्रेण चतुर्भिरुद्धातै रपां रसरूपस्पर्शशब्दगुणानुत्सारयेत् । ततो नाभ्यादिकण्ठपर्यन्तन्त्र्यश्रं रक्तवर्णं पचनस्वभावं स्वस्तिकलांछितं हूमिति शिखामन्त्रेणाग्निबीजसहितेन युक्तं रुद्रेण कारुणेश्वरेणाधिष्ठितं विद्याकलारूपमग्निमण्डलं भावयामीति विचिन्त्य हूं विद्याकलायै हुंफाडिति मन्त्रेण त्रिभिरुद्धातै रग्निगतान् रूपस्पर्शशब्दगुणानुत्सारयेत् । ततः कण्ठादि भ्रूमध्यपर्यन्तं षडश्रं कृष्णवर्णं चलनस्वभावं षड्बिन्दुलांछितं हैमितिकवचमन्त्रेण वायुबीजसहितेन युक्तं महेश्वरेण कारणेश्वरेणाधिष्ठितं शांतिकलारूपं वायुमण्डलं भावयामीति विचिन्त्य ह्रैं शान्तिकलायै हुंफाडिति मन्त्रेण द्वाभ्यामुद्धाताभ्यां वायोःस्पर्शशब्दगुणावुत्सारयेत् । ततो भ्रूमध्यादिब्रह्मरन्ध्रादशान्तपर्यन्तं वृत्ताकारं धूम्रवर्णं आकाशस्वभावं बिन्दुशक्तिलांछितं हः इति अस्त्रमन्त्रेण संयुक्तं सदाशिवेन कारणेश्वरेणाधिष्ठितमाकाशमण्डलं भावयामीति विचिन्त्य ह्रौं शान्त्यतीतकलायै हुंफाडिति मन्त्रेण एकोद्धातेन आकाशस्य शब्दगुणमुत्सारयेत् । एतानि पृथिव्यादिमण्डलानि हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रगतानि विभाव्यशोधयेत् । इति प्रत्येवाशोधनप्रकारः ॥ परस्परशोधनेत्वयं विशेषः—सर्वाणि पृथिव्यादिमण्डलानितत्तत्शोधनसमये पादादिमूर्धान्तव्यापकानि भावयेत् । पृथिवीशोधने तद्गुणपञ्चकोत्सारणानन्तरं पृथिवींस्वविरुद्धव्याप्यभिभूतां वाय्वाकारापन्नां वायुशोधनसमये वायुं स्वविरुद्धपृथिव्यभिभूतं पृथिव्याकारापन्नञ्च भावयेत् । एवं जलानलावपि तत्तद्गुणोत्सारणानन्तरं स्वविरुद्धानलजलाभिभूतावनलजलाकारापन्नौ भावयेत् । आकाशगुणोत्सारणा-

नन्तर माकाशं नित्यत्वव्यापकत्वशुद्धत्वादितद्विरुद्धगुणयुक्तपरशक्त्यात्मक-परमाकाशाभिभूतं तदाकारापन्नं शुद्धस्फटिकनिर्मलं भावयेदिति । इत्थं महाभूतानां प्रत्येकशोधनेन परस्परशोधनेनवा गुणक्षयात् क्षीणशक्ति-कस्य भूतसमुदायात्मकस्य शरीरस्य शोषं विभाव्य पादांगुष्ठोत्थितेन शिव-शक्त्यधिष्ठितेन कालाग्निना हः अस्त्राय हुंफडिति मन्त्रेण शरीरं दग्धं निरवशेषं निवृत्यादिकलामात्रशेषं शरीरगतदोषमात्रं वा दग्धं भावयि-त्वा द्वादशान्तस्थित शक्तिमण्डलस्थवदमृतवर्षेणाप्लावयेत् । एवं शरीरशो-षार्थमुक्तशक्तिप्रकारं शरीरारम्भकभूतगुणोत्सारणं कृत्वा वा स्थूलशरीरं पृ-थिव्यादिपञ्चभूतबीजं मायाक्षेत्रविनिक्षिप्तं धर्माधर्ममूल मिन्द्रियशाखोप-शाखं शब्दादिविषयालोचनपल्लवं भावप्रपञ्चकुसुमं सुखदुःखफलं पुरु-षविहंगोपभोग्य मूर्द्धमूलमधश्शाखं वटवृक्षं विभाव्य प्राणायामं कुर्वन् षण्मा-त्रेण पूरकपूर्वार्धेन ह्रामित्युच्चारपञ्चकयुक्तेन पत्रपुष्पफलरहितं स्तब्धं विचिन्त्य पूरकापरार्धेन ह्रीमित्युच्चारचतुष्टययुक्तेन स्निग्धपत्रपुष्पफलोपेतं विभाव्य एकस्मिन्नेवोद्घातेन द्वादशमात्रेण कुम्भकेन ह्रूमित्युच्चारत्रययुक्तेन सव्यपादांगुष्ठोत्थितेन कालाग्निना शुष्कं दग्धं विभाव्य रेचकपूर्वार्धेन ह्रै-मित्युच्चारद्वययुक्तेन भस्मीभूय दिक्षु विप्रकीर्णं विभाव्य रेचकापरार्धेन ह्रौमित्येकोच्चारयुक्तेन स्फटिकनिर्मलं शुद्धव्योमरूपं चिन्तयित्वाऽमृतेनाप्ला-वयेत् । एवं देहदाहं कृत्वा यथोक्तसंख्यैरुद्घातै स्तत्तद्गुणोत्सारणपर्यंतामे-वंवा गुणोत्सारणादिभावनांविना पृथिव्यादिकं बन्धकत्वान्निवृत्तं भवतीत्य-नुसंधानपूर्वकं तत्तत्स्थानेषु वायुमनोधारणापर्यन्तमेववा भूतशुद्धिं कुर्यात् । उद्घातशब्देन उद्घन्यते उत्सार्यते अनेनेति व्युत्पत्त्या भूतगुणानां तदशुद्धेर्वा उत्सारणसाधनमुच्यते । तत्तत्कलामन्त्रोच्चारणपूर्वकं पूरकं कृत्वा सुषुम्नया यावद्वादशान्तं प्राणवायोरूर्द्ध्वप्रवर्तनरूपं कर्म । तच्च पूरकं कृत्वा कुंभ-ककाले प्राणवायोरूर्द्ध्वं प्रेरणं कृत्वा तंप्राणनिरुध्य दक्षिणनाड्या तद्रेचकाय-

न्तम् । एवंच एकैकस्मिन्नुद्घाते पूरकाद्यास्त्रयस्त्रयः प्राणायामा इति पृथिव्यां पञ्चाना मुद्घातानां पञ्चदशप्राणायामास्संपद्यन्ते । जलादिषु द्वादश नव षट् त्रयश्च भवन्ति । एकैकस्मिंश्च रेचकादिरूपे प्राणायामे द्वादशमात्राकालः । ततश्चैकैक उद्घातः षट् त्रिंशन्मात्राकालो भवति । यद्वा— धारणार्थे कुम्भकप्राणायाम एव द्वादशमात्राकालनियमः । पूरकरेचकयो र्यथासंभवं कालो ग्राह्यः । जानुमण्डल मद्भुत मविलंबित मेकवारं प्रदक्षिणीकृत्य अंगुळिस्फोटनकालो मात्राकालः । त्रिःप्रदक्षिणीकृत्य अंगुळिस्फोटनकाल इति तु सिद्धान्तशेखरादिषूक्तम्। अयञ्च कनिष्ठो मात्राकालः । द्विगुणो मध्यमः । त्रिगुण उत्तमः । इत्थं कालविशेषावच्छिन्नप्राणवायुप्रवर्तनात्मक मुद्घातमनपेक्ष्य तत्तद्गुणसमसङ्ख्यकलामन्त्रोच्चारणेन तत्तद्गुणोत्सारणानुसन्धानरूपां वा एकवारं तत्तत्कलामन्त्रोच्चारणेन तत्तत्कलातत्त्वभुवनवर्णपदमन्त्रयुक्तानां पार्थिवमण्डलादीनां स्वात्मानंप्रति प्रतिबन्धकत्वनिवृत्त्यनुसन्धानात्मकपाशच्छेदमात्ररूपां वा भूतशुद्धिं कुर्यात् ॥

पार्थिवादिमण्डलानिच निवृत्तिप्रतिष्ठाविद्याशान्ति शान्त्यतीतकलामयानि शरीरे पादादि जान्वादि नाभ्यादि कण्ठादि भ्रूमध्यादिच स्थितानि। हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्राश्रितानिवा शतकोटियोजन परिमाणमारभ्य उत्तरोत्तरदशगुणपरिमाणानि चतुरश्रार्धचन्द्र त्रिकोण षडश्र वृत्तरूपाणि वज्रपद्मद्वय स्वस्तिक षड्बिंदुकबिन्दुलांछितानि पीतरक्तश्वेतकृष्णधूम्रवर्णानि कठिनद्रव्योष्णचलनावकाशस्वभावानि गन्धादिपञ्चचतुस्त्रिद्व्येकगुणानि ब्रह्मविष्णुरुद्रमहेश्वरसदाशिवाधिष्ठितानि बिन्दुयुक्तलकारवकाररेफयकारहकाररूपैः पार्थिवादिबीजैर्युक्तानि भावनीयानि । तत्र निवृत्तिकलायां पृथिवीतत्त्वमेकं अष्टोत्तरशतं भुवनानि ककार एकोवर्णः अष्टाविंशतिपदानि सद्योजातहृदयाख्यौ द्वौ मन्त्रौ । प्रतिष्ठाकलायां जलादिप्रकृत्य-

न्तानि त्रयोविंशतितत्त्वानि षट्पञ्चाशद्भुवनानि खादिमान्ताश्चतुर्विंशति-वर्णाः द्वात्रिंशत्पदानि वामदेवशिरस्समाख्यौ द्वौ मन्त्रौ । विद्याकलायां पुरु-षादिमायांतानि सप्ततत्त्वानि सप्तविंशतिभुवनानि यादिसान्तास्सप्तवर्णाः एकविंशतिपदानि अघोरशिखाख्यौ द्वौ मन्त्रौ । शान्तिकलायां शुद्ध-विद्या महेश्वरश्चेति द्वे तत्त्वे अष्टादशभुवनानि हक्षौ वर्णौ द्वादशपदानि पु-रुषकवचाख्यौ द्वौ मन्त्रौ । शान्त्यतीतकलायां सदाशिवशक्ती द्वे तत्त्वे पञ्चदश भुवनानि स्वराष्षोडश वर्णाः एकं पदं मूलेशानास्त्राख्यास्त्रयो-मन्त्राः । एवमेकादशमन्त्रात्मको मन्त्राध्वा । व्योमव्यापी मन्त्रगतचतु-र्नवतिपदात्मकः पदाध्वा । पञ्चाशद्वर्णात्मकः वर्णाध्वा । निवृत्यादिपञ्च-कलात्मकः कलाध्वा । एवं सकलाध्वगर्भाणि पृथिव्यादिमण्डलानि वि-भावनीयानि । यद्वा—संक्षेपेण सर्वाध्वगर्भत्वं विभावनीयम् । तद्यथा—सद्यादिपञ्चमन्त्रात्मको मन्त्राध्वा । जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतरूप पञ्चाव-स्थात्मकः पदाध्वा । पादादि हृदयादिवा पार्थिवमण्डलादिस्थानपञ्चकरूपो भुवनाध्वा । अकारादिवर्णत्रयबिन्दुनादात्मको मूलमन्त्रपञ्चवर्णात्मको वा वर्णाध्वा । पञ्चकलात्मकः कलाध्वेति । एवं वा सर्वाध्वगर्भाणि विभाव्य प्रागुक्तप्रकारेण संस्थानवर्णस्वभावलांछनबीजमात्रयुक्तानि वा विभाव्य शोधनीयानि । एवं पृथिव्यादिप्रविलापनरूपा तत्तद्गुणक्षेपणेन देहदाह-रूपा देहगतबाह्याभ्यन्तरदोषमात्रदहनरूपा गुणक्षपणं विना केवलदेहदा-हरूपा दाहं विना केवलतत्तद्गुणक्षपणरूपा बन्धकत्वनिवृत्त्यनुसन्धानात्म-कपाशच्छेदमात्ररूपा च भूतशुद्धिः । सर्वाऽप्येषा सोद्घाता निरुद्घाता चेति द्विविधा । तत्तद्गुणक्षपणं च प्रत्येकशोधनरूपं परस्परशोधनादिमन्त्रेण चेति द्विविधम् ॥

सर्वाध्वगर्भत्वेनसंस्थानं च द्विविधं । भूतचिन्तनमपि सर्वाध्वगर्भत्वेन सं-

स्थानादिमात्रेणचेतिद्विविधंसर्वाध्वगर्भत्वाच्चिंतनञ्च प्रपञ्चेनसंक्षेपेणचेति द्विविधं । एवमुक्तप्रकारासुभूतशुद्धिषुपूर्वाचारदेशकालाद्यनुसारेणयाकाचिद्भूतशुद्धिरनुष्ठेया । एवं भूतशुद्ध्यात्मिकादेहशुद्धिरुक्ता । तत्त्वशुद्ध्यात्मिकां देहशुद्धिंकुर्यात् ॥

यथा—प्रकृत्यहङ्कार बुद्धिमनश्श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमितत्त्वभूत मरूप मशुद्ध मात्मतत्त्वं स्थूलदेहं मायाकलाविद्यारागकालानियतिपुरुषतत्त्वरूपं शुद्धाशुद्धं विद्यातत्त्वं सूक्ष्मदेहं शिवशक्तीश्वरसदाशिवशुद्धविद्यातत्त्वरूपं शुद्धं शिवतत्त्वं परदेहञ्च विभाव्य स्थूलदेहं सूक्ष्मदेहे तत्परदेहेच प्रविलापयेत् । उक्तप्रकाराणामन्यतमशोधनानुष्ठानानन्तरं ह्रौं शान्त्यतीतकलाभ्यैनम इत्यादिभिर्मन्त्रैस्सूक्ष्मपञ्चकलामयस्य शुद्धसूक्ष्मशरीरस्य सृष्टिं पञ्चभिः कलामन्त्रैरेव स्थूलपञ्चकलामयस्य स्थूलदेहस्य सृष्टिंच तत्तध्वंसनपक्षे विभाव्य हां शक्त्यै वौषडिति शक्तिमण्डलस्त्रुतामृतधारयाऽऽप्लावयेत् । ततोहृत्कमलकर्णिकायां हामाधारशक्तयेनमः । हां धर्मासनायनमः । हां ज्ञानायनमः । हां वैराग्यायनमः । हामैश्वर्याय नमः । हां पद्मायनम इति मध्याग्नेयादिकोण चतुष्टयमध्येषु षडुत्थासनं विन्यस्य तत्र पुनस्स्थूलसूक्ष्मदेहात्मिकामविभक्तकरचरणादिरूपां मूर्तिं हां हं हां आत्ममूर्तये नम इति विन्यस्य ह्रौं विद्यादेहायनमइति अष्टत्रिंशत्कलारूपं सदाशिवरूपं ध्यात्वा शिवायनमइति द्वादशान्तस्थ परमशिवसायुज्यं निर्मलज्ञानक्रियाशक्तिकं यजमानमूर्तिरूपं जीवात्मानं तत्रावाह्य हृदयादिस्थानेषु हृदयादिमन्त्रान्विन्यस्य मूलेन परमीकृत्य वौषडन्तशक्तिमन्त्रेण द्वादशान्तस्थितशक्तिमण्डलस्त्रुतबहुळामृतधारयाऽभिषिञ्चेत् । ततो दण्डमुण्डकलाश्रीकण्ठादिन्यासान्कुर्यात् ॥

तत्रायं क्रमः— शिवासनमभ्यर्च्य शिवमूर्तिञ्च हृदये विन्यसेत् ।

होमीशानमूर्ध्नेनम इति समुष्टिकांगुष्ठाग्रेण मूर्ध्नि । हें तत्पुरुषवक्त्राय नम-इत्यंगुष्ठतर्जनीभ्यां मुखे । हुमघोरहृदयायनम इति अंगुष्ठमध्यमाभ्यां हृदये । हिं वामदेवगुह्याय नम इत्यंगुष्ठानामिकाभ्यां गुह्ये । हं सद्योजातमूर्तये नमइत्यंगुष्ठकनिष्ठिकाभ्यां पादे । होमीशानायोर्द्ध्ववक्त्रायनमः । हें तत्पुरुषा-य पूर्ववक्त्रायनमः । हुं अघोराय दक्षिणवक्त्रायनमः । हिं वामदेवाय उत्त-रवक्त्रायनमः । हं सद्योजाताय पश्चिमवक्त्रायनम इत्यूर्द्ध्व पूर्वदक्षिणोत्त-रपश्चिमस्थानेषु पूर्वोक्तप्रकारेण तत्तदंगुळिभिर्विन्यसेत् । एवं दण्डवक्त्रभं-गिन्यासानन्तरं सशक्तिकाः कलाशक्तिरहितावा वक्ष्यमाणस्थानेषुदीक्षित-ब्राह्मणः न्यासं कुर्यात् । क्षत्रियवैश्यौ युगान्तरे न्यासं कुर्याताम् । तदितरेश क्तीरेवन्यसेयुः । यथा - हें शशिन्यैनमः। हों अङ्गदायैनमः । होमिष्टदायैनमः। हों मरीच्यै नमः । हों ज्वालिन्यैनमः । इत्यूर्द्ध्वपूर्वदक्षिणोत्तरपश्चिममूर्धसु समुष्टिकांगुष्ठमुद्रया न्यसेत् । हें शान्त्यैनमः । हें विद्यायैनमः । हें प्रतिष्ठायै नमः । हें निवृत्यैनमः । इति पूर्वदक्षिणोत्तरपश्चिमवक्त्रेषु अंगुष्ठतर्जनीभ्यां न्यसेत् । हुं तमायैनमः । हुं मोहायैनमः । हुं क्षुधायैनमः । हुं निद्रायैनमः । हुं मृत्यवे नमः । हुं मायायै नमः । हुं भयायै नमः । हुं तारायैनमः । इत्यंगुष्ठमध्यमाभ्यां हृदयकण्ठांसद्वयनाभिजठरपृष्ठवक्षस्सु न्यसेत् । हिं रजायैनमः । हिं रक्षायैनमः । हिं रत्यैनमः । हिं पाल्यैनमः । हिं कामायैनमः । हिं संयमायैनमः । हिं क्रियायैनमः । हिं बुद्ध्यैनमः । हिं कार्यैनमः । हिं धात्र्यै नमः । हिं ब्राह्मण्यैनमः । हिं मोहिन्यै नमः । हिं मनोन्मन्यै नमः । इत्यंगुष्ठानामिकाभ्यां मूलाधारगुह्यवृषणोरुद्वयजंघाद्वयास्फिग्द्वयकटिदक्षिण-पार्श्वेषु विन्यसेत् । हांसिद्ध्यै नमः । हं ऋद्ध्यैनमः । हं दूत्यै नमः । हं ल-क्ष्म्यैनमः । हं मेधायैनमः । हं कान्त्यैनमः । हं स्वधायै नमः । हंधृत्यैनमः। इत्यंगुष्ठकनिष्ठिकाभ्यां पादद्वयकरद्वयप्राणशिरोबाहुद्वयेषु न्यसेत् । नम-

स्त्वाहादिजातिषट्कयुक्तमङ्गन्यासं च कुर्यात् । यस्यावसरोऽस्ति मतिक्षोभश्च नभवति स श्रीकण्ठादिन्यासषडध्वन्यासादिकमपि कुर्यात् । एवं जीवशुद्धि देहशुद्धिपूर्वकन्यस्तमन्त्रतनुस्वरूपेण विग्रहेण च शिवरूपतां प्राप्तशिवार्चनयोग्यो भवति । नाशिवशिवमर्चयेदित्यामनन्ति । एवं जीवदेहशुद्धिकरणाशक्तौ न्यासमात्रं कुर्यात् । न्यासस्यापि कृत्स्नस्य करणाशक्तौ दण्डन्यासमात्रं षडङ्गन्यासमात्रंवा कुर्यात् । तावतैव देहात्मनोश्शुद्ध्या शिवरूपतापत्त्याच शिवार्चनयोग्योभवति ॥ एवं कृताङ्गन्यासोऽन्तर्यागं कुर्यात् ॥

अन्तर्यागक्रमः ॥

तस्यायं क्रमः— अन्तर्हृदयावकाशे दिव्यरत्नमयं शिवार्चनमण्डपं मनसा सङ्कल्प्य तत्र शिवार्चनोपयुक्तानि सर्वाणि द्रव्याणि मनसोपनीय विशोध्य द्वादशान्तस्थितचन्द्रमण्डलगळदमृतधारयाऽर्घ्यपात्रादिपूरणं तत्संस्कारञ्चकृत्वाद्वारपालार्चनंविधायवक्ष्यमाणप्रकारेणगणेशगुरुवन्दनानुज्ञाप्रार्थनापूर्वकं माणिक्यवर्णनाभिकन्दसमुत्थितनीलवर्णनाळञ्चातिधवळवर्णाष्टदळहृदयकमलकर्णिकाकारसंस्थितकुण्डलिनीशक्तिरूपबिंद्वात्मके पीठे श्रवणांगुष्ठसंयोगाधिगम्यनादरूपं दीपशिखाकारलिङ्गं विचिन्त्य पीठे वक्ष्यमाणप्रकारेण शक्त्यादिशक्त्यन्तं शिवासनमभ्यर्च्य लिङ्गेशिवमूर्तिं विद्यादेहं चाभ्यर्च्य तत्र परमशिवमावाहनादिक्रमेण ध्यात्वाऽन्तस्संस्कारैरभ्यर्च्य द्वादशान्तस्थितबहुळामृतधारयाभिषिच्य वस्त्राभरणादिभिः वैराग्यचन्दनेनचालंकृत्याहिंसापुष्पं समर्प्य यामित्यादिप्रकारेण अहिंसेंद्रियनिग्रहक्षमादानज्ञानतपस्सत्यभावरूपै रष्टभिः पुष्पैः अभ्यर्चयेत् । ततो मनसि पात्रे प्राणमग्नि महङ्कारधूपशिखांच सङ्कल्प्य धूपं दद्यात् । शिवज्ञानमेव दीपं सङ्कल्प्य दद्यात्।

विषयेभ्यः प्रत्याहृतं मनो नैवेद्यमिति भावयित्वा समर्पयेत् । सुषुम्नामार्गेण प्राणस्य गमागममेव जपत्वेन भावयेत् । पार्थिवादिपञ्चधारणास्थिरीकृत-सदाशिवावयवजातध्यानकल्पितै स्तत्तदवयवोचितैः भूषणैश्चभूषयेत् । शिवोऽहमिति शिवसाम्यभावनारूप मात्मनिवेदनं च कुर्यात् । यद्वा— अभिषेकानन्तरं गन्धशब्दस्पर्शरूपरसतन्मात्राचन्दनपुष्पधूपदीपनैवेद्यान्यात्मना समर्पयेत् । तत्रायं क्रमः—मूलमन्त्रोच्चारणपूर्वकं हां सद्योजाताय शिवाय गन्धतन्मात्रात्मकं चन्दनं समर्पयामि । हीमीशानायशिवाय शब्दतन्मात्रात्मकं पुष्पं समर्पयामि । हूं तत्पुरुषाय शिवाय स्पर्शतन्मात्रात्मकं धूपं समर्पयामि । हूमघोराय शिवाय रूपतन्मात्रात्मकं दीपं समर्पयामि । हिं वामदेवाय शिवाय रसतन्मात्रात्मकं नैवेद्यं समर्पयामीति भावयेत् । ततो हस्तप्रक्षाळनमुखवासदानानन्तरं सत्वरजस्तमोगुणात्मकं तांबूलं समर्पयामीति भावयेत् । ततोनीराजनं परिकल्प्य । बुद्धिस्थवायुना क्लृप्तं दर्पणं मङ्गळानिच । मनोवृत्तिर्विचित्रा ते नृत्तरूपेण कल्पिता ॥ घनयो गीतरूपेण शब्दवाद्यप्रभेदतः । सुषुम्ना ध्वजरूपेण प्राणाद्याश्चामरात्मना ॥ अहङ्कारो गजत्वेन क्लृप्तो देहो रथात्मना । मनः प्रग्रहरूपेण बुद्धिस्सारथिरूपतः ॥ सर्वमन्यन्मया क्लृप्तं तवोपकरणात्मनेति ॥ सर्वमात्मीयं बुद्धिमनःप्राणादिकं शिवपूजोपकरणत्वेन समर्पयेत् । आवरणपूजामपि वक्ष्यमाणरूपां तत्समये कुर्यात् । ततः प्रदक्षिणनमस्कारैरीशानं प्रसादाभिमुखं विधाय तदाज्ञयाऽग्निकार्यं कुर्यात् ॥

अग्निकार्यक्रमः ॥

तत्रायं क्रमः—नाभौ त्रिमेखलं कुण्डं तत्राग्निं च स्वतस्सिद्धं विभाव्य तमग्निमस्त्रमन्त्रेण प्रज्वाल्य तत्राग्नौ किञ्चिदंगारं क्रव्यादांशत्वेन भाव-

यित्वा तन्निर्ऋतिकोणे परित्यज्य कुण्डस्थमग्निं निरीक्षणादिभिस्संशोद्ध्य तस्य शिवाग्नित्वसिद्ध्यर्थं रेचकेण वायुना तं चैतन्यात्मना हृदयं नीत्वा तत्रत्येन ज्ञानाग्निना संयोज्य ततस्सुषुम्नयाद्वादशान्तं नीत्वा तत्र परमशिवेन संयोज्य तत्तेजःपुञ्जपिञ्जरं सूर्यायुतसमप्रभं भावयित्वा तं ज्ञानाग्निरूपं प्रत्यानीय नाभिकुण्डे स्थापयेत् । एवं कृते संस्कारान्तरमनपेक्ष्य शिवाग्निर्भवति । तत्र शिवाग्निं रक्तवर्णं चतुर्वक्त्रं दशभुजं सदाशिवसमानायुधं ध्यात्वा तस्य हृदयकमले आसनमूर्तिविद्यादेहविन्यासपुरस्सरं शिवमावाह्य सुषुम्नास्तुवेण द्वादशान्तस्थितामृतधाराज्यं मूलेनाष्टोत्तरशत मष्टाविंशतिवार मष्टवारं वा हुत्वा शाक्तामृतघृतपरिपूर्णनाभिकन्दकलां हृदयकमलांकितसुषुम्नामन्तस्स्रुचं विभाव्य तया हां शक्तयेवौषडिति पूर्णाहुतिं हुत्वा होमसंतर्पितं शिवं नाडीमार्गेण हृत्पद्मपूजिते शिवेसंयोज्याष्टपुष्पिकयाऽभ्यर्च्य पूजां समापयेत् । तदनन्तरं भ्रूमध्ये सर्वावयवसंपूर्णं शुद्धदीपसमाकृतिंच शिवं सकळनिष्कळरूपेण ध्यात्वा शिवं संपूज्य पूज्यपूजकभावेन द्विधास्थितः शिवोऽहमेवेति मनस्समाधीयतामीति आत्मशुद्धिः॥

स्थानशुद्धिप्रकारः ॥

अथ स्थानशुद्धिः । तत्प्रकारः—हृद्यूर्ध्वमुखौ करौ कृत्वा हः अस्त्राय हुंफडिति ताळत्रयं कृत्वा छोटिकया दशसु दिक्षु विघ्नानुत्सार्यास्त्रमन्त्रेण ज्वलदग्निवर्णं प्राकारं कृत्वा ततोबहिः हैं कवचायनम इति दक्षिणतर्जनीभ्रमणेन परिखात्रयं च कृत्वा हांशक्तये वौषडिति शाश्वतं ज्योतिरूर्ध्वमधश्च विभाव्य महामुद्रां प्रदर्शयेत् ॥ इति विघ्ननिवारणार्थं स्थानशुद्धिः ॥

॥ द्रव्यशुद्धिप्रकारः ॥

अथ द्रव्यशुद्धिः । सर्वाणि वक्ष्यमाणयागोपयोग्यानि द्रव्याणि देव-

स्य वामभागे निवेश्य वस्त्रपूतशुद्धजलपरिपूर्णजलपात्रं च दक्षिणभागेनिवेश्य आत्मार्चनावरणपूजार्थं गन्धपुष्पादिकं शिवार्थद्रव्येभ्यः पृथग्निवेश्य अर्घ्यपाद्याचमनीयजलानि पूरयेत् । चत्वार्यर्घ्याणि ॥ सामान्यार्घ्यं विशेषार्घ्यं निरोधार्घ्यं पराङ्मुखार्घ्यमिति । द्वारपालावरणदेवतादीनां सामान्यार्घ्यं शिवस्यार्घ्यकालेषु विशेषार्घ्यं शिवस्यैव निरोधनसंस्कारसमये निरोधार्घ्यं विसर्जनसमये पराङ्मुखार्घ्यम् । चतुर्णा मेतेषामर्घ्याणां चत्वारि पात्राणि दशपलप्रमाणेनवा पञ्चपलप्रमाणेनवा सार्धद्विपलप्रमाणेनवा यथासम्भवप्रमाणेनवा सुवर्णरजततत्राम्रान्यतमद्रव्येणवा पञ्चपर्वोन्नतानि पञ्चपर्वविवृतानि वृत्ताकाराणि चतुरश्राकाराणिवा बहिरष्टदलपद्मांकितानि एकांगुळिप्रमाणानि अंगुळचतुर्थांशघनानि उक्तप्रकारादर्धप्रमाणानिवा तदर्धप्रमाणानिवा अर्घ्यपात्राणि ग्राह्याणि । (१) पाद्याचमनपञ्चगव्यपञ्चामृतगन्धधूपदीपपात्रघण्टादीन्यपि पूर्वोक्तदशपलादिप्रमाणेनैव कर्तव्यानि । तत्र पाद्यपात्रं षडंगुळविस्तारं चतुरंगुळोत्सेधं चतुरंगुलविस्तारोत्सेधप्रादं चतुरंगुळनासिकं एकांगुळोष्ठं तदर्धमानं तदर्धमानंवा कर्तव्यम् । (आचमनपात्रं) पाद्यक्षेपपात्र मष्टांगुळोत्सेधं षोडशांगुळविस्तारं चतुरंगुळोत्से धमष्टाङ्गुळविस्तारपादयुक्तं एकाङ्गळोष्ठमुक्तप्रकारार्धप्रमाणं तदर्धप्रमाणंवा वृत्तकङ्कणयुक्तपार्श्वद्वयं कर्तव्यम् । आचमनपात्रं द्वादशांगुळोत्सेधं विस्तारकुक्षिकं षडंगुळविस्तारेण षडँगुळोत्सेधेनवा पादेन युक्तं द्वयंगुळव्यंगुळोत्सेधकण्ठं एकांगुळोष्ठं त्र्यंगुळविस्तारमुख मैच्छिकप्रमाणमुकुळाकारवितानसंयुक्तं चतुरंगुळप्रमाणत्रिवक्त्रयवप्रमाणरन्ध्रमूलप्रभृतिक्रमापचितपरिमाणनासिकायुक्तं तदर्धपरिमाणं वा कर्तव्यम् । यद्वा पाद्याचमनीय-

१. सुवर्णाद्यभावे शुक्तिखड्गशृङ्गशिलादारुनाळिकेरकरंकादिनिर्मितानिवानवमृत्पात्ररूपाणि वा पलाशाब्जकदळीदळादिकृतपर्णपुटरूपाणि वा ऽर्घ्यपात्राणि ग्राह्याणीति पुस्तकान्तरेऽधिकं वर्तते ॥

पात्रेअप्यर्घ्यपात्रवदेववृत्तान्तरेकर्तव्ये। आचमनक्षेपपात्रमपिपाद्यक्षेपपात्रवत्कर्तव्यम्। अर्घ्यपाद्याचमनाधारयंत्रिकास्तु त्रिपदीरूपाःत्रिवक्त्रपादसंयुक्ताः अष्टांगुळोत्सधोः पादादूर्द्ध्वभागे वलयस्याधस्तात्सिंहवक्त्रांकिताःकर्तव्याः। सुवर्णाद्यसंभवे पाद्यादिपात्राण्यपि अर्घ्यपात्रवत् शिलादारुमयपत्रपुटादिरूपाणि ग्राह्याणि। तत्र सामान्यार्घ्यद्रव्याणि तिलतण्डुलाः। विशेषार्घ्यस्य एलालवङ्गकर्पूरजातिफलमुरहीहितिलावा जलक्षीरकुशाग्रतण्डुलसुमनस्तिलयवसिद्धार्थावा दर्भदूर्वादिव्रीहितिलक्षीरनीरासिद्धाद्धार्थावायवसिद्धार्थव्यतिरिक्तादर्भादयपड्वा। दर्भसिद्धार्थजलतिलाश्चत्वारो वा दूर्वाकुङ्कमकर्पूरास्त्रयो वा द्रव्याणि। निरोधार्घ्यस्य दर्भदूर्वायवतण्डुलसिद्धार्थाः पञ्चद्रव्याणि। तिलसहिताष्टपराङ्मुखार्घ्यस्य द्रव्याणि। पाद्यस्यदूर्वाचन्दनसिद्धार्थोशीरह्रीबेरकुङ्कुमानि षड्वा। तान्येव कुंकुमं विना पञ्चवा। दूर्वासिद्धार्थचन्दनोशीराणि चत्वारिवा ह्रीबेरचन्दनोशीराणि त्रीणि वा द्रव्याणि। आचमनीयस्य एलालवङ्गकर्पूरजातीकोष्ठतिंबुत्रिफलचन्दनोशीराणिएकादशवाएलालवङ्गकर्पूरातिंबुमुरजातिफलानिषड्वा एलालवङ्गकर्पूरह्रीबेरजातिफलानि पञ्चवा एलालवङ्गकर्पूराणि त्रीणिवा द्रव्याणि। एलादीनि चार्घ्यादिद्रव्याणि प्रत्येकं उत्तममध्यमादिभावेन अशीतिचत्वारिंशद्विंशतिदशपञ्चव्रीहिपरिमितानि देयानि ॥

॥ पाद्यादिपूजा ॥

अथ पाद्यादिपूजाविधानमुच्यते। पाद्याचमनीयसामान्यार्घ्यविशेषार्घ्यनिरोधार्घ्यपराङ्मुखार्घ्यपात्रत्रिपदीर्देवस्यपुरतो वामादिक्रमेण विन्यस्य तासां पादेषु ब्रह्मविष्णुरुद्रान् वलयेष्विडाधारशक्तिं चाभ्यर्च्य पाद्यादिपात्राण्यभ्यमन्त्रेण संक्षाल्य त्रिपदीषु विन्यस्य अस्त्रमन्त्रेण वौषडन्तहृदयमन्त्रेण वा हृतोयेनापूर्य। कवचमन्त्रेण पाद्यादिद्रव्याणि तत्तत्पात्रेषु निक्षिपेत्। द्रव्या-

लभे शुद्धोदकपूरणमात्रंकुर्यात् । ततः पाद्यादिपात्राणि बिंद्वन्तं समुद्धृत्य बिन्दुप्रसृतामृतधारामयेन गङ्गादिसकलतीर्थोदकेनापूर्णानि भावयित्वा यन्त्रकाणामुपरिस्थापयेत्। अथवा बिन्दुस्थानादङ्कुशमुद्रयादिव्यामृतमयं गङ्गादितीर्थमाकृष्य संहारमुद्रया तमादाय वौषडन्तहृदयेनोद्भवमुद्रया यन्त्रकांतस्थेष्वेव पाद्यादिपात्रेषु विनिक्षिपेत् । ततो विशेषार्घ्यजले शिवासनमूर्तिपञ्चब्रह्मविद्यादेहनेत्र मूलाङ्गानि विन्यस्य मूलेन गन्धपुष्पाक्षतै स्संपूज्य ब्रह्माङ्गमूलैरभिमन्त्रयेत् ॥

केवलं वा ब्रह्माङ्गमूलैरभिमन्त्रयेत् । निरोधार्घ्यं ब्रह्मभिः पराङ्मुखार्घ्यमङ्गैस्सामान्यर्घ्यमस्त्रमन्त्रेणाभिमन्त्रयेत् । पाद्याचमनीये ब्रह्मभि रङ्गैरस्त्रेण वा अभिमन्त्रयेत् । ततोऽस्त्रेण दिग्बन्धनं कृत्वा कवचेनावकुण्ठनं कृत्वा वौषडन्तशक्तिमन्त्रेण धेनुमुद्रां प्रदर्श्यामृतीकुर्यात् । पाद्यादिपराङ्मुखार्घ्यपर्यन्तेषु त्रिपदीविन्यासाद्यमृतीकरणान्तं प्रत्येकं काण्डानुसमये न वा कुर्यात् । अथ पराङ्मुखार्घ्यसमीपे शङ्खपूजाकर्तव्या । प्रस्थमानिकाः कुडवजलपूरणीयाश्शङ्खा उत्तममध्यमकनीयांसः तथा मूलाग्रमूलस्थूलाग्रस्थूलाः पुंस्त्रीनपुंसकरूपाःशङ्खार्घ्यमूलेवसुंधरा वलये सूर्यः कुक्षौ विष्णुः पार्श्वे चन्द्रमाः धारायामघोरः मुखेसप्ततीर्थानिच सन्ति । तथापि शङ्खो बहिर्मूलाग्रयोरस्थिवदशुचिरितितयोर्हेमरत्नादिभूषितः कर्तव्यः । एवंभूतं शङ्खंदग्धन्तुपशोधितास्त्रमन्त्रक्षाळितं पूर्ववदर्चितायान्त्रिपाद्यांविन्यस्य विशेषार्घ्यवत्पूजयित्वा आत्मानं शिरसि तत्तोयैस्त्रिवार मभिषिञ्चेत् । एवं बहुपात्रसंपादनतत्पूजनाशक्तौ निरोधार्घ्यपराङ्मुखार्घ्ये निरोधार्घ्यजलेनैव कर्तव्ये । विशेषार्घ्यजलेनैववा अर्घ्यपात्रत्रयमपि कर्तव्यम् । एवं पाद्याचमनीयद्वयमपि विशेषार्घ्येणैव कर्तव्यम् । विशेषार्घ्यस्यापि पात्रान्तराभावे शङ्खजलेनैव पाद्याचमनद्वय मर्घ्यत्रयंच कर्तव्यम् । आवरणदेवताद्यर्थं

सामान्यार्घ्यमात्रं पात्रान्तरे संस्कार्यम् । एवं पात्रसङ्कोचपक्षे यदीयजलेन उपचारान्तरं क्रियते तदीयमेव पात्रमादाय तत्संस्काराः कर्तव्याः । अन्यदीयसंस्कारा अपि वा परिधौ यूपधर्मवदविरुद्धाः कर्तव्याः । अथवा नित्यं त्रिपुवायनोपरागादिषु कर्तव्यम् ॥

॥ पञ्चगव्यविधिः ॥

अथ पञ्चगव्यविधानमुच्यते— देवस्य पूर्वभागे ईशानादिभागे वा द्विहस्तमात्रं हस्तमात्रं वा चतुरश्रं गोमयेनोपलिप्य चतुर्भिः प्राचीनैश्चतुर्भिरुदीचीनैश्च सूत्रैः प्रत्येकं तालप्रमाणानि नवकोष्ठान्युल्लृत्य प्रतिकोष्ठं आढकं तदर्द्धमानान् व्रीहीन् तदर्द्धमानान् तण्डुलान्कुशान्वा प्रसार्य उत्तराभिमुखः प्रतीचीं दिशं पञ्चसंख्यै रुदगग्रैः प्राग्ग्रैश्च दर्भैः परिस्तीर्य पस्तिः पुष्पैरलङ्कृत्य शिवतत्त्वायनमः । सदाशिवतत्त्वाय नमः । विद्यातत्त्वायनमः । पुरुषतत्त्वायनमः । कालतत्त्वायनमः । पृथिवीतत्त्वायनमः । जलतत्त्वाय नमः । वायुतत्त्वायनमः । प्रकृतितत्त्वाय नमः । इति मध्यपूर्वदक्षिणोत्तरपश्चिमाग्नेयनैर्ऋतमारुतैशानकोष्ठानि संपूज्य सौवर्णानि कांस्यानि अभिन्नाकृष्णनवमृन्मयानिवा पात्राणि संक्षाळ्य नवसु कोष्ठेषु संस्थाप्य सुप्रतिष्ठपात्रायनमः । सुशान्तपात्रायनमः । तेजोमयपात्रायनमः । रत्नोदकपात्रायनमः । अमृतपात्रायनमः । अव्यक्तपात्रायनमः । सूर्यपात्राय नमः । संयुक्तपात्राय नमः । अव्यक्तपात्राय नमः इति प्रागुक्तकोष्ठक्रमेण पात्राणिसंपूज्य । ताम्रवर्णायाः क्षीरं त्रिकुडवं मध्यपात्रे शुक्लवर्णायाः दधि द्विकुडवं पूर्वपात्रे कापिलवर्णायाः घृतं कुडवं दक्षिणपात्रे श्यामवर्णायाः गोर्मूत्रं प्रस्थं उत्तरपात्रे, कृष्णवर्णायाः गोमयं कुडवं प्रमाणं पञ्चकुडवजलसंयुक्तं वस्त्रपूतं पश्चिमपात्रे कापित्थफलप्रमाणानितदर्द्धप्रमाणानि तदर्धप्रमाणानिवा तण्डुलामलकहरिद्रापिष्टा न्याग्नेयनैर्ऋतव्यकोणपात्रेषु

कुशोदकं षट्त्रिंशत्पञ्चविंशतिद्वादशच्च तदर्धकृतेन प्रदक्षिणं दर्भं वायव्य परिवीतेन हस्तमानेन तालमानेन वा द्वयङ्गुलग्रन्थिना चतुरङ्गुलाग्रेण कूर्चेन संयुक्त माढिकमानकं गन्धदूर्वायुक्त मैशानकोणपात्रेच हृदयेन प्राक्षिप्य क्षीरादिगोमयान्तानि पञ्चगव्यानि क्रमात्पञ्चचतुस्त्रि द्व्येकसंख्यैरीशानादिमन्त्रैश्शालिपिष्टं हृदयेनामलकं शिरसा हरिद्रां कवचेन कुशोदकं षड्डारावृत्तब्रह्मपञ्चकेनाभिमन्त्रयेत् । तदनन्तरं गोमयं गोमूत्रे तदुभयं घृते तत्त्रयं दधि तच्चतुष्टयं क्षीरेच हृदयमन्त्रेण निक्षिप्य तत्रैव कुशोदकं मूलमन्त्रेण क्षिपेत् ॥ पञ्चब्रह्मषडङ्गैरभिमन्त्र्य अस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य धेनुमुद्रां प्रदर्श्य गन्धपुष्पै रभिपूज्यास्त्रमन्त्रेण धूपदीपौ प्रदर्श्य मूलेनाभिमन्त्रयेत् ॥

पञ्चामृतविधिः ॥

अथ पञ्चामृतविधानमुच्यते—तत्पूजा पञ्चगव्यपूजायाः प्राग्भागे कर्तव्या । तत्र पात्रपूजापर्यन्तं पूर्वमध्यादिपश्चिमान्तेषु क्षीरदधिघृतमधुशर्कराः प्रत्येकं प्रस्थमानाः पादोनप्रस्थमानावा प्रस्थार्द्धमानावाऽऽग्नेयादिकोणेषु यथासंभवं कदळीपनसाम्रफलानीशानकोणे कुशोदकवद्गन्धोदकं तत्तत्स्थानस्थितानां मभिमन्त्रणं पूर्ववत् । शर्करा गोमयवज्जलयुक्ता । संयोजनन्तु नास्ति । अथवा संयोजनयुक्तपञ्चामृतविधानं कुर्यात् । तस्यायं क्रमः—

पूर्ववदुपक्लृप्ते व्रीहिमये स्थण्डिले पूर्वादिदिक्षु मध्येच पञ्च कोष्ठानिशानदिशि अष्टदळपद्मञ्च विलिख्य शिवनियतिकालव्यक्ताव्यक्तसुमङ्गळानामभिःषड्भिर्मध्यादिक्रमेण तानिसंपूज्य तेषु षट्पात्राणि अमृतसोमविद्यारत्नोदक सुधाप्रीत सुरप्रीतनामभिस्संपूज्य पूर्वोक्तक्रमेण मध्यादिपात्रेषु पञ्चामृतानि ऐशानकोणपात्रे नालिकेरोदकञ्च निक्षिप्य तानि पञ्चगव्य-

कुशोदकवदभिमन्त्र्य शर्करादीनि गोमयादिवत् क्रमेण क्षीरे संयोज्य कुशोदकवन्नालिकेरोदकंच संयोजयेत् । ततस्समृद्धं कदलीफलं मूलाभिमन्त्रितं क्षिप्त्वा मूलेन मर्दयेत् । पञ्चगव्यवद्गन्धपुष्पाद्युपचरांश्च कुर्यात् । पञ्चगव्याद्यर्थं मुक्तद्रव्याभावे दधिक्षीरेपरस्परङ्गोमयगोमूत्रेच परस्परं प्रतिनिधिः । शर्कराया इक्षुरसः । पञ्चगव्याद्युक्तपात्रद्रव्यपरिमाणालाभे गोमयमङ्गुष्ठार्धमानं गोमूत्रघृतदधिक्षीरकुशोदकान्येकद्वित्रिपञ्चैकपलानि ग्राह्याणि । पञ्चामृते क्षीरादीनि देवस्य लिङ्गसेका र्हाणिग्राह्याणि । गवामुक्तवर्णानामभावे निर्दोषाया स्सवत्साया रोगगर्भरहिताया गोः क्षीरादीनि ग्राह्याणि । क्षीरं वत्सलालाजलास्पृष्टं दध्यमध्यङ्गोमयमाकाशस्थं घृतं गोमूत्रंच वस्त्रपूतं ग्राह्यम् ॥

॥ स्नपनोदकविधानम् ॥

अथ स्नपनोदकविधानमुच्यते-शुद्धं जलकुम्भमादाय शिवाल्लब्धानुज्ञः प्रशस्तवर्णगन्धरसनदीतटाकं देवखातादिशुद्धतीर्थं गत्वा तज्जलं ब्रह्माङ्गैरभिमन्त्र्यास्त्रसंक्षालितं कुंभं वस्त्रपूतेन तेन हृदयमन्त्रेणापूर्य आहृत्य देवस्य दक्षिणभागे स्थापयित्वा एलोशीरलवङ्गकर्पूर वारिपाटलोत्पल पद्मकरवीरादिवासितं कुर्यात् । इदं पञ्चगव्यपञ्चामृतस्तपनोदकसंविधानं आत्मशुद्धेर्द्वारपालार्चनाच्चप्रागेव कर्तव्यं । स्नपनोदकं सूर्यरहितेकालेनाहर्तव्यं । पुष्पाहरणमपि पूजकेनस्वयमेवकर्तव्यं । अशक्तौ समयालाभे च पुष्पोदकाहरणं गन्धघर्षणनैवेद्यपाकादिवत्स्नातैर्वाशुद्धवस्त्रैः पवित्रपाणिभिःपरिचारकैः करणीयं । छिन्नेपिष्ट इति न्यायसाम्यात् । एवं सकलमपि वक्ष्यमाणोपयोगद्रव्यजातं सन्निधाप्य तस्यशुद्धिं कुर्यात् ॥

॥ द्रव्यशुद्धिः ॥

तत्रायंक्रमः— अङ्गुष्ठानामिकास्पृष्टेन चक्षुषा मूलेन निरीक्ष्यमाणं दक्किरयेच्छात्मकै रर्कवह्निसोमनेत्रैः क्रमात् शुष्कं दग्धममृताप्लावितं च भावयेत् । ततश्शुद्ध्यर्थं मन्त्रमन्त्रेण पताकया प्रोक्ष्य चिच्छक्त्यभिव्यक्त्यर्थं अस्त्रमन्त्रेणैव मध्यमांगुळ्या ताडयेत् । ततोवौषडन्तकवचेन तत्सर्वं विशेषार्घ्यजलेन शङ्खजलेन वा कुशपुष्पै रभ्युक्षन् ताडितात्पाषाणा द्वह्निस्फुलिङ्गादित्वद्रव्यजाता चिदग्निस्फुलिङ्गाना मुद्गतिं ध्यायेत् । एवं निरीक्षणादिसंस्कारचतुष्टयेन द्रव्यजात मशुद्धेन मायारूपेण परित्यक्तं शुद्धचिच्छक्त्यात्मकं शिवयोग्यतार्हंभवति । ततस्सद्योजातेन गन्धं वामदेवेन वस्त्रं अघोरेणाभरणं तत्पुरुषेण नैवेद्यं मीशानेन पुष्पं हृदयमन्त्रेणान्यानि शिवार्थद्रव्याणि आवरणपूजाद्यर्थद्रव्याणि चाभिमन्त्रयेत् । ततस्सर्वं द्रव्यजात मस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य वौषडन्तशक्तिमन्त्रेण धेनुमुद्रया ऽमृतीकृत्य शिवार्थं कल्पित मेतत्सर्वं शिवात्मकमेवेति भावयन् गन्धपुष्पधूपदीपैः हृदयास्त्रमन्त्राभ्यां पूजयेत् । ततस्स्वशरीरस्यार्घ्यजलबिन्दुमस्त्रेण निक्षिप्य स्वासने शिवासनायनम इति पुष्पन्दत्वा स्वदेहे शिवमूर्तिं विन्यस्य फाले चन्दनतिलकं कृत्वा । स्वशिरसि पुष्पं स्वाहान्तमूलेन स्वशिरस्येवार्घ्यंच दद्यात्(१)इत्यमात्मनि पशुबुद्धिं त्यक्त्वाशिववन्निर्मलज्ञानक्रियश्शुद्धोऽहमिति भावयन्नेवात्मानं पूजयेत् । इति द्रव्यशुद्धिः ॥ यद्यप्यात्मशुद्धिः प्रागभिहिता । तथाऽपि पूजाकर्तृकतया द्रव्यान्तरवत्पूजोपकरणत्वेन प्रविष्टस्य तस्य द्रव्यान्तरवदेव गन्धादिभिः पूजयेदिति तदन्तद्रव्यशुद्धिः ॥

---

१. मूलमन्त्रं दशवारं जपेदित्यधिकं पुस्तकान्तरे वर्तते ॥

॥ मन्त्रशुद्धिप्रकारः ॥

अथ मन्त्राणां दन्ततालव्योष्ठव्यापारजन्यमायिकाशुचिरूपनिर्हरणार्थं ऐश्वर्याधिक्यारि मलतिरोहितफलप्रदानसामर्थ्यादिनां तेषां सामर्थ्योन्मील-नार्थंच शुद्धिः कर्तव्या । तत्प्रकार उच्यते– हृद्यञ्जलिं बद्ध्वा बिन्दून्तब्रह्मर-न्ध्रान्ताशिखान्तं ह्रस्वदीर्घप्लुतप्रणवादिनमोन्ततया क्रमेण त्रिवारं शनैर्मूल-मन्त्रोच्चारणं कुर्यात् । ततो ब्रह्माङ्गादीनामपि तथैवोच्चारणं कुर्यात् । इत्थं मन्त्रशुद्धिविधाय तदनन्तरं परिवारदेवतासद्भावे तदर्चनं कुर्यात् । कथं परिवारदेवतासद्भावः सशक्तिकेवलपूजने । इत्थं सूक्ष्मोक्तानि शुद्धकेवल-मिश्राख्यान्यशक्तिकसशक्तिकसौरादिचण्डान्तशिवपूजन मंशुमदुक्तेन केवल-सहजमिश्रभेदेन प्रत्येकं त्रिविधानि । अंशुमति केवलं नामपरिवारदेवतार-हितलिङ्गपूजनम् । सहजन्नाम वृषभगणेशस्कन्दपार्वतीरूपपरिवारचतुष्टयस-हितलिङ्गपूजनम् । मिश्रंनाम महेश्वरनृत्तमूर्ति दक्षिणामूर्त्यादिभिरपि स-हितस्य लिङ्गस्य पूजनम् । एवं केवलशुद्धं सहजशुद्धं मिश्रशुद्धं केवलकेवलं सहजकेवलं मिश्रकेवलं केवलमिश्रं सहजमिश्रं मिश्रमिश्रं चेति नवावि-धानि पूजनानि भवन्ति । तत्र शिवपूजारम्भात्प्राक् सूर्यपूजां तदनन्तरं च-ण्डपूजां च विधाय लिङ्गे शक्तिं विना केवलं शिवमावाह्य परिवारदेवतार-हितस्य तस्य पूजनं केवलशुद्धम् । परिवारचतुष्टयसाहित्येन प्रागुक्तपूजनं सहजशुद्धम् महेश्वरादिभिरपि सह प्रागुक्तपूजनं मिश्रशुद्धं । आद्यन्तयो-स्सूर्यादि चण्डपूजां विहाय लिङ्गे सशक्तिकं शिवमावाह्य परिवारार्चनं विना तत्पूजनं केवलकेवलम्। उक्तपूजनमेव परिवार चतुष्टयार्चनसहितं सहजके-वलम् । महेश्वराद्यर्चासहितं मिश्रकेवलम् । आद्यन्तयोस्सूर्यचण्डपूजा-सहितं सशक्तिकस्याशक्तिकस्यवा परिवारदेवतारहितस्य लिङ्गे पूजनं केवल-

मिश्रम् । देवपरिवारचतुष्टयार्चनसहितं सहजमिश्रम् । महेश्वराद्यर्चादिभिरपि सहितं मिश्रमिश्रमिति । एवञ्च केवलकेवले परिवाराभावेऽपि सहजकेवले मिश्रकेवलेच परिवारसद्भावात् मन्त्रशुद्ध्यनन्तरं केवले परिवारार्चनकथनं युक्तमेव । तत्र वृषभं देवस्य पूर्वभागे पश्चिमाभिमुखमर्चयेत् । गणेशकुमारपार्वतीः पूर्वाभिमुखतया दक्षिणपश्चिमोत्तरदिक्ष्वर्चयेत् । पार्वत्या दुर्गारूपतयाऽर्चनेदक्षिणाभिमुखत्वेनार्चयेत् । पौराणिकास्तु सूर्यगणेशविष्णुदुर्गारूपं परिवारदेवताचतुष्टयमाहुः । वृषभादिचतुष्टयेऽप्यारोग्यादिफलकामनायां परिवारदेवतामध्ये सूर्यादिपूजनमपि कर्तव्यमेव । वृषभस्य वामभागे सूर्यः देवस्य दक्षिणभागे दक्षिणामूर्तिः पश्चिमेस्कन्दस्य वामे विष्णुः उत्तरभागेदेव्याः प्राग्भागे नृत्तमूर्तिः । एवमन्येषामपि कामन्याऽर्चनीयाना मागमोक्तानि स्थानानि द्रष्टव्यानि ॥

॥ लिङ्गशुद्धिः ॥

अथ लिङ्गशुद्धिः—गर्भगृहे स्थितं देवस्य पेटक मुद्घाट्यतदग्रे स्थितं चतुर्भुजं त्रिणेत्रं वराभयच्छत्रचामरकरं भीमरुद्रमभ्यर्च्य । निशाचरान्तकृद्देव देवस्य यजनार्थकम् । शुद्धद्वारस्य सव्येतु गच्छखं हि प्रसीदमे ॥ इति संप्रार्थ्य पेटकमध्ये स्थितं देवं 'ओं नमोदेवदेवेशसर्वलोकैकनायक । उत्तिष्ठस्नानकर्मार्थं मात्मरक्षार्थमेवचे'ति संप्रार्थ्य लिङ्गं हस्ताभ्यां संगृह्य वस्त्रं विसृज्य प्रागेव पडुत्थासनेनार्चितायां स्नानेद्यां सुवर्णरजतकांस्यत्रपुसीसक्षीरवृक्षान्यतमनिर्मितायां उपानपद्मजगतीकंपकण्टकं पजगतीपद्मवाजिनयुक्तायां वृत्ताकारायां मध्योन्नताया मुपरिप्रसारितवस्त्रायां विन्यस्य लिङ्गे पूर्वेद्युरर्चितां पूजां हृदयमन्त्रेण संपूज्य शिरसीशानक्रमेण स्वाहान्तमूलेन सामान्यार्घ्यजलेनार्घ्यन्दत्वा धूपदीपौ प्रदर्श्य अंगुष्ठादिकनिष्ठान्तैःईशानादिपञ्चकं विन्यस्य कनिष्ठिकानामिकामध्ये पुष्पं संगृह्य अंगुष्ठतर्जनीभ्यां

लिङ्गमस्तकात्पूजां हृदयेनावरोप्य तत्पुष्पं लिङ्गमूर्ध्नि विन्यस्य निर्माल्य मी-शानदिशि हृदयेनशुद्धपात्रेनिधाय अस्त्रेणलिङ्गं पाशुपतास्त्रेण पीठं प्रक्षाल्य सामान्यार्घ्यजलेन स्वाहान्तं हृदाऽभिषिञ्चेत् । एवं कृते पूर्वपूजासमाप्तौ लिङ्गपीठविन्यस्तमन्त्रोपसंहारानन्तरं लिङ्गपीठयोरासक्ताः पूजकस्य भुक्ति-मुक्तिप्रतिबन्धकविघ्ना निरस्ता भवन्ति । लिङ्गञ्च हृदयाम्बुस्नपनेन शुद्धं पुनः मन्त्रविन्यासयोग्यं भवति । इति लिङ्गशुद्धिः ॥

ततश्शिवशक्तिभ्यां नम इति लिङ्गमुद्रां प्रदर्श्य आसनमूर्तिमूलै रष्ट-पुष्पिकयावा संपूज्य धूपदीपौ प्रदर्श्य सुवर्णरजताताम्रमयशंखशुक्तिगोशृ-ङ्गान्यतमपात्रेण चतुरंगुळदीर्घया गोशृङ्गाग्रप्रमाणया धारयाऽभिषिञ्च. ह-स्तयन्त्रोद्भवतैलेन गोघृतेनवाऽभ्यज्य पिष्टचूर्णादिभिर्विरूक्ष्यकोष्णतोयेनाभि-षिञ्च शिरसि पुष्पमारोप्य पञ्चगव्य प्रत्येक पञ्चामृतफलरससंयुक्तपञ्चामृतै रन्तरान्तराशिरश्शिखानेत्रैः पुष्पधूपदीपसमर्पणपूर्वक मस्त्रमन्त्रेण घण्टां ताडयन्नभिषिञ्चेत् । एवं फलोदकादिभिस्सिञ्चेत् । तत्र फलोदकं नाम सुगन्धिजलं बिल्वकपनसनारिकेळखण्ड सलग्दाडिमीबीजपूरपुन्नागलि-कुचनारङ्गचूतकदळीफलोपेतमुदकम् । यवनीवारव्रीहिमुद्गसिद्धार्थ सौ-गन्धिकहेमशालिबीजसहितमुदकं बीजोदकं । तेनाभिषिञ्च मूलबीजेन गन्ध-पुष्पधूपदीपैरर्चयेत् । स्फटिकमुक्ताफलमाणिक्यविद्रुमगोमेदकपुष्यराग गा-रुडेन्द्रनीलसहितमुदकं रत्नोदकं । तेनाभिषिञ्च वर्णमन्त्रेण गन्धादि-भिरर्चयेत् । चन्दनागरुकस्तूरी कुंकुमकर्पूरमनाश्शिलैलाकुष्ठतक्कोललवङ्गो-शीरचम्पकमुकुळचूर्णसहितमुदकं गन्धोदकं । तेनाभिषिञ्च गन्धपुष्पधूप-दीपनैवेद्यानि नाममन्त्रेण समर्पयेत् । चम्पकमल्लिकाकेतकीपाटलकुन्द-पुन्नागनन्द्यावर्तजातीमन्दारकरवीरपद्मोत्पलगिरिपुष्पयुक्तं ह्रीबेरदमनकादि-मिश्रितमुदकं पुष्पोदकं । तेनाभिषिञ्च शिवमन्त्रेण गन्धपुष्पधूपदीपं दद्यात् । ततो नाममन्त्र समुच्चरन्शुद्धेनाम्बुना शनैश्शनैरभिषिञ्च तदम्बुलिङ्गमभितास्थितं

लिङ्गाकृतिं कृत्वा गन्धपुष्पधूपदीपपायसांश्च तांबूलादिचदत्वा तदग्नं प्रक्षाळ्यलिङ्गमूर्ध्नि मूलबीजं न्यस्य गन्धपुष्पधूपदीपं दत्वा ब्रह्ममन्त्रैरालभ्य धेनुमुद्रां बध्नीयात् । इदमन्नाभिषेचनमपमृत्युनिवारकम् । अयमायुरारोग्यराजराष्ट्राभिवृद्धिदंसकलवशीकरणं सर्वशांतिकरं च । ततो जलार्चनं च कुर्यात्। निरीक्षणादिसंस्कृतेन शुद्धजलेन हेमरजतताम्रयज्ञवृक्षजान्यतमपात्रं प्रपूर्य तन्मध्ये लिङ्गं संस्थाप्य दूर्वातिलाक्षतान्दत्वा गन्धपुष्पधूपदीपैरर्चयेत् । इदं जलार्चनं । ततस्समुद्धृत्य संमृज्य पूर्ववत् स्नाननैवेद्यं विन्यस्य नालिकेरेक्षुरसादिभिरपि यथासंभवमभिषिञ्चेत् । शिवस्य घृताभ्यङ्गेन वर्षकोटिसहस्रार्जितं पापं नश्याति । मासं घृताभिषेकेण त्रिसप्तकुलोपेतस्य शिवपदप्राप्तिर्भवति । करयन्त्रोद्भवतिलतैलाभिषेकेण शिवपदप्राप्तिर्भवति । क्षीराभिषेकेणायुतसाल्ङ्कारगोदानफलप्राप्तिर्भवाति । दधिस्नपनेन सर्वपापक्षयपूर्वकं शिवलोकप्राप्तिर्भवति । मधुस्नपनेन सर्वपापक्षयपूर्वकं वह्निलोकप्राप्तिर्भवति । इक्षुरसस्नपनेन विद्याधरलोकप्राप्तिर्भवति। कर्पूरागरुतोयेन शिवपदप्राप्तिः । गन्धचन्दनतोयेन गन्धर्वलोकस्य पुष्पोदकेन सूर्यलोकस्य हैमोदकेन कुबेरलोकस्य रत्नोदकेन इन्द्रलोकस्य कुशोदकेन ब्रह्मलोकस्य प्राप्तिरित्यादि द्रष्टव्यम् । तत्र द्रव्यालाभे वस्त्रपूतेन शुद्धेन तोयेनाभिषिंचेत् । तेनापि सर्वकामसमृद्धवरुणलोकप्राप्तिरुक्ता ॥

ततोधाराभिषेचनं कुर्यात् । तच्चात्मार्थपूजायां द्वादशांगुळविस्तारमेकांगुळोत्सेधं यवत्रयघनमुत्तमम् । सप्तांगुळविस्तारमर्धांगुळोत्सेधं यवद्वयमात्रघनं मध्यमं। पञ्चांगुळविस्तारं पादांगुळोत्सेधं यवमात्रघनमधमं। तत्सुवर्णेन रजतेन ताम्रेण वा चतुरश्रं वृत्तं वा कर्तव्यं । चतुरश्रं चेन्नवकोष्टानि विलिख्य मध्यकोष्टस्य मध्ये रन्ध्रमेकं परितोष्टौ मद्ध्यकोष्टस्यैव रेखायां महादिक्षु चत्वारि पूर्वादिकोष्टेषु प्रत्येकं द्वादशरन्ध्राणि चेत्येव मुत्तमपात्रस्यै-

काधिकान्यष्टोत्तरशतं रन्ध्राणि कुर्यात् । मद्ध्यकोष्ठस्यमद्ध्यरन्ध्रमेकं परितो वाष्टौ पूर्वादिकोष्ठेषु त्रीणित्रीणि रन्ध्राणीत्येवं मद्ध्यमपात्रस्य पञ्चविंशति-रन्ध्राणि कुर्यात् । वृत्तं चेदष्टदळपद्मं विलिख्य कर्णिकाया मद्ध्ये परितश्च नवरन्ध्राणि प्रतिदळं द्वादशरन्ध्राणि दळेभ्यो बर्हिर्वृत्ते महादिक्षु चत्वा-रिचोत्तमपात्रस्य कुर्यात् । इतरपात्रयोरष्टदळपद्मे चतुरश्रवत् द्रव्याणि द्र-ष्टव्यानि । एवंभूतं पात्रं देवस्योपरि हस्तधृतं कृत्वा शङ्खजलेनापूर्य हस्ता-भ्यां धारयन् मूलेन धाराभिरभिषिंचेत् । एवमभिषेकार्थानिप्राक्संस्कृत-पञ्चगव्यादिव्यतिरिक्तानि तैलादीन्यस्त्रेणसंप्रोक्ष्यकवचेनावकुण्ड्यास्त्रेण सं-रक्ष्य हृदयबीजेनाभिषेचने विनियोजयेत् । एवं प्रपञ्चेनाभिषेकं कर्तुमश-क्तश्शुद्धजलेनाभिषेचयेत् । ततो मूलेन मन्त्रपुष्पं दत्वा मन्त्रान्नं निवेद्य शुद्धमृदुवाससा शनैस्संमृज्य पद्मपीठे स्थापयेत् । तत उत्थाय शिवंप्रदक्षिणी-कृत्य निर्ऋतिकोणस्थितवास्त्वधिपति ब्रह्मस्थानादुत्तररूपं शिवमन्दिरस्य वायुकोणं गत्वा तत्र श्यामवर्णं दन्ताक्षसूत्रपाशांकुशान्करैः पुष्करेण बी-जपूरञ्च धारयन्तं दक्षिणाभिमुखमुपविष्टं गणपतिमावाहनादिसर्वोपचारै-स्संपूज्य ॥ (श्लो) शिवार्चनं गणेशान निर्विघ्नं कुरुमेसदेति प्रार्थयेत् । ततः प्राग्भागे शिवखेटकस्योत्तरादिशारूपे श्रीफलकमलाभयधारिणीं त्रिणेत्रां शि-वशक्तिरूपां दक्षिणाभिमुखीमुपविष्टां महालक्ष्मीं तथैव संपूज्य 'मातश्शिवा-र्चनद्रव्यसमृद्धिं कुरुमेसदे'ति प्रार्थयेत् । ततः प्राग्भागे शिवमन्दिरस्येशान-कोणरूपे सदाशिवानन्तश्रीकण्ठांबिकागुहविष्णुधातृरूपान् प्रसन्नवदनान्यो-गपट्टधरान्व्याख्यामुद्राक्षसूत्रविराजितकरद्वयान् गौरवर्णान्दक्षिणामुखमुप-विष्टान्सप्तगुरून्वा 'शिवादिस्वरूपगुरुपर्यन्तान्सर्वान्गुरून्वा तथैव सर्वोपचा-रैस्संपूज्य 'शिवादिगुरवो मह्य मनुज्ञां दातुमर्हथ । शिवार्चनं करिष्येहं युष्मद्दर्शितमार्गतः' इति प्रार्थयेत् ॥ गुरुस्थाने श्रीगुरुपादुकाभ्यां नम

इति पादुकेत्वा पूजयित्वा गणपतिमहालक्ष्मीगुरुपादुकानां पूजानन्तरं सर्वान्प्रणम्य क्षितितलनिहितनिश्चलजानुः बद्धांजलिः 'गणनाथांबिके स्वामिपादुके मां जगद्गुरो। यजन्तमनुजानीत यथासंपन्नकारक'मिति युगपत्प्रार्थयेत्। अथ तेभ्यस्सकाशात्पुत्र शिवं यजस्वेति अनुज्ञालाभं भावयित्वा देवस्याग्नेयकोणे दक्षिणभागेवा रुचिरासने स्थितः प्रत्येकं दशमात्रैः पूरककुंभकरेचकैस्सहितं प्राणायामत्रयं कृत्वा स्वेष्टफलाभिसन्धिपूर्वकं यथाशक्ति शिवार्चनं करिष्ये इति सङ्कल्प्य पूजामारभेत ॥

तत्र प्रथमं (१)शिवार्चनं। तच्चकन्दनालग्रन्थिदलकेसरकर्णिकाविभक्तकमलरूपं क्षित्यादिशुद्धविद्यान्तद्वात्रिंशत्तत्वपर्यन्तोच्छ्रायं उपरिस्थितयामूर्त्यासह निवृत्यादिशांतिकलापर्यन्तोच्छ्रायं। तदुपरिशान्त्यतीतकलाप्रमाणोविद्यादेहः। तत्स्वरूपपरिज्ञानार्थं निवृत्यादिकलाप्रमाणं तदन्तर्गततत्तत्स्वरूपञ्चविविच्यते। निवृत्यादिकलाशतकोटियोजनप्रमाणब्रह्माण्डरूपात्तत्रैकं पृथिवीतत्वं।तदुपरि सहस्रकोटियोजनप्रमाणा प्रतिष्ठाकला। तत्र जलादिभूतचतुष्टयगन्धादितन्मात्रपञ्चककर्मेन्द्रियपञ्चकज्ञानेन्द्रियपञ्चकमनोहङ्कारबुद्धिप्रकृतिरूपाणि त्रयोविंशतितत्त्वानि। तदुपरि अयुतकोटियोजनप्रमाणाविद्याकला। तत्र पुरुषरागनियति कलाविद्याकालमायारूपाणि सप्ततत्त्वानि। तदुपरि लक्षकोटियोजनप्रमाणाशान्तिकला। तत्र शुद्धविद्यामहेश्वरश्चेति द्वेतत्वे। तदुपरि दशलक्षकोटियोजनप्रमाणाशान्त्यतीतकला। तत्र सदाशिवश्शक्तिश्चेति द्वेतत्वे।तदुपरि अप्रमेयं शिवतत्त्वं निवृत्तिकलात्मकं प्रथिवीतत्त्वं यावत्कन्दं प्रतिष्ठाकलाविद्याकलान्तर्गतानि जलादिकालान्तान्येकोनत्रिंशत्तत्त्वानि यावन्नाळः। जलादिकालान्ततत्त्वेषु स्थितानि पञ्चसप्ततिभुवनानि कण्टकाः। तत्तद्भुवनान्तर्गतप्राणिनां बुद्धिधर्माः पञ्चाशत्भुवननाळान्तर्गतसूत्राणि। विद्याक-

(१) शिवासनार्चनमिति पाठभेदः।

कायामेव कालस्योपरि स्थितं मायातत्त्वं पद्मनाळग्रन्थिः।शान्तिकलायां स्थितं शुद्धविद्यातत्त्वदळकेसरकर्णिकात्मकं पद्मं। शुद्धविद्याया उपरि स्थितं महेश्वरतत्त्वं यावत् शिवस्य सूक्ष्ममूर्तिः। शान्त्यतीतकलायां स्थितं सदाशिवशक्तितत्त्वद्वयं यावद्विद्यादेहः। नाळे स्थितानि भुवनानि च जलानलवायुगगनाहङ्कारबुद्धिप्रकृतिषु प्रत्येकमष्टावष्टौ भुवनानीति षट्पञ्चाशत् पुरुषे षट् रागे पञ्च नियतौ द्वे कलायां द्वे विद्यायांद्वे काले द्वे इति पुरुषादिकालान्तेषु भुवनानि एकोनविंशतिरित्येवं पञ्च सप्ततिभुवनानि कण्टकाः। तमोमोहमहामोहतामिस्रान्धतामिस्ररूपाः पञ्चविपर्ययाः । ऊहश्शब्दोध्ययनं दुःखत्रयविघातस्सुहृत्प्राप्तिर्दानं चेत्यष्टौसिद्धयः । आध्यात्मिकाः प्रकृत्युपादानकालभागाख्याश्च । तिस्रो विषयाः परमकृताबाह्याः पञ्चेति नवच तुष्टयः अन्धत्वमूकत्वादय एकादशेन्द्रियविधाः अनूहादयस्सप्तदशप्रागुक्तसिद्धिबुद्धिविधाश्चेत्यष्टाविंशतिशक्तयः इति पञ्चाशद्भावाः नाळसूत्राणि। अत्र कन्दनाळादियोजनप्रमाणसमये मतान्तरं प्रदर्श्यते । निवृत्तिकलात्मकं पृथिवीतत्त्वं पूर्ववच्छतकोटियोजनमेव । पृथिवीतत्त्वादशगुणं जलं, जलतत्त्वादशगुणोवह्निः, वह्नितत्त्वादशगुणो वायु', वायोर्दशगुणं व्योम, ततोदशगुणोऽहङ्कारः, अहङ्कारादशगुणा बुद्धिः, बुद्धे र्दशगुणं गुणतत्त्वम्। एवं गुणतत्त्वपर्यन्तं दशांसख्ययावृद्धिः । अतः परं मायातत्त्वपर्यन्तं शतसङ्ख्यया वृद्धिः। गुणतत्त्वाच्छतगुणा प्रकृतिः। प्रकृतेश्शतगुणोरागः। रागाच्छतगुणा नियतिः । नियतेश्शतगुणा विद्या । ततश्शतगुणा कला। ततश्शतगुणः कालः। ततश्शतगुणा माया। शुद्धविद्येश्वर सदाशिवानां सहस्रसङ्ख्ययावृद्धिः। मायायास्सहस्रगुणा शुद्धविद्या। शुद्धविद्यायास्सहस्रगुण ईश्वरः। ईश्वरात् सहस्रगुणस्सदाशिव इति । ततो लक्षसङ्ख्ययावृद्धिः। सदाशिवतत्त्वाल्लक्षगुणा शक्तिरिति। ततश्शिवतत्त्वमप्रमेयम्। इदं च मतं प्रकृतेः पूर्वं गुणतत्त्वमङ्गीकृत्य प्रकृतेरनन्तरं पुरुषतत्त्वम-

नङ्गीकृत्य च प्रवृत्तम् । तथाचाहुः— (श्लो) 'क्ष्मातत्वं शतकोटियोजन मपः प्रारभ्य गौणान्तकं पङ्क्त्या तद्गणनात्तथा प्रकृतितो मायावसानं शतात् । साहस्राच्च सदाशिवावधि ततश्शक्त्यन्तकं लक्षत स्तस्योर्द्ध्वं सशिवोऽप्यमेयविभवो बिन्दोरधिष्ठायकः' इति ॥ एवंसति नाळः कियद्योजनसंख्यो जात इति चेत् असंख्ययोजन एव । तथाऽपि किञ्चित्प्रकारमारोप्य योजनसङ्ख्या प्रदर्श्यते—एकत्वमारभ्य उत्तरोत्तरं दशगुणवृद्धौ क्रियमाणायां विंशतितमं स्थानं परार्धसङ्ख्या । स सर्वान्तिमसङ्ख्या । विंशतेश्च स्थानाना मेतानि नामानि । एकं दश शतं सहस्र मयुतं लक्षं प्रयुतं कोटि र्बुदं पद्मं खर्वं निखर्वं बृन्दं महापद्मं शङ्खो महाशङ्ख स्समुद्रो महासमुद्रो मध्यं परार्द्ध इति ॥ तथाचाहुः— 'एकं पङ्क्तिशते सहस्रमयुतं लक्षं प्रपूर्वायुतं कोटिश्चार्बुदकंच पद्मक मथो खर्वं निखर्वं तथा । बृन्दं चैव महासरोज मपर श्शंख स्समुद्रोऽन्तिमो मध्यं चैव परार्धसंज्ञक मिमां सङ्ख्यां विदुः पण्डिताः' इति ॥ एवञ्च शतकोटिसङ्ख्या मेकत्वस्थाने निवेश्य जलतत्वादीनां सङ्ख्याक्रियते । शतकोटिर्नाम पद्मसङ्ख्या । ततश्च पद्मयोजनं पृथिवीतत्वम् । एकयोजनं जलतत्वं, दशयोजनं तेजस्तत्वं, शतयोजनं वायुतत्वं, सहस्रयोजनं गगनतत्वं, अयुतयोजनमहङ्कारतत्वं, लक्षयोजना बुद्धिः, प्रयुतयोजनं गुणतत्वं, कोटियोजनं ततः परं शतसंख्यया वर्द्धनीयत्वात् एकान्तरितसंख्याग्राह्या । यथा— प्रकृतिः पद्मयोजना, रागो निखर्वयोजनः, नियतिर्महापद्मयोजना, विद्या महाशङ्खयोजना, कला समुद्रयोजना, कालः परार्धयोजन इति । एवञ्च जलादिकालान्ततत्वसमुदायरूपो नाळो दशशत सहस्रायुत लक्षप्रयुत कोटिपद्म निखर्वमहापद्म महाशङ्खमहासमुद्रपरार्धाख्यत्रयोदशसङ्ख्यासमुदायसङ्ख्येययोजनापरिमितोभवति । पद्मसङ्ख्याया मेकतत्वरूपता मनारोप्य परार्धाधिके सङ्ख्यासद्भाव मारोप्य गणनेतु नाळः खर्व निखर्व बृन्द महापद्म शङ्ख महाशङ्ख समुद्रमध्य-

दशगुणितपरार्ध सहस्रगुणितपरार्ध लक्षगुणितपरार्ध कोटिगुणितपरार्धरूप-त्रयोदशसङ्ख्यासमुदायसङ्ख्येययोजनोच्छ्रायो भवति । नाळान्तर्गतानामपि भुवनाना माधारणं गन्धादिपञ्चक कर्मेन्द्रियपञ्चक ज्ञानेन्द्रियपञ्चकमनसां पृथग्योजनसङ्ख्या नास्तीति मताश्रयाणां तेषु योजनसङ्ख्या नगणिता । अथ तेषामपि (भुवनाधारतया) पृथग्योजनसङ्ख्यामाश्रित्य मतान्तरं प्रदर्श्यते ॥

पद्मयोजनपरिमाणात् भूतत्वाज्जलादिमनोन्तानां विंशतेस्तत्त्वाना मुत्तरोत्तरं दशगुणा वृद्धिः । अहङ्कारबुद्ध्योश्शतगुणा । प्रकृतेस्सहस्रगुणा । पुरुषस्यायुतगुणा । नियतिकालयोर्लक्षगुणा । रागविद्याकलानां दशलक्षगुणा । मायायाः कोटिगुणा । शुद्धविद्यायाः दशकोटिगुणा । ईश्वरस्य शतकोटिगुणा । सदाशिवस्य सहस्रकोटिगुणा । शक्तेरयुतकोटिगुणा । शिवतत्वस्य नास्ति योजनसङ्ख्या इति । पुरुषमायामध्यवर्तितत्वानां पञ्चानामूर्ध्वाधरभावे क्रमभेदमाश्रित्येदं मतान्तरं प्रवृत्तम् । अस्मिन्मते क्षित्यादिमनोंतानि एकविंशतितत्वान्युत्तरोत्तरं दशगुणवृद्ध्या क्रमा देकदशशत सहस्रायुत लक्ष प्रयुतकोट्यर्बुद पद्मखर्व निखर्व बृन्दमहापद्मशंखमहाशङ्ख समुद्र महासमुद्र मद्ध्य परार्ध दशपरार्ध योजनानि । अहङ्कारबुद्धी शतगुणवृध्या क्रमात् सहस्रगुणित लक्षगुणित परार्धयोजने। प्रकृतिस्सहस्रगुणवृद्ध्याऽर्बुदगुणितपरार्धयोजना । पुरुषस्ततोऽयुतगुणवृद्ध्याबृन्दगुणितपरार्धयोजनः । नियतिकालौ लक्षगुणवृद्ध्या क्रमात् महासमुद्रगुणितसहस्र परार्धगुणितपरार्धयोजनौ । रागविद्याकलास्तु दशलक्षगुणवृद्ध्या क्रमात् पद्मपरार्धगुणितमहाशंख परार्धगुणितशत परार्धहतपरार्धगुणित परार्धयोजनाः । एवंचास्मिन्पक्षे जलादि कलांत तत्वसमुदायरूपो नाळो दशादिशतपरार्धहत परार्धगुणितपरार्धपर्यन्तकोनत्रिंशत्संख्या-

समुदाय संख्येय योजनापरिमितो भवति । अस्मिन्तत्ववृद्ध्याश्रयणेनप्रवृत्ते पक्षद्वयेऽपि नाळात् ग्रन्थेः पद्मस्य चातिदैर्घ्यं स्यात् । तथाहि— अत्र प्रथमपक्षे तावत् नाळान्तर्गतेषु तत्वेषु कालएकः परार्धयोजनः । कला तच्छतांशपरिमितैव । विद्यानियतिपूर्वकपूर्वतत्वानि तच्छतांशपरिमितानीति नाळः किञ्चिदधिकैकपरार्धयोजनः । मायारूपोग्रन्थिस्तु शतगुणितपरार्धयोजनः । कालाच्छतगुणत्वान्मायायाः पद्मं लक्षगुणितपरार्धयोजनम् । पद्मरूपायाश्शुद्धविद्याया मायापेक्षया सहस्रगुणितत्वा दित्थं पक्षान्तरेऽपि ग्रन्थिपद्मयोजनदैर्घ्यं स्यात्। एवं कन्दप्रभृति नाळापेक्षयाग्रन्थेः पद्मस्यच दैर्घ्यं न लौकिकपद्मच्छायानुकारि नवनाभिकन्दादिहृत्प्रदेशांतर्हृत्पद्मच्छायानुकारि । अतः कलावृद्धिपक्षाश्रयणमेव शिवासनपद्मभावनाया मनुकूलम् । इदञ्च कमलं अनन्तासन सिंहासन योगासन पद्मासन विमलासनरूप पञ्चासनगर्भम् । तत्रपृथिवीतत्वपरिमितकन्द एवाधारशक्तिः । जलादि कालान्त तत्वपरिमितो नाळ एव तदुपरिस्थितपद्ममुकुळसहितस्सन् आधारशक्तिरूप क्षीरोदसमुत्थितफणामणिमण्डलसहित भुजङ्गमाकृतिशालि विद्येश्वराष्टकान्तर्गतानन्तरुद्रैतदुभय मनन्तासनमुच्यते । नाळाद्यवधि जलतत्वप्रभृति गुणतत्वपर्यन्तं नाळं परितःस्थितं सिंहासनम् । तत उपरि ग्रन्थिपर्यन्तं योगासनम् । तदुपरि दळकेसररूपं पद्मासनम्। कर्णिकैव विमलासनम् । कर्णिकोपरिस्थितगुणत्रय मण्डलत्रयतत्वत्रयात्मकं वा । यद्यप्यनन्तः सहस्रफणामण्डितः सर्पत्वेनोक्त इति तस्य भोगदण्ड एवोर्द्ध्वाकारस्थितो नाळः, सङ्कुचितं तत्फणामण्डलमेवात्र मुकुळं,नतु तद्व्यतिरेकेण पद्ममस्ति, तथाऽपि तदेव विकासध्यानदशाया मष्टदळपद्मरूपेण भावनीयमिति पद्मासनमुच्यते । यद्वा वृत्ताकारं कोटिसूर्याभं सिंहासनाद्यधस्थित मनन्तभोगिरूप मनन्तपङ्कजरूपं नाळादन्यदेवानन्तासनं वृत्ताकारमुपर्युपरिस्थितानन्त वासुकि तक्षक कार्कोटक पद्म महापद्म शङ्ख-

गुळिकाख्याष्टमहानागरूपं वा । अथवा एवमनन्तासनं भावनीयम्— सिंहासनस्याधस्ताद्वृषासिंहभूतकुञ्जराकार धर्मादिपादचतुष्टयस्य अधर्मादिफलकचतुष्टयस्य मध्यस्योपरि फणपञ्चकेन पुच्छेन च सहितः फणामध्ये पुरुषाकारः क्षौमवस्त्रपरीधान स्सर्वाभरणभूषितः वराभयधरकरद्वयो नागराजः । तंपरितः पूर्वादिदिक्षु अनन्ताद्याः गुळिकान्ता एकफणाः कृताञ्जलिपुटा नागराजा ईक्षमाणा महानागाः नागराजस्याशिरसिप्रफुल्लाष्टदळयुक्तं अनन्तपङ्कजमिति। अत्रादिमपक्षमेवावलंब्य शिवासनस्यार्चनाक्रमः प्रदर्श्यते।

हामाधारशक्तये नमः। शतकोटियोजनप्रमाणब्रह्माण्डाकारपृथिवीतत्वपरिमाणशिवासनपद्मकन्दरूपां धवळवर्णां पाशांकुशाभयवरधारिणी माधारशक्तिं पूजयामि । अनन्तासनाय नमः । जलादिकलान्ततत्वपरिमाणनाळरूपं मायाग्रन्थिसहित मेकादशसहस्रकोटियोजनोच्छ्रायंवा दशशतसहस्रायुत लक्षप्रयुत कोट्यर्बुद पद्मखर्व निखर्व बृन्दमहापद्म शङ्खमहाशङ्ख समुद्र महासमुद्र मध्यपरार्ध दशशतगुणितपरार्धसहस्रगुणितपरार्धलक्षगुणितपरार्धार्बुदगुणित बृन्दगुणितपरार्ध महासमुद्रगुणितपरार्ध सहस्रपरार्ध गुणितपरार्ध पद्मपरार्ध गुणित परार्ध गुणितपरार्ध महाशङ्खपरार्धगुणितपरार्ध शतपरार्धाहतपरार्धगुणितपरार्ध पद्मपरार्धाहतपरार्धगुणितपरार्धरूपत्रिंशत्सङ्ख्या-गुणित पद्मसङ्ख्यासमुदाय सङ्ख्येययोजनोच्छ्रायं वातदुपरि सहस्रफणामण्डलरूपाब्जमुकुळालंकृत मेकवक्त्रं चतुर्भुजं हृदये नमस्कारमुद्रासहित मनन्तरुद्ररूपमनन्तासनं पूजयामि । हां शिवासनपद्मनाळकण्टकेभ्यो नमः । पृथिवीकन्दोद्गतशिवासनपद्मनाळावयवेभ्यो जलादिकलान्ततत्वाश्रितामरेशप्रभासनैमिशपुष्करापाडिंडिंडिमुण्डि भारभूतल शुद्धीश्वर हरिश्चन्द्र श्रीशैल जम्बेश्वर आम्रातकेश्वर मद्ध्यमेश्वर महाकाळ केदार भैरव गया कुरुक्षेत्र नाखल कनकाखल विमलेश्वर अट्टहास महेन्द्र भीमेश्वर अविमुक्त वस्त्रापद-

रुद्रकोटि महाळय गोकर्ण भद्रकर्ण स्त्रर्णाक्ष स्थाणु च्छगलण्ड द्विरण्ड महाकोट मण्डलेश्वर काळाञ्जन शंकुकर्ण स्थूलेश्वर स्थलेश्वर पैशाच राक्षस यक्षगन्धर्व ऐन्द्र सौम्य प्राजापत्य ब्राह्माकृतकृत भैरव ब्रह्मवैष्णव-कौमार नाळ श्रीकण्ठ वामदेव भीमोग्र भव ईशान एकवीर प्रचण्ड उमापति अज अनन्त एकशिव क्रोध चण्ड द्युति संवर्त शूर पञ्चान्तक एकवीर शिखेद नामधेय सप्ततिभुवनरूपान् कण्टकान्पूजयामि । हां सूत्रेभ्यो नमः । पञ्चविपर्ययाष्टसिद्धि नवतुष्टयषष्टाविंशति शक्तिरूप पञ्चाशद्भावनात्मकानि शिवासनपद्मनालसूत्राणि पूजयामि ॥

एवमनन्तासनात्मकनालपूजानन्तरं नाळं परितः स्थितं सिंहासनं योगासनंच पूजयेत् । हां धर्माय नमः । शिवासनस्याग्नेयकोणे पादरूपं सिंहाकारं जलादिगुणतत्वपर्यन्तोन्नतं आग्नेयाभिमुखं विवृतास्यं परिवृत्तकन्धरं वायव्यकोणसिंहावलोकिनं कोटिसिंहपरिवारितं कर्पूरवर्णं धर्मं पूजयामि । हां ज्ञानाय नमः । शिवसिंहासनस्य नैर्ऋतकोणपादरूपं सिंहाकारं जलादिगुणपर्यन्तोन्नतं नैर्ऋताभिमुखं विवृतास्यं परिवृत्तकन्धरं ईशानकोणसिंहावलोकिनं कोटिसिंहपरिवारितं कुंकुमवर्णं ज्ञानं पूजयामि । हां वैराग्याय नमः । शिवसिंहासनस्य वायव्यकोणपादरूपं सिंहाकारं जलादिगुणतत्वपर्यन्तोन्नतं वायव्याभिमुखं विवृतास्यं परिवृत्तकन्धर माग्नेय कोणसिंहावलोकिनं कोटिसिंहपरिवारितं सुवर्णवर्णं वैराग्यं पूजयामि । हामैश्वर्याय नमः । शिवसिंहासनस्येशानकोणपादरूपं सिंहाकारमैशानाभिमुखं जलादिगुणतत्वपर्यन्तोन्नतं विवृतास्यं पूर्ववृत्तकन्धर नैर्ऋतकोणसिंहावलोकिनं कोटिसिंहपरिवारितं मेघवर्णमैश्वर्यं पूजयामि । हामधर्माय नमः । शिवसिंहासनस्य पूर्वफलकरूपं श्वेतकृष्णवर्णं पुरुषाकारं दक्षिणशिरसमुत्तरपाद मधोमुख मधर्मं पूजयामि । हामज्ञानाय

नमः । शिवसिंहासनस्य दक्षिणफलकरूपं श्वेतरक्तवर्णं पुरुषाकारं पूर्वशिरःपश्चिमपादं अधोमुखमज्ञानं पूजयामि । हां अवैराग्याय नमः । शिवसिंहासनस्य पश्चिमफलकरूपं रक्तपीतवर्णं पुरुषाकारं उत्तरशिरसं दक्षिणपाद मधोमुख मवैराग्यं पूजयामि । हामनैश्वर्याय नमः । शिवसिंहासनस्य उत्तरफलकरूपं पीतकृष्णवर्णं पुरुषाकारं पश्चिमशिरसं पूर्वपाद मधोमुख मनैश्वर्यं पूजयामि । तदन्तरं हां शिवसिंहासनाय नमः इतिसमस्तं सिंहासनं संपूज्य योगासनं पूजयेत् ॥

तस्य श्वेतरक्तपीतकृष्णवर्णानि भूतरूपाणि कृतत्रेताद्वापरकलियुगान्याग्नेयादिपादत्वेन अव्यक्तनियतिकलाकालान् स्फटिकक्काळमेघदाडिमीपुष्पभिन्नाञ्जनवर्णान्पूर्वादिफलकत्वेन चाभ्यर्च्य हां शिवयोगासनमध्यफलकरूपाय श्रीमहाविष्णवे नमः इति मध्ये नीलवर्णं त्रिणेत्रं शङ्खचक्रवराभयकरं विष्णुं पूजयेत् । ततो रजोगुणारुणाय तमोगुणतूलभरिताय-मायारूपाय अधश्छदाय नमः । इति योगासनस्य ऊर्द्ध्व मेखलायाअधोभाग-प्रसारितं शयनीयरूपमधश्छदनं नैर्ऋतकोणे संपूज्य । हां सत्वगव्रणधवलिताय शुद्धमायारूपोर्द्ध्वच्छदनायनमः । इति मेखलाया उपरि शयनीयोत्तरच्छदनरूप मूर्द्ध्वच्छदनं नैर्ऋतकोणेच संपूज्य हां शिवयोगासनायनम इति समस्तं योगासनं पूजयेत् । योगासनविमलासने विना न्यासनात्मकमेव शिवासनमिति पक्षे शिवासनमेव मायाग्रन्थिपर्यन्तोन्नतं भावयित्वा तत्पादफलकार्चनानन्तर माग्नेयादिकोणेषु स्थित तदीयफलकद्वय सन्धानकीलत्वेन कृतयुगादिचतुष्टय मभ्यर्च्य तन्मध्ये फलकत्वेनैव श्रीमहाविष्णुं पूजयित्वाऽधश्छदनमूर्द्ध्वच्छदनंच पूजयेत् । ततोऽनन्तफणामण्डलरूपं पद्ममुकुळं विकसितं भावयित्वा तस्य दळकेसरा नर्चयेत् । हां शिवासनपद्मदळेभ्योनम । अष्टविद्येश्वररूपाणि धवळवर्णानि शिवासनपद्मस्य दळा-

नि पूजयामि । हां केसरेभ्योनमः । मूले सुवर्णवर्णानि मद्ध्ये विद्रुमवर्णानि मुक्ताफलाकृतिशिरोलङ्कृतानि चतुष्षष्टिकलारूपाणि वामादिशक्तिसहिताष्टरुद्ररूपाणिवा केसराणि पूजयामि । केसराणा मष्टरुद्ररूपत्वपक्षे अष्टावष्टौ केसराण्येकैकरुद्रत्वेन भावनीयानि । अथवा फणारूपदलसहस्रयुक्तस्य अनन्तपङ्कजस्य केसराण्यपि सहस्रं सन्ति । तानि सर्वाणि पञ्चविंशत्युत्तरशतसङ्ख्यया ऽष्टधा विभज्य वामाद्यष्टरुद्ररूपेण पूजनीयानि । कर्णिकासहितान्यष्टावेववा केसराणि तथा पूजनीयानि । अयं न्यायोऽष्टविद्येश्वररूपतया पूजनीयेषु दळेष्वपि योजनीयः । हां कर्णिकायै नमः । विमलां शक्तिरूपां कनकवर्णा शिवासनपद्मकर्णिकां पूजयामि । हां बीजेभ्योनमः । वामादिनवशक्तिरूपाणि वा पञ्चाशद्वर्णरूपाणि वा शिवासनपद्मकर्णिकाबीजानि पूजयामि । ततस्सर्वावयवयुक्तं पद्मं विभाव्य हां पद्मासनाय नमः इति संपूज्य हां पद्ममुद्रायै नमः इति पद्ममुद्रां प्रदर्शयेत् । ततः पूर्वादिप्रादक्षिण्येनाष्टस्वष्टसु केसरेषु वामादीरष्टौ शक्तीरेकैकशः पूजयेत् । वामायै नमः । ज्येष्ठायैनमः । रौद्र्यै नमः । काळ्यै नमः । कलविकरिण्यैनमः । बलविकरिण्यै नमः । बलप्रमथिन्यै नमः । सर्वभूतदमन्यै नमः । अरुणवक्त्रा श्यामरधारिणी शिवासनन्यस्तैकहस्ता शिवाभिमुख्येन केसरेषु स्थिता वामादिशक्तीः पूजयामि । मनोन्मन्यैनमः । स्फटिकवर्णां पाशाङ्कुशाभयवरधारिणीं शिवासनपद्मकर्णिकायामीशानदिशि मध्येईशानदिशि वा स्थितां मनोन्मनीं पूजयामि । ततस्साधिपतिकानि सूर्यसोमाग्निशक्तिमण्डलान्युपर्युपरि पूजयेत् । हां सूर्यमण्डलाय नमः । कोटिसूर्यप्रतीकाशं शिवपद्मासनदळाग्रव्यापकं सूर्यमण्डलं पूजयामि । हां सूर्यमण्डलाधिपतये ब्रह्मणे नमः । पञ्चमक्रं चतुर्बाहुं प्रतिवक्त्रं त्रिलोचनम् ।

तप्तचामीकराभासं नमोमुद्रासमन्वितम् ॥ सृष्टिकारण (१)कारणमात्मतत्वरूपिणं सूर्यमण्डलाधिपतिं ब्रह्माणं पूजयामि । हां सोममण्डलायनमः । शिवासनपद्मकेसराग्रव्यापकं कोटिशीतांशुशीतलं सोममण्डलं पूजयामि । हां सोममण्डलाधिपतये विष्णवे नमः । मेघश्यामं शङ्खचक्रनमस्कारमुद्रान्वितकरचतुष्टयं स्थितिकारण (२) कारणं सोममण्डलाधिपतिं विष्णुं पूजयामि । हां अग्निमण्डलायनमः । शिवासनपद्मकर्णिकाग्रव्यापकं वह्निमण्डलं पूजयामि । हां वह्निमण्डलाधिपतये रुद्रायनमः । माणिक्यवर्णं शूलानलनमोमुद्रान्वितकरचतुष्टयं लयकारण (१) कारणं शिवतत्वरूपिणं वह्निमण्डलाधिपतिं रुद्रं पूजयामि । विमलासनं कर्णिकाव्यतिरिक्तमिति पक्षे आग्नेयाद्यैशानान्तं गुणत्रयं दक्षिणाद्युत्तरान्तं मण्डलत्रयं नैर्ऋत्यादिवायव्यान्तं तत्वत्रयंच पूजयित्वा हां विमलासनायनमः इति समस्तमिदं विमलासनं पूजयेत् ॥

तदनन्तरं मध्ये हां शक्तिमण्डलाय नमः । धवळवर्णं मण्डलत्रयव्यापक मिच्छाशक्तिरूपशक्तिमण्डलं पूजयामि । हां शक्तिमण्डलाधिपतये महेश्वरायनमः । स्फटिकवर्ण मष्टहस्तं खड्गात्रिशूलबाणाक्षमालाकमण्डल्वभयकराराविन्दधारिणं शक्तिमण्डलाधिपतिं महेश्वरं पूजयामि । ततस्समस्तं शिवासनं विभाव्य तदुपरि हां शिवासनायनमइति ज्ञानशक्त्यात्मकं शिवासनं पूजयेत् । अस्यामासनपरंपराया माधारशक्तिमात्मार्थपूजायां ब्रह्मशिलास्थानीये पद्मपीठे पूजयित्वा ऽनन्तप्रभृति शक्तिमण्डलान्तं लिङ्गवेदिकाया मुपर्युपरि लिङ्गनाभिपर्यन्तं पूजयेत् । एवं प्रत्येकं शिवासनावयव-

---

१. सृष्टिकारणमात्मतत्वेति पाठान्तरम् ।
२. स्थितिकारणं सोम इति पाठान्तरम् ।
(३) लयकारणं शिव इति पाठान्तरम् ।

पूजनाशक्तौ साङ्गोपाङ्गं शिवासनं विभाव्य हां शिवासनायनम इत्येवं पूजयेत् । अयमनेकासनगर्भशिवासनार्चनप्रकारः । यद्वा— आवाहने पद्ममनन्तं स्नाने विमलमर्चने योगासनं नैवेद्ये वस्त्रादिष्वन्येष्वुपचारेषु सिंहासनंच कल्पयेत् । अथवा सिंहासनं स्नाने अनन्तं वस्त्रे पद्ममाभरणगन्धपुष्पेषु विमलं नैवेद्ये योगमन्योपचारेषुच कल्पयेत् । एवं शिवासनं संपूज्य हां हं हां शिवमूर्तयेनम इति लिङ्गनाभेर्महेश्वरतत्वात्मिकां शिवस्य मूर्तिं स्थिरविद्युन्निभां दण्डाकारा मविभक्तावयवां संपूज्य लिङ्गदैर्घ्ये होमीशानमूर्ध्ने नम इत्यादिमन्त्रै र्दण्डभङ्ग्या मूर्द्धादिपादान्त मीशानादि विन्यस्य सशक्तिक मशक्तिकं वा तत्तत्स्थानेष्वष्टत्रिंशत्कला न्यसेत् । शुद्धशशिन्यादिशक्तीरेव न्यसेत् । ततश्श्रीकण्ठादिन्यासश्च विदध्यात् । एवं सदाशिवदेहसिद्ध्यर्थं न्यासान्कृत्वा हां हौं विद्यादेहायनम इति विभक्तावयवं सदाशिवं विद्यादेहं पूजयित्वा तत्स्वरूपं प्रपञ्चेन ध्यायेत् ॥

क्षित्यादिशुद्धविद्यान्ते कन्दनाळदळैर्युते । कर्णिकाकेसरैर्युक्ते सूर्यबिम्बादिभूषिते ॥ ईश्वरान्तिकया मूर्त्या स्थिरविद्युत्प्रकाशया । अविभक्तावयवया भ्राजमानोपरिस्थले ॥ क्षित्यादीश्वरतत्वान्ते मूर्त्याकथितया सह । नानापद्मकुटीकोटीयोजनोन्नतशालिनि ॥ पद्मेस्थितं महापद्मकोटियोजनसंमितम् । बद्धपद्मासनासीनं समुपासेत्सदाशिवम् ॥

यद्वा कूटाङ्ककोटी कटकनटनटी नाट्य नव्यानपान
ध्याना (१) विद्यानकानीनकमितशतकोटयुन्नतैर्योजनौघैः ।
तेजोमूर्त्यन्तकन्दप्रभृतिषु दशधा सप्तधाच प्रभिन्नैः
सङ्ख्यातव्यप्रमाणै स्सरसिरुहवरे योगवीठे निषण्णम् ॥

---

१. द्विद्यात्मकङ्कनकामितेति पाठभेदः ।

दशोत्तरप्रयुतपरार्धयोजनां विवृद्धकाविषयपरार्धयोजनाम् ।
समुन्नतिं समुपगतं समाश्रये सदाशिवं सरसिरुहासने स्थितम् ॥
पद्मं कन्देऽथ नाळे क्रमिकदशगुणा विंशतौ तस्य वृद्धि
र्यैकैकद्वित्रिषुस्या च्छतमुखदशलक्षान्तभंग्याऽथ वृद्धिः ।
ग्रंथौ कोट्याथ पद्मप्रभृतिषु दशकोट्येति संख्याभिराभिः
संख्याते योजनौघै र्महिमज्ञुषि महायोगपीठे स्थितं वा ॥
तदुपरि शतकोटियोजनौघ प्रथित महेश्वरतत्वमानमूर्तैः ।
लसितमुपरि तत्सहस्रकोट्या तदयुतकोटिदिशाच वृद्धिभाजम् ॥
पञ्चवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम् ।
दक्षिणे शूलवज्रासिपरश्वभयमुद्रिकाः ॥
वामेच दधतं नागपाशघण्टानलांकुशान् ।
अथवा वरखट्वाङ्गशूलाभीशक्तिपञ्चकम् ॥
रुचकं डररुं सर्पं नीलांभोजाक्षमालिकाम् ।
अस्योर्द्ध्ववक्त्रं देवस्य बालभावमनोहरम् ॥
प्रसन्नमूर्द्ध्वाभिमुखं निर्मलं स्फटिकप्रभम् ।
पूर्ववक्त्रं महेशस्य नि(१)ष्टप्ताष्टापदप्रभम् ॥
गर्वेण स्तिमितं सौम्यं संप्राप्तनवयौवनम् ।
दक्षिणं वदनं शंभोर्नीलाञ्जनचयप्रभम् ॥
भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम् ।
दंष्ट्राकराळं दुर्धर्षं स्फुरिताधरपल्लवम् ॥
चन्द्रापीडज्वलत्केशं विलसत्प्रौढयौवनम् ।
उत्तरं वक्त्र मीशस्य नवविद्रुमसुप्रभम् ॥

---

१. निक्षिप्तेति पाठान्तरम् ।

ललाटतिलकोपेतं नीलालकविभूषितम् ।
प्रलोभनं त्रिनयनं चन्द्राभरणभास्वरम् ॥
पार्वतीवदनाकारसलीलभ्रूलतान्वितम् ।
पश्चिमं चण्डसङ्काशं नृपलक्षणलक्षितम् ॥
चन्द्रावर्तसरुचिरं ध्यानस्तिमितलोचनम् ।
इति ध्यात्वा पुनरपि ध्यायेद्देवं सदाशिवम् ॥
इच्छाज्ञानक्रियारूपविलसल्लोचनत्रयम् ।
ज्ञानचन्द्रकलाचूडं दशदिग्बाहुमण्डलम् ॥
पञ्चब्रह्मात्मवदनं पञ्चसादाख्यवक्त्रकम् ।
श्रीमत्पञ्चाक्षराकारवदनांसोरुशोभितम् ॥
समस्ततन्त्ररूपं च वर्णब्रह्मकलामयम् ।
निवृत्या जानुपर्यन्त मानाभेश्च प्रतिष्ठया ॥
आकण्ठं विद्यया सिद्ध माललाटं तु शान्तया ।
तदूर्द्ध्वं शान्त्यतीताख्यकलया परिकल्पितम् ॥
एवं पञ्चकलारूप मिदं सादाशिवं वपुः ॥
चतुर्मुखी तटिद्वर्णा निवृत्तिर्वज्रधारुणी ।
एकवक्त्रा शशाङ्काभा प्रतिष्ठा पद्मधारिणी ॥
अग्निवर्णा त्रिवदना विद्या शक्तिलसत्करा ।
कृष्णवर्णा चतुर्वक्त्रा शान्तिर्ध्वजविधारिणी ॥
पाशभृत्पञ्चवदना शान्यतीता शशिप्रभा ।
सर्वाः पद्माक्षमालाभ्या मभयेन विराजिताः ॥
चतुर्भुजा स्त्रिणेत्राश्च पीनोन्नतपयोधराः ।
आसां पञ्चाध्वगर्भत्वात् षडध्वात्मा सदाशिवः ॥
मन्त्राध्वाच पदाध्वाच वर्णाध्वा भुवनाध्वकः ।

तत्वाध्वा च कलाध्वा च षडध्वान इमे मताः ॥
चतुर्विंशत्युत्तरं यद्भुवनानां शतद्वयम् ।
भुवनाध्वा स सञ्चिन्त्यो रोमभूम्नात्मना विभोः ॥
पञ्चाशद्रुद्ररूपैस्तु वर्णै र्वर्णाध्वकल्पना ।
असौ खगात्मना चिन्त्यो देवदेवस्य शूलिनः ॥
रुधिरात्मा तु मन्त्राद्धा विचिन्त्यः पार्वतीपतेः ।
पदाध्वा चिन्तनीयस्स्यात् सिरामांसतया प्रभोः ॥
पृथिव्यादीनिषट्त्रिंशत् तत्वान्यागमवेदिभिः ।
उक्तान्यमीभिस्तत्वाध्वा शुक्लमज्जास्थिरूपभृत् ॥
नास्य देहेऽस्थि रुधिरं न मांसं नास्ति किञ्चन ।
प्रतिबिंब मिवादर्शे शक्रचापमिवांबरे ॥
ज्योतिर्मयतया सिद्ध मिदं सादाशिवं वपुः ।
तथाऽपि कल्पनामात्रं कलावाऽप्यध्वनामिदम् ॥
ब्रह्मस्त्रीशेन मूर्धानं पुरुषेण चतुर्मुखीम् ।
हृदयादीन्यघोरेण गुह्यादीनि तु वामतः ॥
सद्योजातेनतु ध्यायेत् पादादीनि जगत्पतेः ।
पञ्चवक्त्राः स्मृतास्सर्वे दशदोर्दण्डभूषिताः ॥
खड्गखेडधनुर्बाणकमण्डल्वक्षसूत्रिणः ।
वराभयोपेतकरा श्शूलपङ्कजपाणयः ॥
अघोरो घोर एतेषु तदन्ये सौम्यविग्रहाः ।
एवं ध्यात्वा सदेशस्य पञ्चब्रह्मात्मतां विभोः ॥
तत्तद्ब्रह्मकलाभेदै र्विचिन्त्याङ्गानि कल्पयेत् ।
ईशानस्य कलाः पञ्च मूर्द्धात्मकतां गताः ॥

चतुर्मुखतया ध्येया श्चतस्रः पुरुषस्य ताः
अष्टावघोरस्य कला स्समस्ता जगतीपतेः ॥
हृत्कण्ठोऽसौ नाभिकुक्षी पृष्ठं वक्ष इतीरिताः ।
वामदेवस्य तु कलास्त्रयोदश शिवोदिताः ॥
गुह्योरुजानुजंघास्फिक्कटिः पार्श्वे तथा मताः ।
सद्योजातस्यतु कला वसुसंख्याः प्रकीर्तिताः ॥
पादौ करौ नासिके च शिरोबाहू च ता मताः ।
अष्टत्रिंशत्कला देवाः तिणेत्राश्च चतुर्भुजाः ॥
वराभयपरश्वेणविलसत्करपङ्कजाः ।
तत्तद्वाह्यसमाकारवर्णायुधभृतोऽथवा ॥
एतेषां वामभागेषु शक्तिन्याद्याश्च शक्तयः ।
पाशांकुशाभयवरै र्ध्यातव्यास्सुस्मिताननाः ॥
श्रीकण्ठप्रमुखान्रुद्रान्वर्णरूपान्सशक्तिकान् ।
प्रभोरवयवान्न्यायेनृन्यासविन्यासवर्त्मना ॥
स्मरेत्सशक्तिकान् रुद्रा नर्धनारीश्वराकृतीन् ।
सिन्दूरकांचनप्रख्य वामदक्षिणपार्श्वकान् ॥
पाशाङ्कुशाक्षवलय वरमुद्राविराजितान् ।
प्रसन्नवक्त्रकमला न्विश्ववांछितदायकान् ॥
कामिकं पादकमलं योगजं गुल्फयो र्युगम् ।
चिन्त्यं पादांगुळीरूपं कारणं प्रसृतिद्वयम् ॥
अजितं जानुनोर्युग्मं दीप्तमूरुद्वयं विभोः ।
गुह्यबीजात्मकं सूक्ष्मं सहस्रांभ्रुकुटीतटम् ॥
पृष्ठभागेऽशुमानस्य नाभिश्रीमुप्रभेदकम् ।

विजयं जठरं प्राहुर्निश्वासं हृदयात्मकम् ॥
स्वायम्भुवं स्तनद्वंद्वं मनलं लोचनत्रयम् ।
वीरागमः कण्ठदेशो रौरवं श्रवणद्वयम् ॥
मुकुटं मकुटं तन्त्रं बाहवो विमलागमः ।
चन्द्रज्ञान मुरश्शंभो बिम्बं वदनपङ्कजम् ॥
जिह्वा प्रोद्गीत मीशस्य ललितं गण्डयोर्द्वयम् ।
सिद्धं ललाटफलकं सन्तानं कुण्डलद्वयम् ॥
यज्ञोपवीतं श्रुत्योक्तं हारस्त्रक्पारमेश्वरम् ।
किरणं रत्नभूषास्य वातुलं वसनात्मकम् ॥
एवं तन्त्रात्मकं रूपमीश्वरस्य विचिन्तयेत् ।
शिवज्ञानप्रदं पुंसां शिवधर्मप्रवर्तकम् ॥
विशुद्ध शिवसादाख्यं विद्युद्वृन्दमिवांबरे ।
विश्वतस्फुरितज्योति र्विद्यादूर्द्ध्वं मुखं विभोः ॥
अमूर्ति मथ सादाख्यं मूलस्तम्भ इति श्रुतम् ।
ज्योतिस्तम्भमयं लिङ्गं स्मरेदस्योत्तरं मुखम् ॥
ज्योतिर्लिङ्गैकभागोत्थमेकवक्त्रं त्रिलोचनम् ।
मूर्तिसादाख्य मित्युक्तं ध्यायेत्पश्चिममाननम् ॥
शूलञ्च परशुं वज्र मभीति दक्षिणैः करैः ।
पाशं वह्निंच घण्टांच वरं वामैः करैरपि ॥
दधानं कर्तृसादाख्यं चतुर्वक्त्रांबुजोज्वलम् ।
लिङ्गमध्ये समुद्भूतं संस्मरेद्दक्षिणाननम् ॥
पञ्चवक्त्रं दशभुजं पीठं लिङ्गे समुद्गतम् ।
प्रसिद्धं कर्तृसादाख्यं पुरारेः पूर्वमाननम् ॥

पञ्चब्रह्माण्यूर्ध्वपूर्वदक्षिणोत्तरपश्चिमान् ।
वक्त्रपद्मान्यिभोर्ध्यायेदीशानप्रभृति क्रमात् ॥
हृदयं हृदये शुभ्रं शिरश्शिरसि पिङ्गलम् ।
शिखां शिखापदे रक्तां कवचं पार्श्वयोः स्थितम् ॥
नेत्रेतु श्यामलं नेत्रं करेऽस्त्रं मसितं स्मरेत् ।
चतुर्भुजास्त्रिणेत्राश्च जटामकुटमण्डिताः ॥
वराभये कपालञ्च शूलश्च दधतं करैः ॥
अङ्गदेवाःस्मृतास्सौम्यनेत्राग्रेतूग्रविग्रहे ।
त्रिशूलास्त्रिगुणः प्राहुः परशुस्सत्यनिष्ठिताः ॥
खड्गप्रतापोवज्रश्च शंभोश्शक्तिरभेद्यता ।
वह्नेस्संहारिणी शक्तिरशक्तिर्नागे प्रधृष्यता ॥
मलमाया कर्मपाशो घण्टानादस्वरूपिणी ।
अभयं पालिनी शक्ति र्नियमंत्वंकुशं विदुः ॥
इच्छाज्ञानक्रियारूपा स्त्रिशूलं शक्तयोमताः ।
उक्ता स्ताएव खट्वाङ्गं शुद्धतत्वप्रवर्तिकाः ॥
बीजपूरमिति प्रोक्ता जगद्बीजप्रवर्तिका ।
डमरुक्षोभसंपन्नमायातत्वप्रवर्तिका ॥
काकोदरः कला मुख्या कार्यजातप्रवर्तिका ।
मनःप्रवर्तिकाशक्तिरिन्दीवरतया मता ॥
अक्षमालातु सा ज्ञेया इन्द्रियाणां प्रवर्तिका ।
शक्त्यायुधात्मिका शक्ति र्दुष्टसंहारकारिणी ॥
वरो भोगप्रदा शक्ति रभयं मोक्षदायिका ।
इत्थं दशायुधधरं कोटिशीतांशुशीतलम् ॥

द्वात्रिंशल्लक्षणोपेतं सर्वाभरणभूषितम् ।
पङ्क्त्यंगुळपरिच्छिन्नजटामकुटमण्डितम् ॥
तत्सव्यकोटिविन्यस्तत्र्यंगुळार्धेन्दुशेखरम् ।
तद्वामकोटिविश्रान्तविद्वाकृत्यमरापगम् ॥
त्रिपुण्ड्रार्धेन्दुभूयन्त्रदीपचन्द्राकृतिं क्रमात् ।
ईशानाद्यै र्मुखं पुण्ड्रान्धारयन्तमजांतिमैः ॥
ध्यायेत्तद्वामभागेतु दिव्यरूपां मनोन्मनीम् ।
जपाकुसुमसङ्काशां शुभ्रवस्त्रविभूषिताम् ॥
सर्वाभरणसंपूर्णां पीनोरुजघनस्तनीम् ।
सहस्रपद्मनीलाब्जवरदाभयधारिणीम् ॥
एवं मनोन्मनीयुक्तं साक्षाद्देवं सदाशिवम् ।
लिङ्गेऽपि भावयन्नग्रे लिङ्गबुद्धिं परित्यजेत् ॥
नेत्रत्रयेषु विन्यस्य हौं नेत्रेभ्य इति क्रमात् ।
आवाहयेत्परशिवं सदैवं हृदयांबुजे ॥

अथावाहनक्रमः— अप्रमेय मनिर्देश्य मनूपम मनामयम् । सूक्ष्मं सर्वगतं नित्यं ध्रुव मव्यय मीश्वरम् ॥ भवन्तं भवताऽऽदिष्टो मन्त्रेणाभिनमाम्यहम् ॥ इति विज्ञाप्य ऋजूर्द्धकायो मनश्चक्षुर्निरोधनपूर्वक मिडया वायुमापूर्य कुंभकं कृत्वा हृदि पुष्पसंपूर्ण मञ्जलि निधाय दृढमावाहनमुद्रां बद्ध्वा स्वशरीरे मूलाधारस्थितं मन्त्रमयं परमशिवं ज्योतिस्समाकृष्य मूलाधारप्रभृति स्थितं हकार मतिलंघ्य हृदयपर्यन्तं नीत्वा हृत्कण्ठताल्वादिस्थानास्थित पृथिव्यादिपाशजालब्रह्मादिकारणेश्वरसहिताकारादिद्वादशकलाश्च क्रमेण तत्तदनुसन्धानपूर्वक मतिलंघ्य द्वादशान्तपर्यन्त मुच्चारयन्नेव पुष्पाञ्जलिमपि द्वादशान्तपर्यन्तंनीत्वा मन्त्रमयं ज्योतिर्द्वादशान्तास्थितपरमशि-

केन संयोज्य अविश्रान्तं परमामृतस्यन्दिबिन्दुरूपं ततआनीय भ्रूमध्यगत-शिवमण्डपविश्रान्तं संभाव्य शरदिन्दुसहस्रवद्भाव्य हृद्देशेऽञ्जलिं धारयन् वायुमपि पिङ्गळया विरेच्य वायुना सह परमशिवं ज्योतिः पुष्पाञ्जलिमध्य-प्रापितं विभाव्य हां हौं शिवायनम इति सदाशिवस्य ब्रह्मरंध्रे योजयेत् । उक्तार्थविशदीकरणाय मूलमन्त्र तदीयहकार तत्कलाद्वादशस्थानानि प्रद-र्श्यन्ते ॥ यद्देहमध्यस्थानं मूलाधारं ततः प्रभृति ब्रह्मरन्ध्रपर्यन्तं ताळचतुष्टय-प्रमाणं देहान्तर्गतम्। ततऊर्द्ध तालप्रमाणं शिखास्थानम्। तत्र मूलाधारस्थि तचतुर्दळकमळकर्णिकायां प्रासादमन्त्रस्योत्थानम् । ततःप्रभृति ना-भिपर्यन्तं मृणाळसूक्ष्मोविद्युत्प्रभो हकारः । नाभेरूर्द्ध द्वादशांगुलपर्यन्तं वि-द्युद्द्युति रकारयुक्तो हकारः । ततः पञ्चचतुरंगुलप्रमाणं हृत्पद्मम् । तत आरभ्य शिखाग्रपर्यन्तं द्वादशकलास्थानानि । तत्रचतुरंगुल व्याप्तिमान्नै-कार स्त्रिमात्रस्तप्तांगारपुञ्जद्युतिः । सच निवृत्तिकलया पृथिव्यादिप्रकृत्य-न्तैः चतुर्विंशतितत्वैश्च सहितेन ब्रह्मणाऽधिष्ठितः । तदूर्द्ध कण्ठस्थानस्थि-ताष्टांगुलप्रमाण षोडशदळपद्मव्याप्तिमा नूकारः द्विमात्र स्समसमयसमुदि-तचन्द्रसूर्यद्युतिः । स प्रतिष्ठाकलया पुरुषादिकालान्तैष्षड्भिस्तत्वैश्च सहि-तेन विष्णुनाऽधिष्ठितः । तदूर्द्ध तालुमूलस्थितचतुरंगुलप्रमाणचतुर्दलपद्म-व्याप्तिमान्मकारः एकमात्रो विद्युद्वर्णः । स विद्याकलया मायातत्वेनच सहितेन रुद्रेणाधिष्ठितः । तदूर्द्ध भ्रुमध्यस्थितद्व्यंगुलप्रमाणद्विदलपद्म-व्याप्तिमा न्बिन्दुवृत्ताकारोऽर्द्धमात्रो विद्युद्वर्णः शान्तिकलया शुद्धविद्येश्वरत-त्वाभ्यांच सहितेन महेश्वरेणाधिष्ठितः । तदूर्द्ध ललाटमध्ये अर्धमात्रा ऊर्द्ध्वाग्रा अर्धचन्द्राकृतिः पादमात्रा चन्द्रवर्णा । तदूर्द्ध ललाटे निरोधी । सचोर्ध्वाग्रात्रिकोणाकृति रष्टांशमात्रो धूम्रवर्णः । तदूर्द्ध शिरसि नादः । स दण्डाकृति रुभयतोबिन्दुद्वययुक्तः षोडशांशमात्रो माणिक्यवर्णः । ततो

ब्रह्मरन्ध्रे नादान्तः स दक्षिणामुखहलाकृतिः दक्षिणपार्श्वस्थबिन्दुयुक्तः द्वात्रिंशात्मकमात्रो विद्युद्वर्णः। एवं बिन्दुस्थानात् भ्रूमध्या दैकादशांगुलस्थितब्रह्मरन्ध्रपर्यन्ते स्थाने स्थिताना मर्धचद्रनिरोधि नादनादान्तानां चतुर्णामपि शान्त्यतीतकला सदाशिवतत्वाभ्यांच सहित स्सदाशिव एवाधिष्ठाता । ब्रह्मरन्ध्रादूर्द्ध्व मेकांगुलस्थानस्थिता शक्ति स्सर्वमुखहलाकृति र्वामपार्श्वस्थबिन्दुसहिता चतुष्पष्ट्यंशमात्रा । ततः व्यङ्गुलस्थाने स्थिता व्यापिनी त्रिशूलाकृति र्दक्षिणपार्श्वस्थबिन्दुसहिताऽष्टाविंशत्यधिकशतांशमात्रा । तदूर्द्ध्व चतुरङ्गुलसमानबिन्दुद्वयान्तर्गतकुब्जरेखायुगलान्तरालस्समंजुरेखामधिषट्पञ्चाशदधिक द्विशततमांशमात्रा । तदूर्द्ध्व चतुरंगुलस्थितोन्मनीबिन्दुधिष्ठानकतदूर्ध्वप्रसृत दण्डाकाररेखात्मिका मनोमात्रा । अत्र ब्रह्मरन्ध्रादूर्द्ध्व मेकत्रिचतुरंगुलक्रमेण द्वादशांगुलपर्यन्तशिखास्थाने उपर्युपरि स्थिता श्शक्तिव्यापिनी स्समनोन्मनी श्शतकोटिसूर्यप्रभाः अनाहताशिवेनाधिष्ठिताः । ताश्च चतस्रोऽपि मिळिताः परमाकाशा उच्यन्ते । एवमकारश्च तुरंगुलः । उकारोऽष्टांगुलः । मकारश्चतुरंगुलः । बिन्दुर्द्वयंगुल मर्धचन्द्र निरोधि नाद नादान्ता एकादशांगुळं शक्ति व्यापिनी समनोन्मना द्वादशांगुळव्याप्नुवत्येकचत्वारिंशदंगुलं द्वादशानामपि कलानां व्याप्तिस्थानम् । ततश्च मूलाधारात् द्वादशान्तपर्यन्त मुक्तमानेषु तत्तत्स्थाने हकारमकारयुक्तहकार मौकारमूकारं वृत्ताकारं बिन्दु मूर्द्धाग्रार्धवृत्ताकार मर्धचन्द्र मूर्ध्वत्रिकोणाकारं निरोधिनं बिन्दुद्वयमध्यगतदण्डाकारं नाददक्षिणपार्श्वस्थित बिन्दुसहितोर्ध्वाग्र दक्षिणामुखहलाकारं नादान्तं वामपार्श्वस्थितबिन्दुसहितोर्ध्वाग्रवाममुखहलाकारां शक्तिं दक्षिणपार्श्वस्थितां बिन्दुसहितोर्ध्वाग्रत्रिशूलाकारां व्यापिनीं बिन्दुद्वयान्तरालगतकुब्जरेखाद्वयमध्यस्थितऋजुरेखाकृति समानां बिन्दुधिष्ठानकोर्ध्वाग्रऋजुरेखाकृतिमुन्मनां च हृदया-

दिस्थानस्थितकलातत्त्वकारणेश्वरैस्सह क्रमेण पूर्वपूर्वत्यागेन झटिति मनसा विचिन्त्य तदुपरि परमाकाशसरित्समुद्भूतकोटिसूर्यसमप्रभ कोटिशीतांशुशीतळाष्टत्रिंशत्कलात्मक केसरोज्वल प्रणवकर्णिकापञ्चाक्षरबीजाढ्य परमानन्दमधुभरित मुक्तभृङ्गनिषेवित चिच्छक्तिरूप सहस्रदळकमलमध्यगतं सद्यस्समुद्यदनेककोटि शारदशशाङ्कसङ्काशप्रकाशं परमानन्दजलधिं निष्कळंपरमशिवं मनसाऽवगाहेत। एवं भावनापुरस्सरं परमशिवं मूलेनानीय हृदयमन्त्रेणावाहनमुद्रया सदाशिवहृदयांबुजंप्रापय्यास्थापनमुद्रयातस्मिंस्संस्थाप्य सन्निधानमुद्रया स्वामिमुखीकृत्य स्वागतंते महादेवेति विज्ञाप्य वत्स सुस्वागतमितिदेवेनोक्तं मनसा विभाव्य स्वागतार्घ्यं दत्वा सन्निरोधनमुद्रया सन्निरुध्य "स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम् । तावत्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधीं भव"इति हृद्यंजलिबन्धपूर्वकं संप्रार्घ्य शिवस्यानुमतिं भावयित्वा निरोधार्घ्यं प्रदाय काळकण्ठ्या हुंफडन्तास्त्रेण विघ्नानुत्सार्य शिवं कवचेनावकुण्ठ्य हृदयशिरश्शिखाकवचानि तत्तन्मन्त्रैर्देवस्य हृदयादिस्थानेषु विन्यस्य हृदयादिकराङ्गविन्यासरूपसकळीकरणानन्तरं पुष्पमारोप्य मूलेन परमीकृत्य धेनुमुद्रयाऽमृतीकुर्यात् । अत्रावाहनं शिवस्य सदाशिवदेहप्रापणम् । स्थापनं सदाशिवस्य हृदंबुजे स्थापनम् । सन्निधापनं स्वाभिमुखीकरणम् । सन्निरोधनं यावत्पूजासमाप्ति सन्निधानप्रार्थनम् । अवकुण्ठनं भक्तेषु प्रकाशार्थं विघ्नाना मप्राप्त्यर्थं च कवचेनाच्छादनम् । सकळीकरणं हृदयादिपञ्चाङ्गन्यसनम्। परमीकरणं शुक्लपीतरक्तासितरक्तवर्णानां हृदयादीनां शिवैकत्ववर्णानुसंधानम् । अमृतीकरणं विग्रहस्य शिवस्यचाभेदेन प्रतिपत्तिः । ननु विश्वव्यापकस्य शिवस्य कथमभिमतदेशप्रापणरूप मावाहन मुच्यते । अचिन्त्याद्भुतानन्तशक्तिकत्वात्शिवस्यव्यापकत्वमव्यापकत्व मप्यस्तीति तच्छिवस्य देशान्तरप्रापणरूप मुपपद्यते । यद्वा—

व्यापकस्यापि जीवस्य शरीरावच्छेदोपाधिकत्वमिवशिवस्यापि मन्त्रतेजोवच्छेदोपाधिवदभिमतदेशान्तरप्राप्तिर्नविरुध्यते । अथवा दारुणिव्याप्तस्याग्नेर्मथनक्रियया क्वचिदभिव्यंजनवदभिमतदेशप्रापणभावनारूपया क्रियया शिवलिङ्गाभिमतदेशे शिवस्याभिव्यञ्जनमेवावाहनम् । ननु सर्वत्र नित्योदितचिदानन्दप्रकाशरूपस्य परमशिवस्य किमिदमभिव्यञ्जनमुच्यते । यथा स्वयंप्रकाशमानस्याप्यंगारवह्निपुञ्जस्य भस्मच्छन्नस्य भस्मनिरासकफूत्कारक्रिययाऽभिव्यञ्जनं एवं स्वयंप्रकाशमानस्यापि परमशिवस्य पूजकमनसोविषयान्तरेषु मनोव्यापारेण तं प्रति च्छन्नस्यानन्यमनस्कविहितावाहनक्रियापूर्वक मभिमतदेशे लिङ्गादौ यावद्विसर्जनं कर्तव्यस्य तत्तदुपचारसमर्पणार्थं मनुसन्धानसन्तानस्योक्रमण मेवाभिव्यञ्जनम् । अथवा शिवपुराणोक्तप्रकारेण सदाशिवहृदयांबुजे परशिवस्योमासहायचिदानन्दमयदिव्यविग्रहाभिध्यानपूर्वकमावाहनम् ॥ तत्प्रकारः प्रदर्श्यते ॥

लिङ्गे सदाशिवं ध्यात्वा निश्चलेनान्तरात्मना ।
अष्टत्रिंशत्कलान्यासं कृत्वा स्वस्यां तनौ यथा ॥
अभ्यर्च्य गन्धपुष्पाद्यै स्वयक्त्या लिङ्गात्मतामतिम् ।
तथा मूर्तौ मूर्तिमन्तं शिवं परमकारणम् ।
प्राणस्थानं सदेशस्य चिन्तये देवया सह ॥
ब्रह्मा विष्णुश्च रुद्रश्च तथाऽन्ये च सुरासुराः ।
तपोभि रुग्रै रप्यस्य दर्शनकांक्षिणः ॥
यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सह भूतेन्द्रियैस्सर्वैः प्रथमं संप्रसूयते ॥
कारणानां च सर्वेषां ध्याता परमकारणम् ।
[illegible]

सर्वैश्वर्येण संपूर्णो नाम्ना सर्वेश्वरस्त्वयम् ।
सर्वैर्मुमुक्षुभिर्ध्येय श्शंभुराकाशमध्यगः ॥
सर्वोपरि कृतावास स्सर्ववासश्च शाश्वतः ।
षड्विधाध्वमयस्यास्य सर्वस्य जगतः पतिः ॥
उत्तरोत्तरभूतानां मुत्तरश्च निरुत्तरः ।
अनन्तमहिमांभोधि रपरिच्छिन्नवैभवः ॥
अशेषविषयामोघशुद्धबुद्धिविजृंभणः ।
आत्मशक्त्यमृतास्वादप्रमोदभरलालसः ॥
अनन्तानन्दसन्दोहमकरन्दमधुव्रतः ।
अखण्डजगदण्डानां पिण्डीकरणपंण्डितः ॥
औदार्यवीर्यगांभीर्यमाधुर्यमकरालयः ।
अतुलस्सर्वभूतानां राजराजो महेश्वरः ॥
अप्राकृतशरीरं त मतिमन्मथरूपिणम् ।
घृतरीतिघनीभूतसच्चिदानन्दविग्रहम् ॥
सर्वलक्षणसंपन्नं सर्वावयवशोभनम् ।
रक्तास्यपाणिचरणं कुन्दमन्दस्मिताननम् ॥
शुद्धस्फटिकसङ्काशं फुल्लपद्मत्रिलोचनम् ।
चतुर्भुजमुदाराङ्गं चारुचन्द्रकलाधरम् ॥
वरदाभयहस्तंच मृगटंकधरं हरम् ।
सर्वोपमानवर्गस्य दवीयांसं विभावयेत् ॥
ततस्संचिन्तयेत्तस्य वामभागे महेश्वरीम् ।
उत्फुल्लोत्पलपत्राभविस्तीर्णायतलोचनाम् ॥

पूर्णचन्द्राभवदनां नीलकुञ्चितमूर्द्धजाम् ।
नीलोत्पलदलप्रख्यां चन्द्रार्धकृतशेखराम् ॥
अतिवृत्तघनोत्तुङ्गस्निग्धपीनपयोधराम् ।
तनुमध्यां पृथुश्रोणिं वीतसूक्ष्मतरांबराम् ॥
सर्वाभरणसंपन्नां माणिक्यतिलकोज्वलाम् ।
विचित्रपुष्पसंकीर्णकेशपाशमनोहराम् ॥
सर्वतोनुगुणाकारां किंचिल्लज्जाननाम् ।
हेमारविन्दं विकसद्दधानां दक्षिणे करे ॥
दण्डवच्चापरं हस्तं न्यस्यासीनां सहासने ।
भुक्तिमुक्तिप्रदां देवीं सच्चिदानन्दरूपिणीम् ॥
सदाशिवेश्वरहरश्रीशद्रुहिणमातरम् ।
समस्तगौरीलक्ष्यादिशक्तिचक्रस्य नायिकाम् ॥
एवं देवंच देवीं च विचिन्त्य द्वयष्टहायनौ ।
भक्त्योपचारवर्गेण क्रमेण परिपूजयेत् ॥

एवं सदाशिवस्य हृदयांबुजे सांबशिवविग्रहाविर्भावभावनापक्षे तस्य सदाशिवहृदयांबुजे अवस्थापनं स्वाभिमुखीकरणम् । इत्यादि सर्वमुपपद्यतेतराम् । शरीरशरीरिणोरभेदप्रतिपत्तिरूप ममूर्तीकरणं तु सांबशिवविग्रहाविर्भावपक्ष एवोपपद्यते । स्वाभिमते लिङ्गादावावाहिते सदाशिवविग्रहे पूजार्थमभिव्यक्तिं प्रार्थयमानस्य पूजकस्यानुग्रहार्थं शिवाभिन्नसच्चिदानन्द एवाचिन्त्याद्भुततदीयशक्तिमहिम्ना करकमौक्तिकाद्याकारेण जलबिन्दुरिव सकलावयवसंपूर्णसांबशिवविग्रहाकारेणाभिव्यज्यत इति शिवपुराणादिमर्यादा । एवं चिदानन्दाकारपरमशिवविग्रहप्रभाधवळितरूपादेव नानावर्णाष्टत्रिंशत्कलामयस्यापि सदाशिवविग्रहस्य स्फटिकवर्णत्वभावनोपपद्यते ।

सदाशिवस्य तत्पुरुषादिवक्त्राणां पीतनीलसितारुणवर्णत्वं तु पूर्वादिदिक्पतीना मिन्द्रयमवरुणकुबेराणां तत्तत्कार्योपयोगिपीतनीलसितारुणवर्णस्थिरीकरणार्थं तत्तद्वर्णानुकरणप्रयुक्तम् । एवंरूपे परमशिवस्यावाहने क्रियमाणे ऊर्ध्वाभिमुखस्य सदाशिवेशानवक्त्रस्य तत्पुरुषवक्त्रवदाविसर्जनं प्राङ्मुखत्वं भावनीयम् । आवाहनाद्यमृतीकरणान्तसंस्कारं सांबसदाशिवविग्रहाभिव्यक्तिपक्षे सदाशिवमूर्तिमध्य एव कर्तव्यम् । तत्रैव परमशिवस्यांबिकायाश्च प्रत्येकं पदार्थानुसमयक्रमेण पाद्याद्युपचाराश्च कर्तव्याः । सदाशिवमूर्तौ परमशिवचैतन्यमात्रावाहनपक्षे तदावाहनानन्तरं पाद्यादि । मनोन्मनीमूर्तौ अंबिकां चावाहनादिभिस्संस्कृत्य पाद्याद्युपचारैः पूजयेत् ॥

पाद्यादिप्रकारः ॥

वामहस्तेन सत्रिपदीकं पाद्याचमनार्घ्यपात्रमुल्लिख्य पाद्यमीश्वरतत्त्वान्त माचमनं सदाशिवतत्त्वान्त मर्घ्यं शिवतत्त्वान्तञ्च विभाव्य पाद्यादिकं पूजकस्येश्वरसदाशिवतत्त्वप्रापकंच ध्यात्वा मूलाधारा दुत्थितं प्रासादादिमन्त्रं पाद्यादिक्रमेण भ्रूमध्यब्रह्मरन्ध्रहृदयान्तपर्यन्तं मुच्चरन्तं विभावयन् हां हौं शिवायेति मन्त्रक्रमेण नमस्स्वाहास्वधान्तमुच्चारयन्सद्योजातादिक्रमेण सपुष्पेणोत्तानेन दक्षिणकरांगुष्ठमध्यमानामिकाग्रेण श्रीपादयोस्सव्यवामक्रमेण पाद्यं मुखेषु तत्पुरुषादिक्रमेणाचमनं मूर्धस्वीशानादिक्रमेणार्घ्यं च दद्यात् । सुगन्धि पुष्पं ज्ञानमयं शिवसायुज्यहेतुंच ध्यात्वा मन्त्रं द्वादशान्तोपरिस्थितशिवपर्यन्तमुच्चरन्तं विभाव्य वौषडन्तमन्त्रेण मूर्द्धस्वीशानादिक्रमेण निवेदयेत् । अंबिकाया अपि पाद्यादिकं तत्तत्त्रैव समये पदार्थानुसमयेन दद्यात् । एवं गन्धादिष्वपि द्रष्टव्यम् । तत्र शिवायैनम श्शिवायै स्वधेत्यादयो मन्त्रा इति विशेषः । ततः स्वाहान्तमूलेन

धूपदीपौ पूर्वोक्तप्रकारेणाचमनार्घ्यंच शिवाभ्यां दत्वा अस्त्रमन्त्रेणापि वस्त्रेण पिण्डिकाधोभागं वामहस्तेन स्पृशन्नेव दक्षिणहस्तेन पुष्पं गृहीत्वा तेन पुष्पेण पूर्वार्चित मपोह्य तत्पुरुषंच विसृज्य पूर्वोक्तप्रकारेणाभ्यङ्गादिकं सर्वं मनसा विभाव्य हां शिवतत्त्वायनम इति अर्घोदकाबिन्दुना संप्लाव्य पूर्ववत्पाद्याचमनार्घ्याणि दत्वा स्वाहान्तमूलेन वस्त्रद्वय मुपवीतद्वयं च साचमनं दत्वा हामात्मतत्त्वाधिपतये शिवायनमः । हां विद्यातत्त्वाधिपतये शिवाय नमः । हां शिवतत्त्वाधिपतये शिवायनमः इति पुष्पाञ्जलित्रयं शिवायै नम इति देव्यै पुष्पाञ्जलिञ्च कृत्वा संभावितैर्मनसा विभावितैश्च हेमांबरकटकमकुटकर्णिकाङ्गदकेयुरादिभि राभरणैर्नमोन्तमूलमन्त्राभ्या मलङ्कृत्य गन्धपुष्पाणि समर्पयेत् । तत्र गन्धं हिमजलघृष्टसमभागगोरोचनाकुङ्कुमचन्दनैला कर्पूरकृष्णागरुदारुकुष्ठकस्तूरिकाक्षोदोवा। समभागचन्दनागरुकर्पूरकुंकुमपत्रजलोशीरक्षोदोवा। समभागेनतदर्धेन तदर्धेनवा कर्पूरेणयुक्तचन्दनागरुकुष्ठकुंकुमक्षोदोवा । समभागचन्दनागरुकर्पूरकुकुंमक्षोदोवा। समभागचन्दनकर्पूरमृगमदकुकुंमक्षोदोवा । फलस्य निष्कप्रमाणांशेन यथासंभवमात्रेण कर्पूरादियुक्तचन्दनक्षोदोवा । केवलचन्दनक्षोदोवा। केवलविल्वखण्डक्षोदोवा । केवलकृतमालखण्डक्षोदोवा । सर्व एव गन्धाश्शिवस्यातिप्रियकराः । केवलजलघृष्टकेवलदेवदारुगन्धोऽपि कल्पपर्यन्तं शिवलोकप्राप्तिकरः । केवलविल्वखण्डोऽपि अत्र महदैश्वर्यप्रदाय परत्र शिवप्राप्तिकरः । केवलकृतमालगन्धोऽपि दीर्घमायुः प्रदाय परत्र गाणापत्यप्राप्तिकरः । एवंभूताश्चन्दनगन्धाः फलतोद्विगुणाः । शुक्लागरुश्चन्दनात् षट्गुणः । ततः कृष्णागरुर्द्विगुणः । तस्माच्चतुर्गुणं कुंकुमम् । तत्र प्राग्गणितप्रकारेण कर्पूरादियोगेन भूयान्विशेषः । एवंभूतेषु गन्धेषु संपन्न गन्धार्घ्यपात्रेषु निधाय देवस्यानुलेपनोचितानि ललाटा-

दीन्यङ्गानि भावयन् लिङ्गपीठिकापर्यासं लिङ्गपर्यासं यथालब्धंवा गन्धं हृदयमन्त्रेण समर्पयेत्। ततो विंशत्यंगुळविस्तारे अष्टांगुळोत्सेधे अष्टांगळोत्सेधविस्तारपादे पार्श्वद्वयगताष्टांगुळनाळे नाळपादरहितपिधानसंयुते तदर्धप्रमाणेवा सुवर्णादिमये पत्रादिरचिते वा पात्रे निहितै र्मुकुळपतितशीर्णाघ्रातसजन्तुकाङ्गसंस्पृष्टत्वतान्तुवेष्टित पर्युषितवस्त्रसमाहृतत्वादिदोषरहितै स्सम्यक्शोधितैः मोचितवृन्तैः प्रशस्तपुष्पैः मूलमन्त्रेण मृगमुद्रया ऽर्चयेत् । प्रशस्तानिच पुष्पाणि द्रोणवत्पुन्नागमंदारनन्द्यावर्त श्रियावर्तकरवीरार्कवकुळ कुरवकलोध्रशतपत्र धुत्तूरपलाशपाटल चंपककृतमालकर्णिकार मुनिमातुळिङ्गार्जुन प्रियंगुदेवदारु तमालाग्निगन्ध मरुवकाशोकभद्रापराजिता कतलकल्हार रक्तोत्पलनीलोत्पल कुसुम्भकुंकुम गिरिपुष्पकुशापामार्गभृङ्गराजपूगसरळकोविदार कदम्बाम्रमधूक जम्बूहेमाकुलिगुच्छामुसलीवेजिकाजाजी मल्लिकापट्टिकामालती लक्ष्मीनिर्गुण्डीविष्णुक्रांतिकदळीशारिबादेवताळी द्विकण्ठी ग्रन्धिपर्णी प्रभृतीनि । एतेषु शुभ्रवर्णानि पुष्पाणि सात्विकानि मुक्तिप्रदानि । अरुणवर्णानि राजसानि भोगप्रदानि । पीतवर्णानि मिश्राण्युभयप्रदानि सर्वकार्यसिद्धिकराणि पुत्रपौत्रवृद्धिकराणिच । कृष्णवर्णानि नीलोत्पलव्यतिरिक्तानि तामसानि वर्जनीयानि । तान्यप्यतसीकूरंड विष्णुक्रान्तादीनि विशेषविहितानि पुष्टिप्रदानि । तत्र सर्ववर्णानि पुष्पाणि समाहृत्याभ्यर्चन मुत्तमम् । कृष्णवर्णैर्विना मध्यमम् । सितरक्तादिभिर्वर्णै रेकवर्णैश्च पुष्पैरर्चन मुत्तरोत्तरं कनिष्ठम् । मालिकास्तु प्रत्येक मेकैककवर्णैः पुष्पैर्निर्मिताः श्रेष्ठाः । अनेकवर्णपुष्पनिर्मिता मध्यमाः । पत्रपुष्पनिर्मिताः कनिष्ठाः । अर्क करवीरपुष्प बिल्वपत्र गन्धपत्रिका पुण्डरीक शतपत्र सहस्रपत्र बक धुत्तूर द्रोणापामार्ग कुश शमी कृतमाल शङ्ख व्याघ्री सदाभद्रा कृष्णानि निर्गुण्डी

बृहती श्वेतार्क बृहद्द्रोण नीलोत्पलान्युत्तरोत्तरं सहस्रगुणफलानि । तत्रार्कपुष्पं दशसुवर्णदानतुल्यम् । नीलोत्पलं सहस्र सुवर्णपुष्पार्च्चनतुल्यम्। तुळसी कृष्णतुळसींद्रवल्ली विष्णुक्रांती श्यामा प्रियंगुनृपपुण्ड्रपुष्पादीनि अर्कसमानानि । नन्द्यावर्तविजयशतपत्र मन्दार चूतमधुक श्वेतगिरिकर्णीमालती कदळी शारिबादिपुष्पाणि करवीरसमानि । लक्ष्मी सहदेवी नागदंति चंपकादीनि बिल्वपत्रसमानि । पाटलवकुळादीनि पद्मसमानि । जूति मल्लिका मधूर शङ्खनाग सूर्यावर्त सिंहकेसर महाभद्रादिपुष्पाण्यपामार्गसमानि । जपा कदम्ब पुन्नाग पुष्पादीनि द्रोणसमानि । अशोकश्वेतमन्दारपुष्पाणि यवगोधूम नीवार शालिवेणु तिलक मुद्ग श्लिष्मावोशीरमाषांकुराणि सप्तदिनप्रवृद्धानिच कृतमालपुष्पसमानि । वज्रपद्मराग मरकतमौक्तिकेन्द्रनील महानील सूर्यकान्तेन्दुकान्तानि पुष्पाणि सहस्रसुवर्णपुष्पाणि करवीरनीलोत्पलसमानि । नीलोत्पलं सर्वोत्तममिति सर्वागमसिद्धम् । क्वचिदागमे करवीर मन्यत्र बकपुष्पमपरत्र गिरिपुष्पं सर्वोत्तर मित्युक्तम् । पद्मं सर्वोत्तममिति केचित् । कालविशेषेण पुष्पविशेषप्राशस्त्यम् । यथा—कदम्ब चम्पक कल्हार पुन्नाग कुश बृहती पुष्पाणि वसन्तऋतौ शिवपूजाया मश्वमेधफलप्रदानि । ग्रीष्मे पाटली मल्लिका शतपत्रपुष्पाणि अग्निष्टोमतुल्यानि । प्रावृषि कमल मल्लिकापुष्पाण्यश्वमेधसदृशानि । शरदि धुत्तूर कल्हार सुजात नीलोत्पलानि सत्रयागफलप्रदानि । हेमन्ते करवीर सुजातनीलोत्पलानि शतक्रतुसमानि । शिशिरे कर्णिकारपुष्पं सर्वक्रतुफलप्रदम् । तथा ज्येष्टादिषु द्वादशसु मासेषु अर्कबिल्वापामार्ग द्रोणनीलोत्पल पङ्कजकृतमाल बृहती व्याघ्र शमी चम्पक पाटली पुष्पाणि प्रशस्ततमानि । तथा नन्द्यावर्त श्रियावर्तश्वेतार्क श्वेतकमल पलाश पुन्नाग मालती पट्टिकारक्तागस्त्य वकुळ लक्ष्मी द्विकण्ठी वेजिका पाटल पलाशाशोक कदळी शंखिनी पुष्पाणि प्रातःकालपूजायां प्रशस्तत-

मालि । द्रोणकरवीर कृतमाल धुत्तूर व्याघ्री बृहती पाटलकमलोत्पल चंपककुरण्डपुष्पाणि मध्याह्नपूजायां । चम्पकधुत्तूरमालतीमल्लिकाबोजिकबलकर्णिसहभद्रा भद्रामसल्यतसीशमीशंखपुष्पाणि गन्धपत्रञ्च सायङ्कालपूजायां । जाती नीलोत्पलकनककदम्ब स्थलकमल केतकपूग पुन्नाग दन्ति ह्रीबेरं बिल्वपत्रं चार्धरात्रपूजायाम् । कदम्बकनक जातीपुष्पाणि रात्रावेवसमर्पणीयानि । माधव्यानन्दयूथिका मदयंतिका शिरीषसर्ज बन्धूक विहित कुमुद डाडिम लाङ्गली श्रीपर्णी कार्पास निम्ब कूश्माण्ड शल्मली शिन्दितवोट गिरिवट मत्स्याक्षि कपित्थतिंतृणी पुष्पादीनि वर्जनीयानि । केतकीनिषेधोऽर्धरात्रव्यतिरिक्तविषयः । कदम्बनिषेधो दिवाविषयः । गिरिकर्णिकानिषेधोनीलगिरिकर्णिकाविषयः । किंशुकनिषेधः कण्टककिंशुकविषयः। एवं जपावकुळादीनामपि क्वचिद्विहितानामागमान्तरे निषेधस्य फलभेदानुसारिणा पूजाभेदेनवा तत्तत्पूर्वाचारप्राप्ततत्तदागमानुसारिपूजाभेदेनवा पूजनीयमूर्तिभेदेन वा व्यवस्था द्रष्टव्या । निषिद्धान्यपि पुष्पाणि मण्टपालंकारादिषु ग्राह्याणि । पत्रेषु बिल्वतुळसी कृष्णतुळसी दर्भ दूर्वापामार्ग करवीर नन्द्यावर्त शमीसहा धातकी विष्णुक्रान्ति भद्रा महाभद्रा जातीजम्बुकबदरोदुंबर चूत पलाश मुनिद्वय टङ्कोलकोरंड गिरिकर्णीद्वय रुद्रवर्णी भूपत्म ह्रीबेर मदनमरुवकद्रोणद्वय सिन्दुवार शंखिनी गोक्षुर वकुळ कृतमालादिपत्राणि प्रशस्तानि । पुष्पेषु नीलोत्पलबत्पत्रेषु बिल्वपत्रं प्रशस्ततमम् । तुळसीद्वयं प्रशस्ततरम् । येषां पुष्पाणि प्रशस्तानि तेषां पत्राण्यपि प्रशस्तान्येव । पद्म नीलोत्पल कुटज चंपक जाति करवीर नन्द्यावर्त श्रियावर्तबिल्व बृहतीद्वय पाटलीपुष्प बिल्वपञ्चक तुळसीद्वय दूर्वागस्त्य गन्धपत्राकारं शिवपुष्पपत्रेषु स्वाभिमतं यत्किंचित्पत्रपुष्पाकारं वा सौवर्णपुष्पं पत्रञ्चातिप्रशस्तम् । अञ्जलिपूरकै स्सुवर्णपुष्पैर्विद्यादेहांशयावाहनं अष्टोत्तरश-

तेन एकाशीत्या पञ्चाशता पञ्चविंशत्या वा सुवर्णपुष्पैः प्रतिदिनमर्चनं चासङ्ख्येयफलदम् । सुवर्णपुष्पसंपादनाशक्तौ सुवर्णशकलैर्वा रजतपुष्पैर्वाऽर्चनीयम् । सुवर्णपुष्पस्य नास्ति निर्माल्यदोषः । वत्सरादूर्द्ध्वं तन्निर्माल्यम् । वत्सरादूर्ध्वमपि पञ्चगव्येन संशोध्य पुनरर्चनीयम् । एवं नीलोत्पल पलाश बक करवीर गिरिपुष्प बिल्वपत्र तुळसीनामपि नास्ति निर्माल्यत्वम् । पुष्पाणि पत्राणि च स्वारामसम्भवान्युत्तमानि । वन्यानि कृतानि पारारामोद्भवानि पूजाकाले याचितानि पुष्पाणि उत्तरोत्तरमपकृष्टानि । देवारामोद्भवानि तु वर्जनीयान्येव । पुष्पालाभे यानि पुष्पाणि शिवार्हाणि तेषांपत्रैरेवार्चनीयम् । पत्राणामप्यलाभे तेषां फलैरर्चनीयम् । फलेषु च बीजपूर जंबीर कदळी डाडिमादीन्यर्चनाया मतिप्रशस्तानि । फलाना मप्यलाभे तिलतण्डुल सिद्धार्थै रर्चनीयम् । कृष्णतिलैश्शिवार्चनं सकलपातकहरम् । एवं मूलमन्त्रेण पुष्पादिभिरभ्यर्च्य हां शिवासनाय नमः । हां हं हां शिवमूर्तये नमः । हां हौं शिवाय नमः । हों ईशानमूर्ध्नेनमः । हें तत्पुरुषवक्त्रायनमः । हुं अघोरहृदयायनमः । हिं वामदेवगुह्याय नमः । हं सद्योजातमूर्तये नमः । इत्यासनमूर्तिं मूलैः पञ्चब्रह्ममिश्चाष्टपुष्पिकयाऽभ्यर्च्य हां हृदयायनमः । इत्यादिभि रंगैरभ्यर्चयेत् । ततो नाम्नां सहस्रेण शतेनवाऽर्चयेत् । तदवसराभावे शर्वाय क्षितिमूर्तयेनमः । भवाय जलमूर्तये नमः । रुद्राय तेजोमूर्तयेनमः । उग्राय वायुमूर्तये नमः । भीमाय अकाशमूर्तये नमः । पशुपतये यजमानमूर्तये नमः । ईशानायसूर्यमूर्तयेनमः । महादेवाय सोममूर्तये नमः । शिवाय नमः । महेश्वराय नमः । रुद्राय नमः । विष्णवे नमः । पितामहाय नमः । संसारवैद्याय नमः । सर्वज्ञाय नमः । परमात्मने नमः । इति नामाष्टकेन वाऽर्चयेत् । प्रभवेनमः । शंभवेनमः । उमापतये नमः इति नामत्रयेण वाऽर्चयेत् । नमोनीलकण्ठायनम इति नाम्ना-

केनाभ्यर्च्य यथासंभवं पुष्पमालिकाभि रलंकुर्यात् । मालिकाश्च शतादिसुवर्णपुष्परचिताः सहस्रादिनीलोत्पलरचिताः करवीरसितांभोज विजयासितपाटल पुन्नाग श्वेतमन्दार नागकेसर चंपकरचिताश्च प्रशस्ताः । ताश्च विचित्रपुष्पांतररचितमालिकाश्च उमाधारपार्श्वयो स्समृद्धा बद्धव्याः । लिङ्गमौळौ हस्तेमणिसुवर्णनिर्मितं पुष्पनिर्मितं वा एकद्वित्रिचतुरभूमिक मिंडाख्यं प्रवृत्तदाम समर्पणीयम् । एवं पुष्पोपचारानन्तरं धूपदीपोपचारः ॥

तत्प्रकारः— सुवर्णरजताताम्रारकूटान्यतमनिर्मितं चतुरंगुळायतं तदर्धमानोत्सेध मष्टांगुळोष्टं पश्चाद्भागे पद्मदळाङ्कित द्व्यंगुळकण्ठ द्व्यंगुळोन्नत सुवृत्तखुराकारपादं द्व्यंगुळानाहेन पूर्वोक्तलक्षणपादयुक्तेन वक्त्रनाळेन समन्वितं अनेकसुषिरेणैकसुषिरेण वा कमलमुकुळाकृतिना पिधानेनान्वितं धूपपात्रं निर्मलेनांगारवह्निनाऽऽपूर्य तस्मिन्धूपद्रव्यं निक्षिप्य धूपपात्रंपिधाय निरीक्षणादिभिस्संस्कृत्य गन्धपुष्पैरभ्यर्च्य धूपमुद्रां प्रदर्श्य धूपपात्रं दक्षिणहस्तेनादाय वामहस्ते शुद्धकांस्यनिर्मितां चतुःपञ्चषडंगुलान्यतमोत्सेधां तावदायामां तावन्मानजिह्वां तत्त्रिगुणानाहा मर्धांगुळोष्ठा मुपपाट्टिकायुक्ता मेकांगुलद्व्यंगुल सार्धद्व्यंगुळशिखरा मर्धांगुलकण्ठां त्र्यंगुलानाहां त्रिचतुःपञ्चषडंगुलदैर्घ्यनाळा मुपरिशूलपद्मवृषभशङ्खचक्रान्यतमचिह्नयुक्तां घण्टां घोषयन्नेव देवस्य घ्राणसमीपे ओं हां हौंशिवाय धूपं स्वाहेति धूपं प्रदर्श्य तदुपरि धूपपात्र मुद्वृत्य तद्धूमयन्नेव किरीटे बिन्दुद्वयान्वितपार्श्वदण्डाकारं नादं मुखवृत्ते बिन्दुदेहे हकारं बाह्वो रौकारं पादयोरूकारं च धूपपात्रभ्रमणेन भावयेत् ॥

धूपद्रव्यम्—कर्पूरागरु चन्दनतक्कोलजातिफल लवङ्गसिल्हक मांसीमुस्तापत्रचूर्णं यक्षकर्दमाख्यम् । चन्दनागरु कर्पूरैला लवङ्ग त्वक्पत्रपुष्प सिल्हक जटामांसीचूर्णं प्राजापत्यनामकम् । चन्दनागरु कर्पूर

कस्तूरी लवङ्गलक्सिल्हक सिता मुस्तान्वूर्णं विजयाख्यम् । कर्पूर कृष्णागरुह्रीबेर कुंकुमकुन्दुरूत्तुरुष्कबिसचन्दनचूर्णं क्रमादेकद्वित्रिचतुःपञ्चषट्सप्तभागमधुमिश्रं शीतांशुनामकम् । चन्दनागरु कर्पूरसिल्हक सर्जरसकुष्ठ मुस्ताचूर्णं कल्याणनामकम् । चन्दनागरु कस्तूरी मुस्तासिल्हक चूर्णममृताख्यम् । तक्कोल पूगकर्पूरजातीफल लवङ्ग चूर्णं सुगन्धाख्यम् । एवमादीनि पृथक्पृथङ्नाम्ना प्रसिद्धानि धूपद्रव्याणि । इत्थं चन्दनागरु कर्पूर कुष्ठ गुग्गुळुचूर्णं घृतमधुयुक्तं चन्दनागरुकर्पूरकुष्ठचूर्णं शर्कराघृतमधुयुक्तं कर्पूरागरुचन्दननिर्यासचूर्णं कुंकुमा देकचतुष्पट्सप्तभागमगरुनिर्यासचन्दनचूर्णं क्रमादेकद्वित्रिचतुर्गुण मीषत्कर्पूरमिश्रितं मधुयुक्त मगरुचन्दनोशीरचूर्णं मधुयुक्तं कुष्ठचन्दनचूर्णं घृतयुक्तं गुळविल्वपत्रचूर्णं गुग्गुळुचूर्णघृतयुक्तं केवलमेव वा गुग्गुळुनिर्यासचन्दनागरुसौगन्धिकान्यतमचूर्णं च धूपद्रव्यमिति ॥ तत्र केवलगुग्गुलुधूपः सप्तजन्मकृतपापहरः । चन्दनधूपस्सर्वपापहरः । सौगन्धिकधूपस्सर्वकार्यार्थसाधकः। कृष्णागरुधूपस्सर्वपापहरः । श्वेतागरुधूपो मुक्तिप्रदः । लाक्षाकस्तूरीधूपः चतुर्वेदाध्यायिसद्ब्राह्मणजन्मप्रदः । घृतामिश्रगुग्गुलुधूपोमासार्धसमर्पितः कल्पकोटिसहस्रपर्यन्तं शिवपुरभोगस्य सार्वभौमजन्मत्वप्रापकः । द्विसहस्रफलंमहिषाक्ष गग्गुळुधूपः तालवृक्षचूर्णेन सहितः शिवसायुज्यप्रदायकः। ईशानादिमुखपञ्चके क्रमात् शीतारि कृष्णागरु शुक्लागरु सौगन्धिक गुग्गुलुधूपाः प्रशस्ताः ॥

एवं धूपोपचारानन्तरं दीपोपचारः—तस्य पात्रं धूपपात्रोक्तपादनाळसहितं त्र्यंगुळप्रमाणं गजोष्ठाकारञ्च । वर्तिका कर्पूरमयीवस्त्रखण्डमयी तंतुखण्डमयी कार्पासमयीवा चतुरंगुळदीर्घा चतुस्त्रिद्व्येकांगुळज्वाळानुगुणपरिणाहा कार्या । वस्त्रखण्डादिमयी चेत् उत्तमादिक्रमेण सति

संभवे कर्पूरागरुचन्दनचूर्णादिगर्भा कार्या । तत्र च कपिलाघृतमुत्तमम् । गव्यांतरघृतं मध्यमम् । अजाघृतं तिलतैलमधमम् । उष्ट्रमहिष्यादिघृतं वृक्षबीजादिभवं च वर्जनीयम् । यद्वा—गोघृतमात्रमुत्तमम् । अजाघृतं महिषीघृतं च मध्यमम् । पूतिगन्धनिंबकरंजैरंडादितैलं वर्जनीयम् । तैलमात्रमधमम् । एवमुक्तलक्षणपात्रविहितवर्त्यारोपितं दीपं निरीक्षणादिभिस्संस्कृत्य पुष्पैरभ्यर्च्य दीपमुद्रां प्रदर्श्य दीपमुद्भृत्य घण्टां घोषयन्नेव हां हौं शिवाय दीपं स्वाहेति नेत्रेषु प्रदर्श्य धूपपात्रवत् किरीटादिपादान्तं तद्वर्णविन्यासभावनया दीपपात्रं भ्रमयेत् । ततश्शिवायाचमनीय मर्घ्यंच दत्वा देवं सन्तुष्टं ध्यात्वा भगवन्नाज्ञां देहि भोगांगानि पूजयामीति विज्ञाप्य आवरणपूजां कुर्यात् ॥ **अथ आवरणार्चनम् ॥**

पञ्चब्रह्मपडङ्गैश्च प्रथमावरणम् । विद्येश्वरैर्द्वितीयम् । गणेश्वरैस्तृतीयम् । लोकपालैश्चतुर्थम् । तदायुधैः पञ्चमम् । एतानि पञ्चावरणानि शिवासनपद्मस्य कर्णिकायां शिवमभ्यर्च्य तस्यदळमूलेषु दळमध्येषु दळमध्याग्रयो र्मध्येषु दळाग्रेषु तदधोभागेषुच पूजयेत् । यद्वा— शिवासनपद्मदळमूलरूपेषु लिङ्गमूलभागेषु तद्दळाग्ररूपेषु पीठोपरिदेशाग्रभागेषु पीठकण्टे पीठपादे ब्रह्मशिलास्थानीये पद्मपीठे चार्चयेत् । होमीशानमूर्ध्वे नमः । स्फटिकवर्णं त्रिशूलाभयपाणि मुमासहित मीशानं पूजयामि । हें तत्पुरुषवक्त्राय नमः । कनकवर्णं पीतांबरोपवीतं मातुळङ्गाक्षसूत्रधारिणं गौरीसहितं तत्पुरुषं पूजयामि । हुं अघोरहृदयाय नमः । मेघवर्णं बभ्रुश्मश्रुशिरोरुहं दंष्ट्राकराळवदनं सर्पवृश्चिककपालमालाभरणं खट्वांग कपालखेटक पाशान्वितवामकरचतुष्टयं त्रिशूलपरशुखड्गदण्डान्वितदक्षिणकरचतुष्टयं गङ्गासहित मघोरं पूजयामि । हिं वामदेवगुह्याय नमः । अरुण मरुणवस्त्रमाल्योपवीतं खड्गखेटधरं गणांबिकासहितं वामदेवं पू-

जयामि । हं सद्योजातमूर्तये नमः । धवळवर्ण धवळस्रग्गन्धभूषणोष्णी-षांवरधरं वराभयकर मंविकासहितं सद्योजातं पूजयामि इति क्रमादीशानें-द्वयमकुबेरवरुणादि दिक्ष्वीशानादितत्तत्पूजावेळायां ऊर्ध्ववक्त्रहृदयगुह्यपाद-रूप तत्तत्स्थान मंकुशमुद्रयाकृष्य दीपात्प्रवर्तितप्रदीपरीत्याऽभिन्नान्भावयि-त्वाऽर्चयेत् । ईशानाद्याः पञ्चापि शूलटङ्काभयमनोहरकरचतुष्टया वा ध्यातव्याः । एवमागमान्तरप्रसिद्धान्यपि तेषां ध्यानानि द्रष्टव्यानि । हां हृदयायनमः । हिं शिरसे नमः । हुं शिखायै नमः । हैं कवचायनमः । हौं नेत्रत्रयायनमः । हः अस्त्राय नमः । इति चन्द्र चामीकर सिन्दूर भृ-ङ्ग विद्युदग्निवर्णान् पद्मासनस्था नर्धेन्दुजटामकुटधारिण श्चतुर्वक्त्रान् प्रति-वक्त्रं त्रिलोचनान् कपालशूलवरदाभयहस्तान् वामिनी नीलिनी चक्रिणी शङ्खिनी खड्गिनी गदिनी शक्तिसहितान् हृदयशिरश्शिखाकवचदेवान् पू-जयामीति हृदयशिरश्शिखादितत्तत्स्थानेभ्योऽकुशमुद्रयासमाकृष्याग्नेयनैर्ऋत-वायव्येशान कोणस्थदळेषु पूर्वादिचतुर्दळा न्यग्रेष्वस्त्रंच पूजयेत् । ईशा-नदळे ब्रह्मस्त्रीशानं अङ्गेषु नेत्रे शिरसिच क्रमेणोत्तरोत्तरदिक्स्थतया पूज-येत् । अथवा कर्णिकायां देवस्य पुरस्तादीशानं नेत्रञ्च पूजयेत् । ने-त्रमस्त्रवदिक्षु वा पूजयेत् ॥

अथद्वितीयावरणम्— अनन्ताय भूमिसहितायनमः । सूक्ष्माय स्वाहासहिताय नमः । शिवोत्तमाय स्वधासहितायनमः। एकनेत्राय क्षांति-सहितायनमः । एकरुद्राय पुष्टिसहिताय नमः । त्रिमूर्तये श्रीसहितायनमः। श्रीकण्ठाय कीर्तिसहिताय नमः । शिखण्डिने मेधासहिताय नमः । इति हेमाग्नि मेघ भृङ्गेषु हिम विद्रुम स्फटिकवर्णान् वरदाभयज्ञानरुद्राक्षमाला-धारिण स्त्रिणेत्रान् शिवज्ञानावतारकान् स्वस्वशक्तिसहितान् विद्येश्वरान् पूजयामीति पूर्वाद्यैशानादिक्रमा द्दिग्विदिक्षु पूर्वादीशानकोणान्तेषु वा पूज-

येत्। कुण्डलीसहिताय नन्दिकेश्वराय नमः। अरुणवर्णं त्रिशूलाक्षसूत्रवराभयकरं कुण्डलीसहितं नन्दिनं पूजयामि। पद्मिनीसहिताय महाकालाय नमः। पीतकृष्णवर्णं बभ्रुश्मश्रुशिरोरुहं शूलकपालखड्गखेटधारिणं पद्मिनीसहितं महाकालं पूजयामि। ह्लादिनीसहिताय भृङ्गिणे नमः। श्वेतवर्णं निर्मांसविग्रहं दण्डाक्षसूत्रधरशिखं शिवावलोकनतत्परं ह्लादिनीसहितं भृङ्गिणं पूजयामि। भृङ्गिणीसहिताय गणपतयेनमः। रक्ताङ्ग पाशांकुश दन्तपक्वाम्रफलधारिणं भृङ्गिणीसहितंगणपतिं पूजयामि। भद्रासहिताय वृषभाय नमः। स्फटिकवर्णं धर्मस्वरूपं शिवध्यानपरं भद्रासहितं वृषभं पूजयामि। देवयानीसहिताय स्कन्दायनमः। कनकवर्णं बालवेषं शक्तिकुक्कुटवराभयहस्तं देवयानीसहितं स्कन्दं पूजयामि। अम्बिकायै नमः। श्यामवर्णां सिंहवाहनां शूलादर्शकरद्वया मुमां पूजयामि। रूपिणीसहिताय चण्डेश्वराय नमः। मेघवर्णं चतुर्वक्त्रं कमण्डल्वक्षसूत्रशूलपरशुधारिणं सर्पकङ्कणोपवीतं रूपिणीसहितं चण्डेश्वरं पूजयामि। इति पूर्वादीशानकोणपर्यन्त मर्चयेत्। यद्वा—वृष नन्दि गणेश महाकाळ स्कन्द भृङ्गिगौरीचण्डान् नन्दिगणपति महाकाळ भृङ्गि वृष स्कन्दगौरी चण्डान्वा पूर्वादिक्रमेण पूजयेत्। अथवा गौरी चण्डेश्वर नन्दि महाकाळ गणेश वृष भृङ्गि स्कन्दावा गौरीचण्डेश्वर महाकाळ वृषभ गणेश स्कन्दनन्दि भृङ्गिणोवा उत्तरादिक्रमेण पूजनीयाः॥ उमावृषभगणपति नन्दीश महाकालभृङ्गि चण्डस्कन्दाः कुबेरशक्र यमवरुण निर्ऋतिवाय्वीशानादिदिक्षु वा पूजनीयाः। एतेषां ध्यानभेदाश्च तत्तदागमप्रसिद्धा द्रष्टव्याः॥

एवं गणेश्वरैस्तृतीयावरणं संपूज्य लोकपालैश्चतुर्थावरणमर्चयेत्। इन्द्राय शचीसहिताय नमः। सुवर्णवर्ण मैरावतारूढं वज्रांकुशवराभयपाणिं शचीसहित मिन्द्रं पूजयामि। अग्नये स्वाहासहिताय नमः। रक्तवर्ण

कमण्डल्वक्षसूत्रशक्तिवरमुद्रान्वितं मेषारूढं स्वाहासहित मग्निं पूजयामि । यमाय कालकंठीसहिताय नमः । कृष्णवर्णं दण्डपाशवराभयधारिणं महिषारूढं कालकण्ठीसहितं यमं पूजयामि । दाहिनीसहितायनैर्ऋतायनमः । रक्तवर्णं खड्गखेटकवराभयधारिणं भूतारूढं दाहिनीसहितं नैर्ऋतंपूजयामि। वरुणाय भोगिनीसहिताय नमः । चन्द्रवर्णं पाशकमलवराभयकरं मकारारूढं भोगिनीसहितं वरुणं पूजयामि । वायवे घोरासहिताय नमः । धूम्रवर्णं ध्वजकमलवराभयधारिणं मृगारूढं घोरासहितं वायुं पूजयामि । कुबेराय गंभीरिणीसहिताय नमः । स्वर्णवर्णं गदानिधिवराभयकरं खर्वविग्रहं मनुष्यारूढं गंभीरिणीसहितं कुबेरं पूजयामि । ईशानाय हर्षिणीसहिताय नमः । चन्द्रवर्णं शूलपाशवराभयकरं त्रिणेत्रं वृषभारूढं हर्षिणीसहित मीशानं पूजयामीति प्रागादिक्रमेण पूजयेत् । ब्रह्मणे सावित्रीसहितायनमः। सुवर्णवर्णं चतुर्वक्त्रं कमण्डल्वक्षसूत्रस्रुग्दण्डधारिणं हंसारूढं सावित्रीसहितं ब्रह्माणं पूजयामि । विष्णवे लक्ष्मीसहितायनमः । विद्युद्वर्णं सहस्रफणालंकृतमनन्तरूपं शङ्खचक्रगदाकमलधारिणं कूर्मारूढं लक्ष्मीसहितं विष्णुं पूजयामीति ॥

इन्द्रेशानमध्ये निर्ऋतिवरुणमध्येच विधातृवैकुण्ठौ पूजयेत् । यद्वा यमस्य उत्तरभागे कुबेरस्य दक्षिणभागे च तौपूजयेत् ॥

अथलोकपालायुधैः पञ्चमावरणम्—प्रसन्नात्मशक्तिसहिताय वज्राय नमः । नानावर्णधरं दृढकर्कशविग्रहं वज्रमूर्द्धानं दीप्तं प्रसन्नात्मशक्तिसहितं वज्रं पूजयामि । शक्तये नमः । अरुणवर्णां वराभयकरां शिरसा शक्तिं बिभ्राणां योषिदाकारां शक्तिं पूजयामि । कोपात्मशक्तिसहिताय दण्डाय नमः । कृष्णवर्णं वराभयकरं लोहितलोचनं दण्डमूर्द्धानं कोपात्मशक्तिसहितं दण्डं पूजयामि । गुणात्मशक्तिसहिताय खड्गाय नमः । ख्या-

मवर्णं वराभयकरं मर्धलोचनं खड्गालंकृतमूर्द्धानं गुणात्मशक्तिसहितं खड्गं पूजयामि । कोमळात्मशक्तिसहिताय पाशाय नमः । किंशुकपुष्पवर्णं नाभेरधो भुजङ्गाकारं तदूर्द्ध्वं पुरुषाकृतिं सप्तफणोपेतमूर्द्धानं कोमळात्मशक्तिसहितं पाशं पूजयामि । विषात्मशक्तिसहिताय ध्वजायनमः । पीतवर्णं वराभयकरं विवृतास्यं मूर्ध्नि ध्वजान्वितं विषात्मशक्तिसहितं ध्वजं पूजयामि। गदायैनमः । पीतवर्णां योषिदाकारां गदोपेताशिरसं गदां पूजयामि । विकृतात्मशक्तिसहिताय शूलाय नमः । श्यामवर्णं त्रिशूलांकितमस्तक मञ्जलियुतं विकृतात्मशक्तिसहितं त्रिशूलं पूजयामि । महात्मशक्तिसहिताय पद्माय नमः । शङ्खवर्णं पद्मकोशांकितमूर्द्धानं महात्मशक्तिसहितं पद्मंपूजयामि । मङ्गळात्मशक्तिसहिताय चक्राय नमः । श्यामवर्णं शतारचक्रांकितमस्तकं मङ्गळात्मशक्तिसहितं चक्रं पूजयामि । इमे चावरणदेवाश्शिवाभिमुखा श्शिवमंत्रिकांच भक्त्यावीक्षमाणाः स्वासनेषूपविष्टा ध्येयाः । द्विभुजाश्चतुर्भुजाश्चैते हस्ताञ्जलिपुटावाध्येयाः । एवं पञ्चावरणपूजाशक्तौ पञ्चब्रह्मषडङ्गरूपमेकमावरण मर्चयेत् । तेषांच ब्रह्मषडङ्गदेवाना मावाहनस्थापनसन्निधान सन्निरोधन पाद्याचमनार्घ्यपुष्पदानाख्यं संस्काराष्टकं कार्यम् । यद्वा—आवाहनादि संस्काराष्टकं समुदितमेव स्मृत्वा प्रत्येक मर्घ्यमात्रं दत्वा पूरणतया ब्रह्मान्तं तत्तदर्घ्यावसाने क्रमेण सुरभिपद्मत्रिशूलमकरस्त्रगाख्यमुद्राः प्रदर्श्याङ्गानां नमस्कारमुद्रां प्रदर्शयेत् । पञ्चब्रह्मषडङ्गपूजनाशक्तौ केवलं ब्रह्मावरणमात्र मङ्गावरणमात्रं वाऽर्चयेत् । अथवा—तत्तत्स्थाने वामादिशक्तिं पूर्वादिदिक्ष्वभ्यर्च्य सदाशिवस्यांके वामभागे स्थितां मनोन्मनी मभ्यर्चयेत् । इत्थमावरणार्चनानन्तरं शिवमष्टपुष्पिकयाऽभ्यर्च्याचमनार्घ्याणि दत्वा मूलमन्त्रेण पुष्पं समर्पयेत् । शिवस्यावरणभावकृतशोभासिद्धये पञ्चब्रह्मषडङ्गादीनां शिवपृथग्भावेनार्चनायां

प्रसक्तस्य पूजातामसत्वदोषस्य परिहाराय शारदशशाङ्ककोटिसङ्काश परमामृतस्यन्दि परमशिवमयूखजालमग्नतया सर्वानप्यावरणदेवान् परमशिवैनैकवर्णान् परमशिवापृथग्भूतान् भावयेत् । ततश्शिवे धेनुमुद्रां महामुद्रांच प्रदर्श्य गन्धपुष्पैः वष्टामन्त्रमन्त्रेणाभ्यर्च्य सावरणाय देवाय धूपदीपौ प्रदर्शयेत् । एवमावरणार्चनं कर्तव्यं न कर्तव्यं वेति विकल्पितं केषुचि दागमेष्वात्मार्थपूजायां भोगाङ्गपूजनस्य निषिद्धत्वात् ॥

अथ नैवेद्यविधिः ॥

तत्र व्रीहिशालि प्रियंगु नीवार गोधूम वैणव यवाः प्रशस्ताः । तत्र व्रीहयः कनिष्ठा श्शालयो मध्यमाः इतरे श्रेष्ठाः । तत्रापि प्रियंगुनीवार गोधूम वैणवानि शतसहस्रलक्षानन्तफलान्युत्तरोत्तरं प्रशस्तानि । यद्वा शालयःश्रेष्ठाः यववैणवादयो मद्ध्यमाः व्रीहयः कनिष्ठाः । सिततण्डुलाश्शालयः इतरेव्रीहय इतिभेदः । आत्मार्थपूजायां कुडवादिं चतुर्द्रोणपर्यन्तमुत्तरोत्तरं प्रशस्तम् । पञ्चविंशत्युत्तरद्विशतसङ्ख्यैः व्रीहिभि रेका शुक्तिरुच्यते । शुक्तिद्वयं तलम् । तलद्वयं प्रकुञ्चम् । प्रकुञ्चद्वयं प्रसृतिः । प्रसृतिद्वयं कुडवम् । कुडवद्वयमञ्जलिः । अञ्जलिद्वयं प्रस्थम् । प्रस्थद्वयं पात्रम् । पात्रद्वय माढकम् । आढकद्वयं शिवम् । शिवद्वयं द्रोणम् । अथवा गुञ्जाद्वयं माषः । माषविंशतिर्निष्कम् । निष्काष्टकं पलम् । पलचतुष्टयं पादः । पादचतुष्टयं प्रस्थम् । प्रस्थचतुष्टय माढकम् । तच्चतुष्टयं द्रोणम् । द्रोणचतुष्टयावधिकान् नैवेद्यार्थं कल्पितान् केशकीटादिविरहितान् निर्मुक्ततुष कम्बुकणा नखण्डा नतिध्यावल्यशालि तण्डुलान् प्रशस्तवर्णगन्धरसै र्वस्त्रपूते जले मुहुर्मुहु निष्पीडनपूर्वकं षडङ्गक्षुप्पडङ्गमन्त्रैस्संशाळ्य सम्यग्वालुकादीन् संशोध्य पाकार्थं ते निहितेपुरोभ्य

धिकार्धाधिकं जलं प्राक्षिप्य गोमयोपलिप्ते प्रोक्षिते पक्षिदर्शनादिरहिते परिश्रिते वह्निष्कृताद्यगोचरे महानसे हृदयमन्त्रार्चितायां चुल्ल्यां वामदेवमंत्रेण उद्धृतं पाकभाण्डं हृदयमन्त्रेणारोप्य अघोरेणाग्निं विन्यस्य मुखेन प्रदीप्य यथाऽन्नं मपक्वं मतिपक्वं च नभवति तथा सावधानं पचेत् । एवं शुद्धान्नपाकः । तण्डुलद्विगुणक्षीरेण तण्डुलार्धमुद्गसहितेन वा तण्डुलत्रिगुणक्षीरेण तण्डुलचतुर्थांशमुद्गसहितेन तदुचितगुळकदळीफलयुतेन वा पायसान्नपाकः । तण्डुलचतुर्थांशमानतिलचूर्णेन तिलार्धमानेन तिलचतुर्थांशमानेन वा घृतेन च कृसरान्नपाकः । अथवा तण्डुलार्धमुद्गचूर्णमिश्रैः किञ्चिल्लवणचूर्णयुतैश्च कृसरान्नपाकः । प्रत्येकं तण्डुलार्धप्रमाणाभ्यां क्षीरगुडाभ्यां तदर्धप्रमाणेन घृतेनच गुळान्नपाकः । अथवा तण्डुलद्विगुणक्षीरेण तण्डुलार्धगुळसहितेन गुळार्धघृतसहितेन गुळान्नपाकः। अथवा तण्डुलत्रिगुण क्षीरेण तण्डुलतितयांशमुद्गसहितेन तण्डुलचतुर्थांशगुळमिश्रेणकदळीफलयुतेनचगुळान्नपाकः । तण्डुलचतुर्थांशै स्तत्तृतीयांशै स्तत्समैर्वा मुद्गै र्नालिकेरखण्डयुतै स्तद्रहितैर्वा मुद्गान्नपाकः । शुद्धान्नपायसान्न कृसरान्न गुळान्न मुद्गान्नान्युत्तरोत्तरं सहस्रगुणफलानि । एवं दधिमिश्रितं मधुमिश्रितंचान्नं प्रशस्तम् । एतेष्वनेकं एकंवायथाविभवं कार्यम् । नैवेद्यस्याष्टमांशेन षोडशांशेन वा मुद्गाढकी माप राजमाप निष्पाव कुळुत्थाद्यन्यतमेन कर्तव्यम् । एवं मुद्गाद्याश्च सति संभवे निस्त्वग्विदळरूपा ग्राह्याः । शाकानि प्रस्थान्नैवेद्यस्य पलद्वयप्रमाणेन एकपलप्रमाणेन वा कदळी पनस कूश्माण्डोर्वारुक कारवल्ली व्याघ्रीबृहतीद्वय कोशातकीद्वय चूत नाळीकेर फलादीनि शिशुकन्द वल्लीकन्द सूरणकन्दाद्यन्यानि च प्रशस्तरसगन्धा न्यार्द्राणि शुष्काणि वा यथार्हं लवण मरीचि जीरक एला चूर्ण शर्करादि सकलसंस्कारोपेतानि घृतभर्जितानि का-

र्याणि । आम्लेन घनतक्रेण लवणमरीचि जीरककुळुत्थ सिद्धार्थ-चूर्ण शर्करासहितं चोष्यं कार्यम् । माष मुद्गगोधूम शालिपिष्टादि विकारास्समृद्वशर्करोपेताः कर्पूरैलादिचूर्णैर्वासिता बहवोऽपूपाः पानकादयश्च कार्याः । नैवेद्यस्य षोडशांशं द्वात्रिंशांशं चतुष्पष्टयंशं वा घृतम् । घनदधि अष्टमांशम् । सर्वत्र क्षीरदधिघृतानि गव्यान्येव ग्राह्याणि । स्थालिका स्सुवर्णेन रजतेन ताम्रेण शुद्धकांस्येन वा कर्तव्याः । अष्टचत्वारिंशदंगुळायामाः एकांगुळोत्सेधाः अंगुळवनोष्ठवल्यश्चेदुत्तमाः । उत्तमोत्तमादिक्रमेण तु षट्त्रिंशदंगुळप्रभृति द्वादशांगुळपर्यन्तायामा नवयवप्रभृत्येकयवपर्यन्तमानोष्ठवल्य ओष्ठप्रमाणायामवेत्रवल्य स्तद्रहिताश्च नवांगुळायामा स्तदर्धमानाश्चातिजघन्याः । सर्वाश्च पादरहिता स्सुवृत्ताकाराः कर्तव्याः । स्थालिकाधारत्रिपाद्यः पूजनीयलिङ्गपीठिकोत्सेधपर्यन्तमुन्नताः प्रकर्तव्याः । नैवेद्यंच सर्वशिवदीक्षासंस्कृतैः शुद्धवस्त्रै र्भस्मरुद्राक्षभूषितैः पवित्रधारिभिः परिचारकैः कारयेत् । तथा भूषिताभिः स्त्रीभिर्वा कारयित्वा द्रव्यशुद्धिकाले पूजकस्तण्डुलक्षाळनादिमन्त्रान्जपेत् । यदि कृतं नैवेद्य मपक्व मतिपक्वं कालातिपाता दतिशीतळं नरैर्लंघितं वा स्यात् तदा ऽन्यत्पक्वं निवेदनीयम् ॥

अथनैवेद्यसमर्पणम्— देवस्य पाद्यमाचमनीय मर्घ्यं च दत्वा देवस्य पुरतो गोमयेन चतुरश्रं मण्डलं परिकल्प्य पिष्टादिचूर्णै रलंकृत्यशुद्धान्नपायसान्नादिपूरिताः कदळीनाळिकेर चूत पनसद्राक्षा खर्जूरादिफलैर्लड्डुककस्तूरिकापिष्टक मोदकादिभि रपूपैः कदळीपनसादिशाकै रार्द्रकोर्वारुकादिहारितै श्चूतनारंगाद्युपदंशै र्मुद्गविदळादिसूपैश्चवल्याकारसोपानक्रमेण निवद्धे भूषिताः मद्धये क्षीरदधिघनैरलंकृताः सद्योघृताभिपिक्ताः [illegible]क्षीर

फलरसादिविकारैर्नानाविधपेयचोष्यलेह्यैः क्षीरदधिनवनीतघृतै रेलाचंपक-मुकुळ कर्पूर मृगमद लामज्ज पाटलीपुष्पादिवासित सुशीतळ स्नपनकल-शाहृताढकतदर्ध तदर्धप्रमाणेन पानीयेन परिपूरितैश्चषकैः परितः परिष्कृ-ताः शिवस्य शिवायाश्च नैवेद्यस्थालिकाः सदाशिवस्य मनोन्मन्याश्च परि-वारदेवताना मावरणदेवतानां च नैवेद्यस्थालिकाश्च निधाय स्थालिकाना-मुपरि पत्रं विन्यस्य हृदयेन प्रोक्ष्य ताळत्रय दिग्बन्धनावकुण्ठन धेनुमुद्रा विरचय्य अन्नमुद्रां पर्वतमुद्रां प्रदर्श्य पूर्वविन्यस्तं पत्रमुद्धृत्यास्त्रेणपरिषिच्य हृदयेन प्रत्येक मापोशनं दत्वासपुष्पया मृगमुद्रया पूर्वं गणपतये निवेद्य तत्पु-ष्पं विसृज्य हस्तप्रक्षाळनं कृत्वा हां हौं शिवाय स्वधेति शिवाय नैवेद्यं पञ्चवारं त्रिवार मेकवारंवा नैवेद्यदानाभिनयवत्या सपुष्पया मृगमुद्रया नैवे-द्यंदत्वा सदाशिवादिक्रमेण सर्वेभ्योऽपि पृथक्पृथक् नैवेद्यं दद्यात् । पृथक् पात्रासंभवे सर्वासां परिवारावरणदेवताना मेकस्मिन्नेव पात्रे नैवेद्यमानीय प्रत्येकं निवेदयेत् । ततश्शिवाय सुगन्धिपानीयं प्रदाय नमोन्तमूलेन पुष्पं समर्प्य द्रव्यजातं संपूर्णं विभाव्य स्वधान्तमूलेनाचमनं दत्वा देवस्य सव्यवामहस्तयो रुद्वर्तनार्थं कर्पूरादिसहितं चन्दनं दत्वा हस्तप्रक्षाळन-गण्डूष पादक्षाळनादि भावयेत् । सर्वाणि च निर्माल्यान्युद्धृत्य सदाशि-वनिर्माल्यं प्रागीशदिशि विन्यस्तगन्धपुष्पनिर्माल्याभ्यां सह ऐशान्यां दिशि चण्डेशाय निवेदयेत् ॥

अथ सदाशिवः केन वक्त्रेण भुङ्क्ते ऊर्द्ध्ववक्त्रेण । 'भक्ष्यभोज्यान्नपा-नादि लेह्यं चोष्य मनेकधा । ऊर्द्ध्ववक्त्रे प्रदातव्यं यत्किंचिदिह चो-दित' मिति सर्वज्ञानोत्तरवचनात् । 'भक्ष्यंभोज्यं च पेयं च लेह्यं चोष्यं च पञ्चधा । ऊर्द्ध्ववक्त्रे प्रदातव्यं हृदयेन षडानने'ति द्विशतीवचनाच्च । अथवा पञ्चभिरपि वक्त्रैर्भुङ्क्ते । 'पञ्चवक्त्रेषु नैवेद्य मूर्द्ध्ववक्त्रेऽथवा पुन'

रिति पञ्चसु वक्त्रेषु प्रत्येकनैवेद्यविधानस्यापि दर्शनात् । ऊर्द्ध्ववक्त्रे नैवेद्यदानं च तदूर्द्ध्ववक्त्रं पूजाकाले दक्षिणामुखीभूतं विभाव्य कर्तव्यम् । देवस्य दिग्युत्तराभिमुखतया पूजकस्य स्थितत्वात् । 'स्थण्डिलेचरलिङ्गेच साधकाभिमुखश्शिवः । प्रत्यवक्त्र स्सकुंभादौ स्थिरे द्वाराभिसम्मुख'इति चरलिङ्गार्चने देवस्य पूजकाभिमुखत्वश्रवणात् । एवंचात्मार्थपूजायां शिवस्य साधकाभिमुखत्वसिद्ध्यर्थं हृदयगुह्यपादावयवा अपि दक्षिणदिक्स्था एव । यानितु पूजकस्य शिवाभिमुखावस्थानपरिहारवचनानि 'नप्राच्या मग्रतश्शंभो र्नोत्तरे योपिदाश्रये । न प्रतीच्यां यतः पृष्ठं तस्माद्दक्षं समाश्रये'दित्यादीनि, तानि पूर्वाभिमुखस्थिरलिङ्गविषयाणि । चरलिङ्गपूजायां 'स्थण्डिले चरलिङ्गे च साधकाभिमुखश्शिव'इति विशेषवचनदर्शनात् । 'अग्नौ वा निर्ऋतौ वाऽपि स्थित्वा देवं प्रपूजये'दिति वचनानुसारेण पूजकस्याग्नेयदिगवस्थाने शिवस्य पूजकाभिमुखत्वं नलभ्यतइतिचेत् सत्यं । तदपि वचनं स्थिरलिङ्गविषयमेव । स्थिरलिङ्गं सर्वसाधारण्येन लोकानुग्राहकत्वाच्च चतसृषु दिक्षु स्वेष्टमुखमिति यस्यां दिशिद्वारं तद्दिगभिमुखं भवति । तत्र हृच्चरणैस्सार्धं मूर्द्धमुखं तद्वाराभिमुखं । द्वारस्याभिमुखंचोर्द्ध्ववक्त्रं तत्र प्रकल्पयेदिति वचनात् । 'यस्यां दिशि भवेत्द्वारं तां प्राचीं परिकल्पये'दिति वचनाच्च । अथवा ऊर्द्ध्ववक्त्र मेकमेव हृद्गुह्यचरणैस्सह द्वाराभिमुखं भवति । तत्पुरुषादिवक्त्राणि तु पूर्वादिदिक्ष्वेव व्यवस्थितानि नतु द्वारभेदेन भिद्यन्ते । 'प्रासादस्य द्वारम्भवतु यथा काष्ठया कामं । तत्पुरुषादिमुखानि नजहति पूर्वादिदिक्संस्था'मिति वचनात् । इदं तत्पुरुषादिवक्त्रविषये पक्षद्वयमपि कामिकसंमतम् । अतएव तत्र पश्चिमद्वारार्चने 'द्वारस्याभिमुखं चोर्द्ध्ववक्त्रं देहं प्रकल्पये'दित्युपक्रम्य 'पुरुषं पूर्व देशेवापश्चिमे वाऽथ चिन्तयेत् । दक्षिणे वोत्तरेवाऽपि बहुरूपं विचिन्तयेत् ॥ उत्तरे


दक्षिणे वाऽपि वामदेवं स्मरेत् गुरुः । पश्चिमे पूर्वदेशे वा सद्यवक्त्रंस्मरन्नयसेत्' इत्युक्तम् ॥ तत्रैव दक्षिणद्वारार्चनेऽप्युक्तम्— 'अघोरं पुरुषं वाऽपि दक्षिणेसम्यगर्चयेत् । अघोरंवाऽथ सद्यं वा पश्चिमेतु समर्चयेत् ॥ सद्यवक्त्रं तु वामं वा सौम्यदेशे समर्चयेत् । पुरुषं वाऽथ वामं वा पूर्व देशेसमर्चयेत्' इति ॥ सर्वमपि स्थिर मुत्तराभिमुखं पूजनीयम् । 'लिङ्गं वा प्रतिमा वा क्रियतेऽन्यद्वा यया ककुभा । तस्यां तस्यां यज्वा यजेत शिवमुत्तराभिमुख' इति वचनात् । तत्र मुख्यपूर्वाभिमुखलिङ्गपूजायां मुख्याग्नेयदिशि स्थितस्य पूजकस्य मुख्य मुत्तराभिमुखत्वमेव घटते । नच देवस्य वामभागे नैर्ऋतदेशे देव्या निविष्टत्वात्तत्र पूजकस्योपस्थितौ 'नोत्तरे योषिदाश्रय'इति निषेधप्रसङ्गः । कामिके पश्चिमद्वारार्चनपटले 'वामेवा दक्षिणेवाऽपि स्थापनीया मनोन्मनी । देवसंमुखसंयुक्ता द्विहस्तैकमुखान्विते'ति पश्चिमाभिमुखलिङ्गपूजायां दक्षिणभागेऽपि देवीनिवेशनस्यांगीकृतत्वेन नैर्ऋतदिक्स्थितस्य पूजकस्य देवदक्षिणभागनिविष्टदेवीभावनोपपत्तेः । एवं दक्षिणदिग्रूप गौणपूर्वाभिमुखलिङ्गपूजायां नैर्ऋतदिग्रपगौणाग्नेयदिशिस्थितस्य प्राचीरूपगौणोत्तराभिमुखत्वंउत्तरादिग्रपगौणपूर्वाभिमुखलिङ्गपूजायामीशानदिग्रूपगौणाग्नेयदिशि स्थितस्य प्रतीचीरूपगौणोत्तरवक्त्रत्वंच घटते । एवं पूजकाभिमुखत्वनियमो नविहन्यते । सर्वत्रात्मार्थपूजाप्रकरणे 'उत्तराभिमुखो भूत्वा रुचिरासनसंस्थित' इत्यादिविधानात् । तत्रायं विशेषः— पापक्षयार्थिभिर्मुक्त्यर्थिभिश्च मुखानां दिश्यवस्थामाश्रित्याघोरवक्त्र मभिमुखत्वेन भावनीयम् । 'न विभोः पुरतस्तिष्ठेत् न पश्चात् स्व्यन्तिकेऽपिच। अघौघध्वंसमोक्षार्थं दक्षे दक्षस्थितोऽर्चयेत् ॥ हिमं मरुच्च शीतश्च पद्मं निर्दहतेयथा । तथाऽघोरः प्रशान्तोऽपि पापनिर्दाहकारकः ॥ महानपि यथा दन्ती यन्तारमनुवर्तते । तस्मादातेन वचसा उत्तराभिमुखो यजेत्॥ इत्यघो-

रमुखस्य सकलपापहरत्वेन प्रशंसादर्शनात् । 'अजातमिममेवैकं मत्वा जन्मनि भीरवः । रुद्रस्यास्य प्रपद्यन्ते रक्षार्थं दक्षिणामुखम्' इति वायुसंहितायां दक्षिणमुखस्य मुक्तिप्रदत्वेन प्रशंसादर्शनात् । भोगपूर्वकमोक्षार्थिभिस्तु तत्पुरुषमुखस्य द्वाराभिमुख्यन्यायेन साधकाभिमुख्यन्यायेन वा साधकाभिमुख्यपक्षमाश्रित्य तत्पुरुषमुखमभिमुखत्वेन भावनीयम् 'प्रसन्नत्वं यदीशस्य स्तेमित्वं पुरुषस्यच । चण्डत्वं बहुरूपस्य मुक्तिस्थित्यन्तहेतुकम्' इति तत्पुरुषमुखस्य स्थितिहेतुत्वश्रवणात् । सर्वथाऽप्यूर्द्ध्ववक्त्रस्य दक्षिणाभिमुखत्वं स्थितमेव । एवञ्चावाहनादिकृतं देवस्याभिमुख्यमप्यात्मार्थपूजायामाशस्यं लभते । अन्यथा परार्थपूजायामिव तदूर्द्ध्वमुखस्य ऊर्द्ध्वाभिमुखत्वत्यागमात्रपरतया कथंचिन्निर्वाह्यं स्यात् । परार्थपूजायां लोकानुग्रहप्रयोजनायां विशिष्य पूजकाभिमुख्यं नापेक्षितमिति युक्तं तत्र द्वाराभिमुखस्यैव कथञ्चित् तदभिमुखत्वसमर्थनम् । इहतुसाधकानुग्रहार्थायामात्मार्थपूजायां स्थण्डिले चरलिङ्गेचे'त्यचनवत्तदाशास्येन संभवत्साधकाभिमुख्यं किमित्युपेक्षितमिति केषांचिन्मतम् । अन्येत्वाहुः-आत्मार्थपूजायामूर्द्ध्ववक्त्रं हृत् गुह्यचरणैसह तत्पुरुषवक्त्रंच पूर्वाभिमुखमेव । अंशुमदादितन्त्रेष्वात्मार्थपूजाप्रकरण एव न विभोः पुरतस्तिष्ठेन्नपश्चात्स्त्र्यंतिकेऽपिचानयोपित्सान्निध्यो नाग्रे नपृष्ठेस्वामिनोभवे'दित्यादिवचनानां पठितत्वेन तेषां परार्थपूजाविषयतया नेतु मशक्यत्वात् । साधकाभिमुख्यवचनस्य दीक्षाप्रकरणे पठितत्वेनततो नित्यपूजायां साधकाभिमुख्यालाभात् । नच दीक्षायां चरलिङ्गपूजाप्रसक्त्यभावात् चरलिङ्गे साधकाभिमुख्यवचनस्य नित्यपूजाविषयत्वमेवेति वाच्यम् । दीक्षायामपि चरलिङ्गार्चने दोषाभावात् । तस्मान्निरपवादात् नप्राच्यामग्रतइति वचनात् नित्यनैमित्तिककाम्ये सर्वाधिकारणः सदाशिवः पूर्वानने लक्ष्मीप्रत्यक्प्रष्टकालातनु'रिति लक्ष्मीकिलयसंवादे, 'दीक्षा-

दिषुवटेशस्य प्रतीच्यां चिन्तयेद्गुरुम् । ईशं तत्पुरुषं शान्तं नित्ये नित्ये पुरानन'मिति मुखबिंबे 'ध्यायेत् सदाशिवं नित्यं प्राङ्मुखेशास्यवक्षसाम् । दीक्षादौ कलशाधारं तमेव प्रत्यगानन'मिति बृहद्भार्गवादिषुच सदानित्य-शब्दाभ्यां विशेषविहितदीक्षादिव्यतिरिक्तेषुसर्वेष्वपि नित्यनैमित्तिक काम्ये ष्वीशान पुरुषमुखयोः प्राङ्मुखत्वश्रवणा देतेषां वचनानां द्वाराभिमुखत्व नियतस्थिर लिङ्गप्रहाणेन चरलिङ्गादिविषयावदयंभावाच्चात्मार्थपूजायां नित्यनैमित्तिककाम्यरूपायां शिवस्य पूर्वाभिमुखत्व मौत्सर्गिकम् । दीक्षादिनैमित्तिकेषु विशेषवचनैर्दक्षिणमुखत्वादिरूप स्तदपवादइति । इदं चान्यदाहुः । ईशानतत्पुरुषमुखयोर्मध्येऽपि सदाशिवस्तत्पुरुषमुखेनैव भुङ्क्ते । 'द्वारं पश्चिम मेत्रं तु नैवेद्यं पूर्ववक्त्रक'मिति सूक्ष्मवचनादीशान-वक्त्रस्य शिरोरूपतया तत्र नैवेद्यदानस्य लोकविरुद्धत्वा च्चेति ॥ अस्तु तत्पुरुषमुखेन भुङ्क्ते इत्यपि कश्चन पक्षः । ननु तेनैवेति नियमः । 'भक्ष्यभोज्यान्नपानादी'त्यादिप्रागुदाहृत विषमवचनै 'रूर्द्ध्ववक्त्रे महासेन आहुतिं संप्रदापये'दित्यादिवचनैश्चोर्द्ध्वमुखेनापि भोजनावगमात्, 'पञ्चवक्त्रेषु नैवेद्य'मिति वचनेन 'ततोहवि:प्रदानं स्यात् पञ्चवक्त्रेषु चैव हि । ईशानस्य तु शुद्धान्नं गौडं तत्पुरुषे ततः ॥ कृसरं दक्षिणे वक्त्रे मुद्गान्नं च तथोत्तरे । पश्चिमे पायसंचैव स्वस्व नाम्ना समाहितः ॥ दापयेत्स्व-स्वदिग्भागे ईशानस्याग्रतो भवेत् । अलाभे पञ्चहविषा मग्रे शुद्धान्नमिष्य-ते'इति प्रतिवक्त्रन्नैवेद्यभेदप्रतिपादकवचनजातेन च पञ्चभिर्वक्त्रै र्भोजना-च्च । नह्यागमाना मविशिष्टे प्रामाण्ये कस्यचिदर्थोऽनुष्ठेयो नान्यस्येति युक्तम् । तस्मात्तत्तदागमवचनप्राप्तपक्षत्रयस्यापि विकल्प इत्येव युक्तम् । ननु नैवेद्यदानमुद्रया शिवे नैवेद्यं समर्पयता पूजकेन किं शिवस्य हस्ते तत्समर्पणीयं उत तत्तद्वक्त्र एव । अत्रापि विकल्प एव । उत्तरत्र 'अमृतीकृत्य गोस्तन्या निवेद्य कुसुमं न्यसेत् । निवेद्यदक्षिणे हस्ते दद्यात्पार्णाय

मुत्तम'मिति दक्षिणहस्ते नैवेद्यसमर्पणश्रवणात्, 'ऊर्द्ध्ववक्त्रे तु दातव्यं यत्किञ्चिदिह चोदितम् । ऊर्द्ध्ववक्त्रे महासेन आहुतिं संप्रदापये' दिति वक्त्रे समर्पणश्रवणाच्च । एवंचात्र योग्यतानुसारेण व्यवस्थितोविकल्पः । यद्वृदयादिसंमिते पुरुषवक्त्रे निवेदितव्यं द्रवद्रव्यवर्जं भक्ष्यभोज्यादि तत्सर्वं परित्यक्ताभयमुद्रे वामहस्ते समर्पणीयम् । यद्वक्त्रान्तरे निवेदनीयं यच्च पानीयादिद्रवद्रव्यजातं तत्सर्वं मग्निहोत्राहुतिवत् सूक्ष्मरसरूपेण स्थालिकाभ्यो निर्गत्य तत्तद्वक्त्रपर्यन्तं नैवेद्यमुद्रया सहागतं सम्भावयता साक्षात्तद्वक्त्र एव समर्पणीयमिति । एवञ्च हस्ते समर्पणसंभवाद्धस्तोद्वर्तनस्य न वैफल्यम् । पूजकहस्तेन तद्वक्त्रे नैवेद्यप्रक्षेपाभावात् पूजकहस्तस्य न निर्माल्यसङ्करप्रसङ्गः ॥ इति नैवेद्यविधिः ॥

तांबूलदानम् ॥



अथ मुखवासं ताम्बूलं च निवेदयेत् । भोजनानन्तरं मुखे वासार्थं यदीयते तन्मुखंवासयतीति व्युत्पत्त्या मुखवासम् । तच्च एलालवङ्ग तक्कोल जातीफल कर्पूरचूर्णं हिमजलपिष्टंगुळकीकृत मित्युक्तम् । एलालवङ्गांकित तक्कोल जातीफल कर्पूरचूर्ण [illegible]धुसितायुक्तं केवलंवा पञ्चसौगन्धिकाख्य मुत्तमम् । केवलं कर्पूरजातीलवङ्गतक्कोलचूर्णंवा मध्यमम् । प्रस्थनैवेद्यस्य द्विधाकृतमृदुक्रमुकखण्डानि षट्चत्वारिंशद्वेवापत्राणि क्रमुकफलापेक्षया चतुर्गुणानि त्रिगुणानि द्विगुणानिवा शुभ्राणि खण्डितमूलाग्राणि शिलाचूर्णं चेतिसर्वमिदं संगृह्य कर्पूरादिसहितं सुपक्वसंस्कृतनाळिकेरमातुलिङ्गफलयुक्तं तांबूलं निवेदयेत् । ततोमूलमन्त्रेण विशेषार्घ्यं दत्वा एकत्रिपञ्चसप्तनवावृत्तियुक्तदीपं प्रदर्श्य त्रिताल पञ्चताल नागचक्रपद्म पुरुषमृग गजारूढदेवेन्द्राद्याकृतिपात्र निहितान् दीपानपि यथाविभवं प्रदर्श्यारात्रिकं कुर्यात् ॥

आरात्रिक विधिः ॥

तत्प्रकारः— सुवर्णरजतताम्रकांस्यान्यतमनिर्मिते चतुर्विंशत्यंगुलिमाने तदर्धमानेवा तत्तृतीयांशमानया स्वमानपञ्चमोत्सेधया यवद्वयायामोत्सेधपट्टिकया कर्णिकया शोभिते ततो बहिरष्टदळयुक्ते परितः कर्णिकामानोष्टसहिते सुवृत्ताकारे पात्रे कर्णिकायां मध्ये परितश्च कृतेषु सहजेषु शालिपिष्टमयेषु वा दीपासनेषु कर्पूरादिमयीं वर्तिं निधाय नव पञ्च वा दीपान् मध्यएव एकं वा दीपमारोप्य त्रिपाद्यां विन्यस्य निरीक्षणादिभिस्संस्कृत्य, नव चेन्मध्ये सूर्यं दिक्षु गुरुशुक्रबुधचन्द्रान् विदिक्षु भौमशनिराहुकेतून्, पञ्चचेन्मध्ये वह्निं दिक्षु गगनवायुजलपृथिवीः, एकश्चेत् वह्निं चाभ्यर्चयेत् । यद्वा—नवपञ्चैकदीपेषु वामादिशक्तीः पञ्चब्रह्माणि शिवं चार्चयेत् । एवं गन्धपुष्पधूपदीपैरभ्यर्च्य दिग्बन्धनमस्त्रेण कृत्वा सुरभिमुद्रां प्रदर्श्य पाणिभ्यामुद्वृत्य देवस्य शिरसि हृदये पादयोश्च त्रिर्भ्रामयित्वा सुवर्णादिनिर्मितैर्वृत्ताकारै श्चतुरश्राकारैर्वा मुकुळाग्रशालिनाळयुक्ते स्सहजशालिपिष्टकृतान्यतरदीपासनयुक्तै दीपासनानिहितकर्पूरादिवर्तिष्वारोपितदीपै र्नीराजनपात्रैर्नीराजनान्यपि निरीक्षणादिभिस्संस्कृतान्यारात्रिकवत् भ्रामयित्वा भूमौ विन्यस्यास्त्रेण निर्वापयेत् । नीराजनपात्राणि त्रिविधानि । प्रादेशमात्रविस्तारं यवद्वयघन मष्टांगुळनाळं तदनुसारिमुकुळमुत्तमम् । तस्य मध्ये एकं दीपासनं पञ्चस्वावृत्तिषु क्रमा न्नव पञ्चदश एकविंशतिः सप्तविंशतिः त्रयस्त्रिंशदिति षडुत्तरशतं दीपाः । यद्वा क्रमादावृतिष्वष्टौ चतुर्दश विंशतिः षड्विंशतिः द्वात्रिंशद्दीपासनानीति एकोत्तरशतंदीपाः । उत्तमपात्रार्धमानं पात्रं मध्यमम् । अस्य मध्ये एकं चतुर्ष्वावरणेषु अष्टौ त्रयोदशाष्टादश त्रयोविंशतिर्दीपासनानीतित्रिषष्टिर्दीपाः । मध्यमादर्धमानं कनिष्ठम् । अस्य मध्ये एकं त्रिष्वावरणेषु षट् दश चतुर्दशदीपास-

नानीति एकत्रिंशद्दीपाः । अथ दर्पणच्छत्रचामर व्यजनताळवृन्तानि क्रमादीशानादिभ्यस्त्रिस्समर्प्य तद्दिवसार्जितवाङ्मनःकायदोषपरिहाराय शिवसायुज्यप्राप्तये च दूर्वाकुशाक्षतबिल्वपत्रसहितपुष्पाञ्जलिं हां हीं शिवतत्वाधिपतये शिवायनमः । हां हीं विद्यातत्वाधिपतये शिवाय नमः । हां हीं आत्मतत्वाधिपतये शिवाय नमः । इति त्रिवारं समर्पयेत् । मुमुक्षुश्चेद्दात्मतत्वादिक्रमेण अथवा सर्वतत्वाधिपतये शिवायनम इति सकृदेववा समर्पयेत् । ततः पूजया सन्तुष्टं स्वाभिमुखीकृताञ्जलिपुटसकलभोगाङ्गसेव्यमानं यागमन्दिरद्वारवाह्यस्थब्रह्मोपेन्द्रमहेन्द्रचन्द्रसूर्यादिस्तूयमान मपारकरुणामृतसमुद्रं भक्तजनसकलाभीष्टप्रदञ्च शिवं ध्यात्वा पूजासाद्गुण्यार्थं यथाशक्ति श्रीमत्पञ्चाक्षरजपं कुर्यात् ॥

पञ्चाक्षरजपविधिः ॥

श्रीमत्पञ्चाक्षरस्याथ प्रकारः प्रतिपाद्यते ।
गुरूपदिष्टमार्गेण गोपनीयः प्रयत्नतः ॥
शिवासनपद्मस्य दक्षिणदळे अघोरमूर्तेर्दक्षिणभागे ।
तप्तचामीकरप्रख्यां पीनोन्नतपयोधराम् ।
चतुर्भुजां त्रिणयनां बालेन्दुकृतशेखराम् ॥
पद्मोत्पलधरां सौम्यां वरदाभयपाणिकाम् ।
सर्वलक्षणसंपन्नां सर्वाभरणभूषिताम् ॥
सितपद्मासनासीनां नीलकुञ्चितमूर्धजाम् ।
श्रीमत्पञ्चाक्षरीविद्यां मनसावाहनादिभिः ॥
गन्धपुष्पै र्धूपदीपै र्नैवेद्येन च पूजयेत् ।
सुखासने समाविष्टो रक्षिताक्ष उदङ्मुखः ।
नासाग्रन्यस्तदृङ्मौनी विदध्यादात्मरक्षणम् ॥

स्रवत्पीयूषसङ्घातप्लावितशेषदिक्तटम् ।
स्मरे दूर्द्धमधस्ताच्च चन्द्रमण्डलसंयुतम् ॥

बिंबसंपुटमध्यस्थं सुधाधारापरिप्लुतम् ।
स्वदेहं चिन्तयेच्छाक्तैस्सुधावर्षैस्सुधात्मकम् ॥

आत्मरक्षा भवेदेषा सुरैरपि नभिद्यते ।
आत्मरक्षां विधायेत्थं मन्त्ररक्षा मथाचरेत् ॥

रेचये दुदराद्वायुं दक्षनाड्याऽस्त्रमन्त्रतः ।
इडया पूरयेद्वाद्यात् शंभुना वायुनोदरम् ॥

अपान मू र्द्धमुत्कृष्य प्राणापानौ निरुद्ध्य च ।
कुंभेन मनसा वायुं सुषुम्नायां नियोजयेत् ॥

सुषुम्नामध्यसंस्थायां हृद्देशेशिवसंयुजि ।
मन्त्रन्नियोजयेन्मन्त्री चिच्छक्तौ मन्त्रमातरि ॥

मन्त्राक्षराणि मणिवत् प्रभावन्मन्त्रदेवताम् ।
गमागमप्रयोगेन स्मरन्मन्त्रं जपेत्सुधीः ॥

वाच्यवाचकसंबन्धं जपेत्सावहितमानसः ।
मन्त्ररक्षा भवेदेषा संहिता सुररक्षिता ॥

इत्थं विदित्वा यत्नेन जपकर्म समाचरेत् ।
जपकर्मक्रमस्सोऽथ सुस्पष्टं प्रतिपाद्यते ॥

नाभ्यादिद्वादशान्तान्तं सोमसूर्याग्निरूपिणीम् ।
आनन्दरूपिणीं शक्तिं सुषुम्नान्तर्गतां पराम् ॥

आधारचक्रमारभ्य बोधयित्वाऽनिलेन ताम् ।
ब्रह्माणं केशवं रुद्र मीश्वरंच सदाशिवम् ॥

हृत्कण्ठतालुभ्रूब्रह्मरन्ध्रस्थानेषु तान्क्रमात् ।
त्यक्त्वा त्यक्त्वाऽस्त्रमन्त्रांशं विद्युल्लेखानिभं बुधः ॥
मन्त्रं नादान्तमुच्चार्य मूलाधारगतं पुनः ।
गमागमप्रयोगेण जपेत्साष्टशतं तथा ॥
अष्टाविंशतिमष्टौवा गुरुणाचरथोदितम् ।
इत्थं कृत्वा जपं मन्त्री शिवसायुज्यमाप्नुयात् ॥

जपश्चाभ्यन्तर्याऽकारादिक्षकारान्तवर्णमालारूपया बाह्यया रुद्राक्षादिनिर्मितया वा कर्तव्या । तन्त्रान्तर्या जपप्रकारः कथ्यते । ब्रह्मरन्ध्रे धवळाष्टदळचतुरश्रयंत्रमुपरि श्रितं पद्मं भावनीयम् । तस्य कर्णिकायां व्योम तत्पूर्ववर्णं चतुर्दशस्वरविसर्जनीयसमुदायरूपं बीजं केसरेष्वष्ट स्वरद्वंद्वानि दळेषु कादयः पञ्चपञ्च वर्णाः चतुरश्रयन्तस्य दिक्षु सुधाबीजं विदिक्षुच सप्तमो वर्णः । एवंरूपंमातृकं पद्मं भावनामात्रेण विशेषरोगमृत्युहरम् । ततो द्वारक्रमंचानुद्वतवायुसंधुक्षितमूलाधाराग्निशिखया कुण्डलिनीशक्त्या सह सुषुम्नारन्ध्रं प्रविश्य ब्रह्मरन्ध्रपर्यन्तमुद्गतेडास्पृष्टात्तस्मान्मातृकापद्मात्स्यंदितां क्षकाराद्यकारान्तवर्णपङ्क्तिरूपाममृतबिन्दुसन्ततिं ब्रह्मरन्ध्रप्रभृति मूलाधारपर्यन्तं व्याप्यावतिष्ठमानां भावयेत् । या कुण्डलिनी शक्तिः मूलाधाराग्निशिखासामरस्येन प्रकाशमानसुषुम्नामार्गेण ब्रह्मरन्ध्रपर्यन्तमुद्गता सैव मातृकापद्मविद्रुतामृतबिन्दु स्यंदि सन्ततिसामरस्येनामृतायमाणा परमानन्दरूपिणी मातृकाशक्तिरितिभावयेत् । तदाहुः—'प्रकाशमानां प्रथमप्रयाणे प्रतिप्रयाणे त्वमृतायमाणाम् । अन्तःपदव्या मनुसञ्चरन्तीमाणन्दमुद्रा मवलोकयामः'इति ॥ ब्रह्मरन्ध्रस्थितमातृकापद्मप्रभृत्यकारादिक्रमेण मूलाधारपर्यन्तं व्याप्य स्थितायां मातृकारूपायां शक्तावकारादिभिरष्टाभिर्वर्णैरेकोवर्गः लृकारादिभिरष्टाभिरन्यः ककारादिभिः पञ्चभिः पञ्च-

भिर्वर्णैस्सप्तवर्गाः । नववर्गाः क्रमादादित्यसोमबुधगुरुशुक्रांगारकशनिराहुकेतुरत्नरूपाः । माणिक्यवैडूर्यकपुष्यरागवज्रप्रवाळगुळिकावलवैरिरत्नैः । गोमेतकैर्मरकतैश्च कृताऽक्षमाला श्लाघ्या नवग्रहमयाखिलवर्णपूर्णा॥ एनामक्षमालां हृत्पुण्डरीकमध्यागतदीपाकारपरमेश्वरप्रभारूपशब्दैः पराख्यशक्तिनिस्सृतां विभावयेत् ॥ तदग्रे मूलमन्त्रे नवरत्नमयकल्पलताग्रे पुष्पात् विनिस्सृतं विभाव्य क्षकारं मेरुं कृत्वा ळकारादिक्रमेणाक्षमालायां मूलमन्त्रस्य गमागमौ विभावयेत् । तस्यांमन्त्रस्यारोहणभावनयां मन्त्रस्य शिरसि ळकारादिसहितवर्णान् विसर्जनीयसहितान् विन्यस्य अवरोहणभावनायां मन्त्रस्य अकारादिवर्णान् बिंदुन्तान्विन्यस्य जपंकुर्यात् । एवं कृते शतं मन्त्रस्यावृत्तयो भवन्ति । तदनन्तरं षोडशस्वरवर्गस्पर्शवर्गपञ्चकान्तस्थवर्ग ऊष्मवर्गाष्टके क्रमेण मन्त्रं विन्यस्याष्टधा मन्त्रमावर्तयेत् । एवमष्टोत्तरशतशङ्खजपः कृतो भवति । जपारंभकाले च मूलमन्त्रेण तस्य परदेवतां मणिना प्रभामिव समरसीभूतां मूलमन्त्रेणसह तदीयान्नकारादिवर्णान् पीतकृष्णधूम्रपीतरक्तवर्णान् तद्देवतारूपतया तत्समरसीभूतान् ब्रह्मविष्णुरुद्रेश्वरसदाशिवांश्च विभावयेत् । हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेषु क्रमेण नकारादिवर्णै स्सह ब्रह्मादीन्परित्यजेत् । अयमर्थस्सर्वोऽपि प्राक् लिखितश्लोकेषु संक्षेपेणसूचितः । एवमाभ्यन्तराक्षमालया जप्तुमशक्तः प्रागुक्तक्रमेण जपारम्भकाले मन्त्रं मातृकाशक्त्यारूढं विभाव्य मन्त्रमातृकाक्षराणि विभाव्य केवलमेव मन्त्रं रुद्राक्षादिकृतबाह्याक्षमालया गणयन् जपेत् ॥

तत्प्रकारः—उत्तमादिक्रमेणामलक बदर चणकप्रमाणै रवक्त्रैस्त्रिवक्त्रैश्चतुःपञ्चषट्सप्ताष्टनवदशैकादशवक्त्रैर्वा एकसङ्ख्यवक्त्रैर्भिन्नसङ्ख्यवक्त्रामिश्रितै रष्टोत्तरसङ्ख्यै श्चतुःपञ्चाशत्सङ्ख्यै स्सप्तविंशतिसङ्ख्यैर्वा सुवर्णरज-

तादिमये क्षौमपट्टादिमयेवासूत्रे परस्परमुखसंयोजनेन परस्परपुच्छसंयोजनेन च स्यूते मेरुसहितैः वर्णानुगुणरुद्राक्षैर्निर्मितां सद्योजातादिमन्त्रैः प्रत्येकं शतवारावृत्तैः क्रमेणाभिमन्त्रितमेरुकां शिवपूजाक्रमेणावाहनादिभिः पूजितां जपारम्भकाले हुंफडंतास्त्रमन्त्रेण प्रोक्षितां हृदयेन गन्धपुष्पादिभि र्मालामुद्राप्रदर्शनेन च पूजितां दक्षिणहस्तगृहीतां वस्त्रसंगोपितामक्षमालां वाचिकजपे मध्यमायां निधाय तर्जन्यगुंष्ठाभ्यां, उपांशुजपे अनामिकायां निधायमध्यमांगुष्ठाभ्यां, मानसजपे कानिष्ठिकायां निधायानामिकांगुष्ठाभ्यां च गणयेत् । बुभुक्षु रक्षमाला मधोनयेत् । मुमुक्षुरूर्द्ध नयेत् । मेरुलङ्घनदोषे प्रायश्चित्त मघोरसहस्रजपः । तदंगास्पर्शनायमेरुरहीनाक्षमाला कर्तव्या । एवमक्षमालायाः पादयोः पतनेऽप्यघोरसहस्रजपः । भूमौ तस्याः पतने तात्रिंशज्जपः । वाससि पतने तच्छतजपः । जपारंभकाले एकं पुष्पं दक्षिणहस्तस्य कानिष्ठिकामध्ये कृत्वा जप्तव्यम् । रुद्राक्षमालिकया जपेतु तद्ग्रहणे सौकर्याय दक्षिणहस्तेन गृहीतं पुष्पं वामहस्ते निधाय जप्तव्यम् । अद्भुतविडंबितसावधानजपं समर्प्य वामकरतले अस्त्रकवचहृदयान्युपर्युपरि विन्यस्य तदुपरि जपकाले धृतं पुष्पंनिधाय हृदयकवचास्त्रैस्संपुटीकृत्य अस्त्रेणसंरक्ष्य कवचेनावकुण्ठ्य दक्षिणहस्ते पुनर्गृहीत्वा हृत्प्रदेशे निधाय पूर्णचन्द्रोपमं जपं तद्गतं ध्यायन् भूनिवेशितदक्षिणजानुर्भूत्वा हां गुह्यातिगुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवति मे येनत्वत्प्रसादात् त्वयिस्थिते॥ हां हौं शिवायस्वाहा । श्रीपरमशिव जपं त्वयि निक्षिपामीति जपमर्घ्याबुचुळकेन साक्षतकुशपुष्पेण शिवस्य वरदहस्ते निवेदयेत् । अयं भुक्तिमुक्तिसाधकस्य स्वकृतजपस्य विस्मयसङ्कीर्तनकर्मनाशजलसंस्पर्शादिभिर्विनाशशङ्कया तत्संरक्षणाय शिवहस्तेनिक्षेपः । मन्त्रश्लोकस्यायमर्थः। गुह्यातिगुह्यादीनां मन्त्रतत्वादीनां गोप्ता त्वमेव । अतस्सर्वगोप्तृत्वा दस्माकं जपमपि गृहाण । यस्मिन्जपे त्वयिस्थिते त्वत्प्रसादादस्माकं

भुक्तिमुक्तिर्भवत्येव। तस्मान्मयि कृपया तत्गृहाणेति। ततः हां यत्किंचित्कर्म हे देव सुकृतं चैव दुष्कृतम्। तन्मेशिवपदस्थस्य भुंक्ष्व क्षपय शङ्कर॥ हां हों शिवाय स्वाहा। परमशिवायमे सुकृतंदुष्कृतंच निवेदयामीति सुकृतदुष्कृतात्मकं सर्वं कर्म प्रागुक्तक्रमेण चुळकोदकेन निवेदयेत्। तत्र सुकृतजातस्य भोगार्थस्य मोक्षान्तरायपरिहारार्थस्य संरक्षणार्थं निवेदनम्। दुष्कृतजातस्यक्षपणार्थम्। अतस्सुकृतं भुंक्ष्व पालय। दुष्कृतं क्षपय नाशयेति योजना। भोगनिस्पृहस्य केवलमुमुक्षोस्तु मोक्षान्तरायपरिहारार्थं सुकृतमात्रमेव भुंक्ष्वेति पालनप्रार्थना। भोगार्थसुकृतस्य शिवपूजाया मङ्गफलत्वेनानुषंगिकस्य मानुषादिहिरण्यगर्भानन्दान्तभोगप्रापकस्य विषयेभ्यो जुगुप्समानं केवलं मुमुक्षुंप्रति 'एते वै निरयास्तात स्थानस्यपरमात्मनः' इति पुराणोक्तरीत्या नरकप्रापकस्य दुष्कृतरूपतया क्षप्रणपार्थनैव। यद्यपि पालनार्थे भुजिधातोः परस्मैपदितयाभुनक्षीतिपरस्मैपदिनाभाव्यम्। तथाऽपि मन्त्ररूपेश्लोके वैदिकमन्त्रेषु रक्षस्वेतिप्रयोगइव छान्दसोऽयं 'व्यत्ययोबहुळ'मित्यात्मनेपदप्रयोगः। यद्वा भुंक्ष्वेति भोगएवोच्यते, नतु पालनम्। सुकृतशब्देनच केवलमुक्त्यर्थिनः पूजकस्य यदनिष्टं भोगार्थसुकृतं तदेवाच्यते, नतुमुक्त्यर्थमपेक्षितम्। तद्भोगश्शिवस्यराज्ञो राजभोगवत् स्वाधीनव्यवहारः। नतु स्वयमेव भोजनम्। स्वाधीनव्यवहारश्च पूजकस्य प्रियेषु ज्ञातिषु तस्य यथाकथंचित् सुहृत्सुखानिवेशनम्। मुमुक्षोरनपेक्षितं सुकृतं शिवस्तस्य ज्ञातिसुहृद्वयः प्रयच्छतीतिश्रुतिप्रसिद्धिः। यद्यपि तस्य दुष्कृतं तद्विषद्वयः प्रयच्छतीत्यपि श्रुतिप्रसिद्धिरस्ति। तथाऽपि शिवपूजकः सर्वमष्टमूर्तेश्शिवस्य रूपं मन्यमान स्तान्नद्वेष्टीति तेन स्वदुष्कृतस्य स्वस्मिन्फलाजनकत्वरूपं क्षपणमेव प्रार्थयितुमुचितमिति तत्प्रार्थना मन्त्रे निबद्धा। ततः शिवोदाता शिवो भोक्ता शिवस्सर्वमिदं जगत्। शिवो यजति सर्वत्र यश्शिवस्सोऽहमेवतु॥ हां हों


शिवायस्वाहा । परमशिवमात्मानं तुभ्यं निवेदयामीति प्रागुक्तरीत्या चुळ-कोदकेन निवेदयेत् । अत्र मन्त्रश्लोके सोहमिति भागेन स्वस्य शिवस्य च शरीरशरीरिभावः प्रतिपाद्यते । शिवस्य नियामकत्वेन शरीरित्वात् स्वस्य नियम्यत्वेन शरीरत्वाच्च शरीरशरीरिभावे सोऽहमिति सामानाधिकरण्यम् । धर्मज्ञस्सुन्दरो राजेतिवत् । एवेति तदयोगव्यवच्छेदः । यश्शिवइति । यःपरममंगळवाची शिवशब्दः रूढ्या त्रिविधेनाप्याणवमायिककर्मरूपेण मलेनास्पृष्टइति 'अनादिमलसंश्लेषप्रागभावात् स्वभावतः । शिव इत्युच्यते सद्भिश्शिवतत्वार्थ वेदिभि'रित्यादिषु प्रसिद्ध इत्यर्थः । अथवा 'शीङ्स्वप्न'इतिधातो रौणादिकेन वन्प्रत्ययान्तस्य हृस्वत्वनिपातेन शेते सामरस्येन वर्ततेऽस्मिन् कल्याणगुणजातमिति व्युत्पत्त्या परस्परविरुद्धौदार्यमाधुर्यविशेषज्ञत्वनिरतिशयत्वसहिष्णुत्वादिसमाश्रयणीयेत्वापयोगिसकलकल्याणगुणरत्नाकरइति । 'नास्तियद्यदकल्याणं तत्तदस्य कदाचन । कल्याणं सकलं चास्ति परमात्मा शिवोयतः' इत्यादिषु प्रसिद्ध इत्यर्थः । अथवा 'हिंसिधातोस्सिंहशब्दो वशकांतौ शिवःस्मृतः । वर्णव्यत्ययतस्सिद्धः कश्यपः पश्यकोयथे'तिनिपातेन वष्टिशिवमिच्छतीति व्युत्पत्त्यासर्वभूतहिताशासितेति। 'समेधयति यन्नित्यं सर्वार्थानामुपक्रमे । शिवमिच्छन्मनुष्याणां तस्माद्देवश्शिवःस्मृतः'इत्यादिषुप्रसिद्ध इत्यर्थः। अथवा शिवशब्दाच्छुभवाचिनः तत्करोतीतिणिचि पचाद्यचि 'णेरनिटी'ति णिलोपेच सति शिवं करोति सर्वेषामिति व्युत्पत्त्या सकलभूतहितकर्तेति । 'समाभवंति मे सर्वे दानवाश्चामराश्च ये । शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुरा' इत्यादिषु प्रसिद्ध इत्यर्थः । अथवा ' शैवञ् गता'वितिधातोरौणादिकेनवन्प्रत्ययस्याकारयकारलोपस्य च निपाताभ्यामयते प्राप्यते इति व्युत्पत्त्या भोगमोक्षार्थिभिः भजनीयइति । 'यद्वारे मत्तमातङ्गा वायुवेगास्तुरङ्गिनाः । पूर्णेन्दुवदना नार्य श्शिवपूजाविधेः फलम् ॥ सर्वमन्यत्परित्यज्य शिव एव शिवंकरः ।

परो ध्येयोऽथ देवेश स्समास्ताऽऽथर्वणी श्रुति'रित्यादिषु प्रसिद्धइत्यर्थः । अथवा 'यद्वयक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गा दघमाशुहंति तत्। पवित्रकीर्तिं तमलङ्घ्यशासनं भवानहोद्वेष्टि शिवं शिवेतर'इत्यादिषु सकलदुरितहरत्वेनानुशिष्टस्य शिवशब्दस्य वाच्योयः प्रसिद्ध इत्यर्थः । शिवोयजति सर्वत्रेति । सर्वेष्वपि लोकेषु शिव एव यजति धर्माधिकारित्वेनावतिष्ठते । कर्मवश्यसकलजीवात्मकः स एव नियन्तेत्यर्थः । शिवस्सर्वमिदंजगत् । भूतभौतिकसकलजडप्रपञ्चात्मकः तन्नियामक इत्यर्थः । भोक्ता प्रपन्नानां पालयिता । दाता प्रपन्नानां प्रामादिकेपातक्राधन्तराये सतितस्य शोधयिता । एतानि विशेषणानि शिवे स्वात्मनिवेदनतदङ्गोपयुक्तानि । तथाहि— नियम्यस्य पूजकस्य नियामकस्य शिवस्यच नियतनियम्यनियामकभावरूपशरीरशरीरिभावेन शिवंप्रतिपूजकस्य तवाहमस्मीत्यनुसंधानमेवात्मनिवेदनम्। तदिह सोहमेवेत्यत्र तत्पदोक्तेशिवे अहंपदेन स्वशरीरकत्वं एवकारेण तद्योगव्यवच्छेदकार्थं केन तस्यनियतत्वं चानुसंधानविषयरूपं तदुपपादक मभिहितम् । अस्य चात्मनिवेदनस्य साङ्गपञ्चकत्वमाहुः— 'आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यविवर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥ कार्पण्य'मिति । तत्र सर्वभूतानुकूल्याचरणतत्प्रातिकूल्यवर्जनरूपाङ्गद्वयोपपादकं सर्वोऽपि जीववर्गः पूजकं प्रति शरण्यस्य शिवस्य शरीर मित्येतदभिहितम् । तेन प्राणिमात्रे शिवपूजकेन राजशरीरे भृत्यइवानुकूल्येन वर्तितव्यं तत्प्रातिकूल्यं च वर्जनीयमितिलभ्यते । अत एवोक्तं वायुसंहितायां शिवस्य मूर्त्यष्टकनिरूपणप्रकरणे— 'आत्मा तस्याष्टमी मूर्तिश्शिवस्य परमात्मनः । व्यापिकेतरमूर्तीनां विश्वं तस्मात् शिवात्मकम् ॥ सर्वोपकारकरणं सर्वानुग्रहणं तथा । सर्वाभयप्रदानंच शिवस्याराधनं विदुः ॥ देहिनो यस्य कस्यापि क्रियते यदि निग्रहः । अष्टमूर्तेरनिष्टं तत्कृतमेव नसंशयः'इति ॥ रक्षिष्यतीति विश्वासेतु सर्वैरपि विशे-

षणैः उपपादकमभिहितम् । अहमेवेत्युक्तं स्वशरीरकत्वंतावत् स्वरक्षणविश्वासोपपादकम् । कोहि स्वशरीरं न रक्षेत् । शिवशब्दोक्तमुक्तविश्वासविरोधिरागद्वेषा हेतुमलराहित्यं समाश्रयणीयत्वोपयोगि सकलकल्याणगुणशालित्वं सकलभूतहिताशंसितृत्वं सकलभूतहितकर्तृत्वं हितविरोधिसकलदुरितनिवर्तकाशिवशब्दवाच्यत्व मित्येतत्सर्वमपि तदुपपादकं'शिवोयजातिसर्वत्र शिवस्सर्वमिदंजगत्' इति विशेषणद्वयोक्तं चेतनाचेतनात्मकसकलप्रपञ्चनियन्तृत्वरूपं सर्वेश्वरत्वमपि तदुपपादकम्। सर्वेश्वरोहि तद्भक्ताभिलषितदानसमर्थ इति विश्वसितुं शक्यः । पालनार्थात् भुजिधातोः 'दैपूशोधन'इति धातोश्च ताच्छील्यार्थकत्वेन भोक्ता दातेति विशेषणद्वयेनाभिहितं भक्तरक्षकस्वभावकत्वं तदीयप्रामादिकमहापातकादिसकल दुरितनिवर्तकस्वभावकत्वञ्च तदुपपादकमिति स्पष्टमेव । गोप्तृत्ववरणेऽपि भोक्तृत्वमेवोपपादकम् । स्वयमेव रक्षकस्वभावः कथं रक्षकोभवेति प्रार्थितो नरक्षेत् । तुशब्देन देवतान्तरनिरपेक्षत्वरूपकार्पण्योपपादकं स्वस्य देवतान्तराणांच नियम्यनियामकभावराहित्यरूपन्तुशब्देनोक्तमिति विवेकः ॥

एवं त्रिभिश्चुळकोदकैर्जपकियात्मसमर्पणानन्तरं पञ्चब्रह्मषडङ्गमन्त्रानपि मूलमन्त्रदशांशसंयोगेन जप्त्वा शिवमष्टपुष्पिकया पुष्पाञ्जलित्रयेण चाभ्यर्च्य पुरतः कृताञ्जलिबन्धः स्थित्वा स्तोत्रमपि विज्ञापयेत्। पञ्चावरणस्तोत्रै रन्यैरपि श्रुतिस्मृतिपुराणागमादिदृष्टैः पूर्वाचार्यकृतैःस्तोत्रैर्वा यथासंभवं स्तुवीत । स्वकृतस्तोत्रं श्रुतितुल्यमिति पौराणिकाः ॥

प्रदक्षिणविधिः ॥



एवं स्तुत्वा पुष्पाञ्जलिसमर्पणपूर्वकं साष्टाङ्गं प्रणम्य प्रदक्षिणत्रयं कृत्वा पञ्चवारं प्रणम्य पुनः प्रदक्षिणं कुर्यात् । पूजासाफल्यसिद्ध्यर्थं प्रद-

क्षिणमावश्यकम् । 'पदात्पदान्तरं गच्छेत् करौ चलनवर्जितौ । स्तुतिर्वाचा हृदिध्यानं चतुरङ्गं प्रदक्षिणम् ॥ आसन्नप्रसवा नारी तैलपूर्णं यथा घटम् । वहन्तीशानकैर्याति तथा कुर्यात् प्रदक्षिणम्' ॥ तत् प्रदक्षिणं त्रिविधम् ॥ सव्य मपसव्यं सव्यापसव्यं चेति । देवं स्वस्य दक्षिणभागेकृत्वा क्रियमाणं सव्यम् । तद्विपरीत मपसव्यम् । उभयं मिळितं सव्यापसव्यम् । त्रिविधमपि इन्द्रदिगादीन्द्रदिक्पर्यन्तं कर्तव्यम् । सव्यापसव्यं सोमसूत्रस्थानादि सोमसूत्रस्थानान्तं वा कर्तव्यम् । तत्र सव्यं ब्रह्मचारिणा मपसव्यं यतीनां सव्यापसव्यं गृहिवानप्रस्थयोरिति कश्चन पक्षः । सव्यं साधारण मपसव्यं यतीनामेव सव्यापसव्यं दीक्षितानामेवेत्यपरः पक्षः ॥

प्रणामविधिः ॥



प्रणामश्चतुर्विधः । अष्टाङ्गः पञ्चाङ्गस्त्र्यङ्ग एकाङ्गश्च । अष्टाङ्गो द्विविधः । दण्डप्रणामः केवलप्रणामश्च । पद्भ्यां कराभ्या मुरसा शिरसा वाचा क्रियमाणो दण्डप्रणामः । पादद्वयेन करद्वयेनोरसा शिरसा वाचा मनसा धिया दृष्ट्याच क्रियमाणो दण्डप्रणाम इति पक्षान्तरम् । अत्र मनसेत्यनन्यमनस्कत्वमुच्यते । धियेति शिवमहिमानुसन्धानरूपस्तोत्रं विविच्यत इति भेदः । पादद्वयेन जानुद्वयेन करद्वयेन उरसा शिरसा मनसा वाचा दृष्ट्याच क्रियमाण इत्यपि पक्षान्तरम् । पादद्वयेन बाहुद्वयेन उरसा शिरसा मनसा वाचा दृष्ट्याच क्रियमाण इत्यपि कश्चन पक्षः । शिरसा हस्ताभ्यां कर्णाभ्यां चिबुकेन बाहुभ्यांच भुवं संस्पृश्य क्रियमाणः केवलप्रणामोऽष्टाङ्गः । शिरसा हस्ताभ्यां जानुभ्यांच भुवं स्पृष्ट्वा क्रियमाणः पञ्चाङ्गः । शिरो हस्तौ बाहूच जानुनि निधाय क्रियमाणः पञ्चाङ्ग इति प-

क्षान्तरम् । शिरसि हस्ताभ्या मञ्जलिबन्धनं व्यङ्गनस्कारः । केवलं शिरसैवानमन मेकाङ्गनमस्कारः । एते प्रणामा देशकालबलाद्यपेक्षया यथासंभवं विनियोक्तव्याः ॥

अग्निकार्यविधिः ॥



इत्थं परमेश्वरं स्तुतिप्रदक्षिणनमस्कारै स्सन्तोष्य स्वामिन्नग्निकार्यं करोमीति विज्ञाप्य शिवादाज्ञां गृहीत्वा सामान्यार्घ्यकरोऽन्यगारं गत्वा निरीक्षणादिचतुस्संस्कारैश्शुद्धे हस्तमाने मृत्सिकतान्यतरनिर्मितेस्थण्डिले अरणिसूर्यकान्तादिनिर्मितं श्रोत्रियागारसमाहृतं वाऽग्निं प्रज्वाल्य हुंफडन्तास्त्रेण क्रव्यादांश मग्निं निर्ऋतिकोणे निरस्य मूलेनाग्निं निरीक्ष्य हुंफडन्तास्त्रेणप्रोक्षणताडने विधाय वौषडन्तकवचेनाभ्युक्ष्य हां हं हां वह्निमूर्तयेनम इति संहारमुद्रया वह्निचैतन्यं पूरकवायुना हृत्पुण्डरीकस्थितेन वह्निना संयोज्य तत्सहितं सुषुम्नामार्गेण द्वादशान्तं प्रापय्य परमशिवसंपृक्तं कृत्वा रेचकेन पिङ्गळया निस्सार्य हां हूं वह्निचैतन्याय नमइति तमुद्भवमुद्रया ज्वलदग्नौ निक्षिपेत् । तदनु सद्योजातादिमन्त्रैर्नमोन्तैः पञ्चाभिराग्निं संपूज्य वौषडन्तशक्तिमन्त्रेण धेनुमुद्रयाऽमृतीकृत्य कवचेनावकुण्ठ्यास्त्रेणसंरक्ष्य हृदयेनाभ्यर्च्य पारमेश्वरवीर्यमिति विभाव्य वागीश्वरीं वागीश्वरंच समरसावीशादिग्गतौ ध्यात्वा वागीश्वरीगर्भनाड्या मात्मसंमुखं वागीश्वरेण तद्वीर्यं क्षिप्यमाणं विभावयेत् । ततःस्वाहान्तमूलेनाहुतिपञ्चकं दत्वा हां शिवाग्निस्त्वं हुताशनेतिनाम कृत्वा गर्भाधानादिपञ्चसंस्कारादिसंस्कृतमग्निंविभाव्य पितरौ हृदाऽभ्यर्च्य विसृज्य सामान्यार्घ्यजलेन वौषडन्तकवचेन कुण्डं मेखलांच संप्रोक्ष्य मेखलायादिक्षु पूर्वोत्तराग्रान्दशदर्भान्कवचेनास्तीर्य मेखलायाः पूर्वदक्षिणपश्चिमोत्तरदिक्षु ब्रह्मविष्णुरुद्रानन्तान्समभ्यर्च्य अग्न्यर्भकं

रक्षतेति विज्ञाप्य । पञ्चवक्त्रयुतं रक्तं सप्तजिह्वाविराजितम् । दशहस्तं त्रिणेत्रञ्च सर्वाभरणभूषितम् ॥ रक्तवस्त्रपरीधानं पङ्कजोपरि संस्थितम् । बद्धपद्मासनासीनं दशायुधसमन्वितम् ॥ शिवाग्निं ध्यात्वा तस्योर्द्ध्ववक्त्रे कनका बहुरूपाऽतिरिक्तेति जिह्वात्रयं पूर्वादिवक्त्रेषु सुप्रभाकृष्णारक्ताहिरण्मयीति जिह्वाचतुष्टयं ध्यायेत् । ततोहामग्नयेनम इति संपूज्य हां हूमग्नये स्वाहेति तिलाहुतिपञ्चकं हुत्वा । ' अग्ने त्वमैश्वरं तेजः पावनं परमं यतः । तस्मात्त्वदीयहृत्पद्मे स्थाप्य सन्तर्पयाम्यह'मित्यग्निं विज्ञाप्याग्नेः हृदयकमले आसनमूर्तिसदाशिवावाहनपूर्वकं सर्वोपचारैस्संपूज्य अग्निवक्त्रे शिववक्त्रेसन्निधानंविभाव्य स्वाहान्तमूलेन समिदन्नाज्यलाजसर्षपतिलादिभिः शतं तदर्धंवा यथाशक्ति हुत्वा ब्रह्माङ्गानां दशांशाहुतिं हुत्वा हौंशिवाय वौषडित्यूर्द्ध्ववक्त्रे पूर्णाहुतिं दत्वा स्वाहान्तमूलेन चरुं ग्रासत्रयपरिमितं हुत्वा ब्रह्माङ्गानामेकैकाहुतिं हुत्वाऽऽचमनं प्रदाय चन्दनतांबूलानिदत्वा भस्मपाद्याष्टपुष्पिकया संपूजयेत् । आज्याद्यभावे पत्रपुष्पादिभिर्वा जुहुयात् । ततः स्तोत्रप्रदक्षिणनमस्कारैस्सन्तोष्य पराङ्मुखार्घं दत्वा शिवमुत्थाप्य लिङ्गस्थे शिवे संपूजयेत् । ततः परिस्तरणदर्भान्संगृह्याग्रमध्यमूलान्याज्यसिक्तानि कृत्वा एकं दर्भं समादाय शेषमग्रप्रभृति दहेत् । तमेकं दर्भं मन्त्रौ निक्षिप्य तद्भस्मना ललाटे तिलकं कुर्यात् । तद्भस्मधारण मायुश्रीकीर्तिवर्धनं विजयारोग्यकरञ्च । ततस्तस्य दक्षिणभागे चतुरश्रं मण्डलं कृत्वा मण्डलात् प्राग्भागे पूर्वाद्युत्तरान्तासु महादिक्षु रुद्रमातृगणयक्षा नीशानादिकोणेषु ग्रहासुरराक्षसनागान् मण्डलमध्ये ईशानाग्नेयनैर्ऋतकोणेषु नक्षत्रराशिविश्वदेवान् वायुवरुणदिशोर्मध्ये क्षेत्रपालञ्चाभ्यर्च्यार्घ्यं दत्वा जलमिश्रान्नेन रुद्रादिभ्यो बलिं दत्वाऽऽचमनं दद्यात् । रुद्रादीनामभ्यर्चने नमोन्तास्तत्तन्नाममन्त्राः । बलिदाने स्वाहान्ताः । क्षेत्रपालस्यैकवचन मन्ये-

षां बहुवचनमिति भेदः । ततः प्राग्भागे चतुरश्रमण्डले इन्द्रादिविष्णवन्तानां लोकपालानां बलिं दद्यात् । ततोमण्डपाद्बाह्यांकणे गोमयमण्डले वायसादिभ्यस्समयभेदिभ्यः स्वाहा । अग्न्यादिभ्यः स्वाहा । सर्वेभ्योग्रहवास्तुदेवेभ्यः स्वाहा । इतिपृथक्पृथक् बलिं दत्वा श्वभूतपतितप्रेतादिभ्योऽप्येकं बलिंदद्यात् । यद्वा— संक्षिप्य सर्वोद्देशेन 'येरुद्ररुद्रकर्माणो रौद्रस्थाननिवासिनः । (सौम्याश्चैवतुयेकेचि त् सौम्यस्थाननिवासिनः ।) मातरो रुद्ररूपाश्च गणाना मधिपाश्च ये ॥ विघ्नभूतास्तथाऽन्येच दिग्विदिक्षु समाश्रिताः । सर्वे सुप्रीतमनसः प्रतिगृह्णंत्विमंबलिम् ॥ सिद्धिं जुषन्तु नः क्षिप्रं भयेभ्यः पांतुमांसदे'ति मन्त्रेणैकंबलिंक्षिपेत् ॥ सर्वमिदं बलिकार्यमग्निकार्याधिकारिणैव कर्तव्यं नसर्वैः । अग्निकार्याधिकारे सत्यपि होमोपकरणवैकल्ये तदशक्तौवा होममन्त्रान् होमसङ्ख्यापेक्षया दशगुणावृत्त्या जपेत् । ततश्शिवज्ञानपूजां कुर्यात् ॥

शिवज्ञानपूजाविधिः ॥

शिवज्ञानानि कामिकादयो दिव्यागमाः । तत्र कामिकं त्रिभेदं परार्द्धग्रन्थम् । योगजं पञ्चभेदं लक्षग्रन्थम् । सूक्ष्म मेकतन्त्रं पद्मग्रन्थम् । सहस्रं दशभेदं शङ्खग्रन्थम् । अंशुमान् द्वादशभेदं पञ्चलक्षग्रन्थम् । सुप्रभेद मेकतन्त्रं त्रिकोटिग्रन्थम् । विजयमष्टभेदं त्रिकोटिग्रन्थम् । निश्वासमष्टभेदं कोटिग्रन्थम् । स्वायम्भुवं त्रिभेदं सार्धकोटिग्रन्थम् । अनल मेकतन्त्रं त्रिंशत्सहस्रग्रन्थम् वीरतन्त्रं त्रयोदशभेदं लक्षग्रन्थम् । रौरवं षट्भेद मष्टार्बुदग्रन्थम् । मकुटं द्विभेदं लक्षग्रन्थम् । विमलं षोडशभेदं लक्षग्रन्थम् । प्रोद्गीतं षोडशभेदं त्रिलक्षग्रन्थम् । ललितं त्रिभेद मष्टसहस्रग्रन्थम् । सिद्धं चतुर्भेदं सार्धकोटिग्रन्थम् । सन्तानं सप्तभेदं षट्सहस्रग्रन्थम् । शर्वोक्तं पञ्चभेदं द्विलक्षग्रन्थम् । पारमेश्वरं सप्तभेद

द्वादशलक्षग्रन्थम् । किरणं नवभेदं पञ्चकोटिग्रन्थम् । वातुळं द्वादशभेदं लक्षग्रन्थम् । एवमष्टाविंशतिभेदा दिव्यागमाः । परार्धशङ्खपद्मषट्पञ्चाशत्सहस्राधिकैः षडुत्तरषष्ट्यालक्षन्यूनं पद्मंचेत्येतावत्संख्या ग्रन्थाः । तदुपभेदाः अष्टोत्तरद्विशतसङ्ख्याः । इत्थंभूतान् सर्वानपि दिव्यागमान् यथालाभं कतिचिद्वा एकंवा तत्रापि स्वपूजोपयोगिसंहितामात्रं वा लक्षणशालिषु पुस्तकेषु लेखयेत् । पुस्तकेषु द्वाविंशत्यंगुळदीर्घं चतुरंगुळविस्तारं पुस्तकं लक्ष्मीभद्रम् । एकविंशत्यंगुळदीर्घं त्र्यंगुळविस्तारं श्रीरक्षम् । विंशत्यंगुळदीर्घं यवहीनत्र्यंगुळविस्तारं चन्द्रकान्तम् । इदमुत्तमत्रयम् । अष्टादशांगुळदीर्घं अर्धाधिकांगुळद्वयविस्तारं नळिनम् । सप्तदशांगुळदीर्घं त्रियवाधिकांगुलत्रयविस्तारं श्रीनिवासम् । षोडशांगुळदीर्घं द्वियवाधिकांगुळद्वयविस्तारं श्रीभद्रम् । इदं मध्यमत्रयम्। पञ्चदशांगुळदीर्घं यवाधिकांगुलद्वयविस्तारं लक्ष्मीनिवासम् । चतुर्दशांगुलदीर्घं मंगुळद्वयविस्तारं उमाभद्रम् । त्रयोदशांगुळदीर्घं यवहीनांगुलद्वयविस्तारं वीरभद्रम् । एवंविधेषु पुस्तकेषु यजमानस्ययान्यनुकूलानि पत्रीयचतुष्टयांशतृतीयांशयोर्मद्ध्येमद्वयगतसुषिरवन्ति कारयित्वा यवोदरमानैः कार्पाससूत्रै राबध्नीयात् । एतेषां शिवज्ञानपुस्तकानां पूजनाय शिवस्य दक्षिणपश्चिमे वायव्यभागेवा त्रयस्त्रिंशद्धस्तप्रभृतिषु त्रिहस्तपर्यन्तेषु परिमाणेष्वन्यतमपरिमाणवद्विद्याकोशगृहं कृत्वा सुगन्धिचन्दनाद्यनुलिप्तभित्तिकस्य तस्य मध्ये नागदन्तादिरचितं सुवर्णरेखादिचित्रितं विद्यासिंहासनं निधाय तत्र दुकूलादिकमास्तीर्य तन्मध्ये स्वर्णरूप्यताम्रकांस्यारकूटलोहदारु वेणुविदळिकादिकृतां विद्यारत्नकरण्डरूपां मञ्जूषां निधाय तस्यां पुस्तकानि निदद्ध्यात् । तेषु 'सर्वेभ्यश्शिवज्ञानेभ्योनमः' इति गन्धपुष्पधूपदीपनैवेद्यैस्संपूज्य ॥ 'सर्वज्ञानप्रदं शम्भुं सर्वाज्ञानविघातकम् । कायेन मनसा वाचा विद्यापीठाश्रयंभजे'इति स्तुत्वा नमस्कुर्यात् । पुस्तकालाभे

चतुरश्रमण्डले अष्टदळपद्मं तदावारक मष्टादशदळपद्मंच लिखित्वा कर्णि-कायां ह्रौं शिवायनमः । हां वागीशायनमः । इति वागीश्वरसहितं शिवं संपूज्य पूर्वादिषु दशसु दळेषु कामिकादीन् सुप्रभेदान्तान् शिवेना-धिकरणान्तरानिरपेक्षेण साक्षान्निर्मिततया शैवसंज्ञान् दिव्यागमान् संपूज्य अष्टादशसु दळेषु विजयादिवातुळान्तान् अनादिरुद्राद्यधिकरणेन शिवेन निर्मिततया रौद्रसंज्ञान् पूजयेत् । अथ गुरुं स्वपीठस्थं गत्वा तस्य पादौ प्रक्षाळ्य शिवबुद्ध्या गन्धादिभिस्संपूज्य पुष्पाञ्जलित्रयं कृत्वा साष्टाङ्गं त्रिः प्रणम्योत्थाय भूमौ जानुनी न्यस्य कृताञ्जलिपुटः क्षमस्वेति ब्रूयात् । यदि 'मधुलुब्धो यथा भृङ्गः पुष्पात्पुष्पं वनान्तरे । ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत्' इति शास्त्र मनुसृत्याधिकज्ञानार्थं मन्यं गुरु माश्रयति, तथाऽपि पूर्वगुरुमपि यथापूर्वं पूजयेत् । ततश्शिवसमीपमागत्याष्टपुष्पि-कया शिवं संपूज्य विशेषार्घ्यं दत्वा प्रणामपुरस्सर मभितः प्रार्थनां कृत्वा 'न्यूनं वाऽप्यधिकं वाऽपि यन्मया मोहतः कृतम् । सर्वं तदस्तु संपूर्ण त्वत्प्रसादात् प्रभोममे'ति संप्रार्थ्य । 'अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षन्तव्यं भक्तवत्सल ॥ स्वामिन्क्षुद्रेण दासेन मलीमसधिया मया । कदर्थितो वायद्भक्तिवशात् प्रीतः क्षमस्वत' दिति विज्ञापयेत् । ततस्सद्योजाताद्रिक्रमेण पञ्चसुशिरस्सुशिवमभ्यर्च्या-स्त्रादिहृदयान्तान्यंगानिच प्रातिलोम्येन संपूज्य पूर्ववद्यथेष्टमूर्द्धमुखोभवेति संप्रार्थ्य हां ह्रौं शिवाय साङ्गाय पराय्यखार्घ्यं स्वाहेति पराय्यखार्घ्यं दत्वा स-द्यादीनि ब्रह्माण्यस्त्रादीन्यङ्गानिच गर्भावरणरूपाणि देवस्यांगेषु योजयेत् । अन्येभ्योऽपि तत्तदावरणदेवेभ्यः पराय्यखार्घ्यं दद्यात् । हुंफडन्तास्त्रेण करद्वयांगुष्ठतर्जन्यग्राभ्या मूर्द्धं पुष्पं प्रक्षिपन्नाराचमुद्रया मन्त्रानुत्थाप्य हां हं हां शिवमूर्तयेनमः । इतिदिव्यमुद्रया शिवस्य हृदयस्थाने संयोज्य तेषां

तत्र लयं विभावयेत् । तदनु गुरुगृह विद्यापीठ सप्तगुरु महालक्ष्मी गणपति द्वारपालेभ्योऽपि पराङ्मुखार्घ्यं दत्वा स्वस्वमन्त्रेणतान्विसर्ज येत्। ततः परिवारदेवेभ्योपि पराङ्मुखार्घ्यंदत्वा प्रत्येकं सपुष्पैर्वस्त्रै राच्छाद्य अस्त्रमन्त्रेण पेटकस्य पार्श्वेषु निदद्ध्यात् । ततश्शिवमन्त्रं समुच्चार्य पद्मपीठाल्लिङ्गमादाय दुकूलादिभिस्संवेष्ट्य पेटकमध्ये विन्यस्य भीमरुद्रं स्मरन् रक्षेति शिवाज्ञां विज्ञाप्य पिधानं कुर्यात् । ततः मिश्रपूजां कुर्यात् । प्रागकृतचण्डपूजं शिवस्योद्वासनानन्तर मावाहनादिसर्वोपचारसहितां चण्डपूजां कुर्यात् ॥

इत्थं प्रातर्मध्याह्नसायार्धरात्रिषु प्रातरादिषुकालेषु वा प्रातरादिकालद्वये वा प्रातःकालमात्रेवा घटिकात्रयेण पूजा कर्तव्या । संक्रान्त्युपरागाष्टमीचतुर्दश्यादिव्यतिरिक्तकालेषु बुभूक्षुणा रात्रौ पूजा वर्जनीया । तेनापि त्रिकालपूजा क्रियतेचे दस्तमयं समारभ्य घटिकात्रयमध्ये सायङ्कालपूजा समापनीया । मुमुक्षोस्तु नकालनियमः । यद्वा बुभुक्षोरपि न कालनियमः । यथासंभवकाले तु यथासंभवनाडिकाः । 'आत्मार्थयजनं कुर्या द्यथाशक्त्यनुरोधत' इत्यप्यागमदर्शनात् । एवं प्रपञ्चोपचारान् कर्तुमशक्नुवन् षोडश पञ्चोपचारान्कुर्यात्। आवाहनासन पाद्यार्घ्याचमनस्नान वस्त्रोपवीत गन्धपुष्प धूपदीप नैवेद्य मुखवास स्तोत्रसहितप्रणामप्रदक्षिणसहितविसर्जनानि षोडशोपाचराः । यद्वा— आसनावाहन पाद्याचमनार्घ्यस्नान वस्त्र गन्धपुष्प नैवेद्य तांबूल धूपदीपारात्रिक भस्म चुळक्कोदकानि षोडशोपचाराः । आवाहनासन पाद्याचमनार्घ्य स्नान वस्त्र—गन्धपुष्पनैवेद्यानि दशोपचाराः । गन्धपुष्पधूपदीपनैवेद्यानि पञ्चोपचाराः । यद्यपि 'पार्थिवं गन्धपुष्पाद्यं कन्दमूलफलादिकम् । आप्यं वारि पयो वस्त्रं दधि गोमूत्रकादिकम् ॥ आग्नेयं हेमरत्नादि दीपमाभरणादिकम् । वायव्यं चामरं धूपं व्यजनं तालवृन्तकम् ॥ नाभसं गेयवाद्याद्यं वीणावेणुस्वना-

दिकम् । एते पञ्चोपचारास्तु कथिता श्शास्त्रवेदिभि'रिति पञ्चोपचाराः प्रपञ्चेन दर्शिताः । अथाप्यशक्तानां गन्धादिनैवेद्यान्तोपचारा एव क्रमात् पार्थिव नाभस वायव्य तैजसाप्याः पञ्चोपचाराः । सर्वोपचाराश्शिवस्यावाहनवत् निश्वासोछ्वासरूपचन्द्रार्कगतिनिरोधेन कर्तव्याः इत्यागमप्रसिद्धेः केषुचि दुपचारेषु मात्रागणनेन कालनियमोऽप्यागमेषु दर्शितः । आवाहने द्वादश मात्राः । पाद्ये पञ्च । आचमने तिस्रः । अर्घ्ये एकम् । गन्धे षट् । धूपे द्वादश । दीपे षट् । नैवेद्ये चतुर्विंशतिः । आरात्रिके सप्त । नीराजने षोडश । भस्मार्पणे सप्त । छत्रे पञ्च । चामरे दश । व्यजने तिस्रइति । एवं चन्द्रार्कगतिनिरोधेन क्रियमाणेषूपचारेषु तत्तन्मन्त्राः मनसैव जप्तव्याः । मन्त्राश्च प्रासाद शिवमन्त्र पञ्चब्रह्म षडङ्गरूपा स्तत्तदुपचारेषु यथाविधि विनियोक्तव्याः । तत्रावाहनपाद्य वस्त्र विलेपनभूषणदर्पणच्छत्रचामर तालवृन्त जपस्तोत्र नमस्कारेष्वन्येषुचविशेषोक्तिरहितेषूपचारेषु मन्त्रान्ते नमश्शब्दः । अर्घ्यस्नानधूपदीपनैवेद्यपानीयमुखवासनीराजनपवित्रजपपूजासमर्पणेषु स्वाहाशब्दः । मार्जन सेचन पुष्पपूर्णाहुतिषुवौषट्शब्दः। मलस्नानशोधन पाशच्छेदन प्रोक्षण ताडनभेदन विघ्ननिवारणेषु हुंफट्शब्दः । रक्षायां फट्शब्दः । आचमनेस्वधाशब्दः । एवमुक्तनियमैः पञ्चोपचारानपि कर्तुमशक्तः केवल मष्टपुष्पिकयाऽर्चयेत् । 'आसने प्रथमं पुष्पं दातव्यं शुद्धचेतसा । मूर्तिध्यानं हृदा कार्यं पुष्पेणैवापरेणतु ॥ पञ्चपुष्पप्रदानेन पञ्चाङ्गानि प्रकल्पयेत् । शिवं तथाऽष्टमेनैव कथिताचाष्टपुष्पिका' । पञ्चाङ्गानि मूर्धादीनि पञ्चब्रह्माणि नेत्रवर्जितानि हृदयादीनि वा । 'एतानि चाष्टपुष्पाणि सर्वसाधारणानि तु । सर्वसिद्धिप्रदानीह तथा सर्वाश्रमेषु च॥ सर्वेषां चैव वर्णानां सर्वसाधारणानिच॥ एककालं द्विकालं वा त्रिकालं वा प्रपूजयेत् ॥ प्रातर्मध्याह्नसमये तथा

चास्तमिते रवौ । पूजयेत्परया भक्त्या अष्टपुष्पविधानतः ॥ दरिद्राणां मनाथानां बालस्त्रीबालिशेषु च । भोगिनां व्याधिजुष्टानां तथा ध्यानार्पितात्मनाम् ॥ शिवशास्त्रानुरक्तानां नानासिद्धिहितात्मनाम् । अनुरक्तविरक्तानां कथितासाऽष्टपुष्पिका'इति कालोत्तरवचनात् । भोगो राज्यपरिपालनम् । तद्वन्तो भोगिनः । तेषां राज्यपरिपालनं कुर्वतामित्यर्थः । राज्यपरिपालनेन बहुषु शिवस्थानेषु शिवभक्तानां गृहेषुचशिवपूजाप्रवर्तनेन बहुपुण्यं लभ्यते । शिवशास्त्रानुरक्तानां तद्व्याख्यानतदध्ययननिरतानामित्यर्थः । शिवशास्त्रव्याख्यानेन हि लोके यथावत् शिवपूजाप्रवर्तनेन बहु पुण्यं लभ्यते । तदध्ययनेन चाग्रे स्वयं यथावद्बहुकालपूजनेन बहुपुण्यं लभ्यतइति ॥

कपिलापूजाविधिः ॥

इति शिवपूजां समाप्य कपिलापूजां कुर्यात् । यथा कपिलां गां नन्दा सुभद्रासुरभि सुशीला सुमनस्संज्ञां पञ्चगोत्ररूपायै कापिलायैनमइति गन्धपुष्पादिभिरभ्यर्च्य 'सौरभेयि जगन्मात र्देवाना ममृतप्रदे । गृहाण वरदे ग्रास मीप्सितार्थं च देहि मे' इति ग्रासं दत्वा 'वन्दिताऽसि वासिष्ठेन विश्वामित्रेण जह्नुना । कपिले हरमे पापं यन्मया दुष्कृतं कृत'मिति संप्रार्थ्य 'गावो ममाग्रतो नित्यं गावः पृष्ठत एव मे । गावो मे हृदयेचापि गवां मध्ये वसाम्यह' मिति जपेत् । एतं नरो जपेन्मन्त्री त्रिसंध्यं नियतश्शुचिः । विमुक्तस्सर्वपापेभ्य श्शिवलोकं प्रपद्यते ॥

परार्थालयदर्शनम् ॥

ततः परार्थालयसमीपस्थःपूजान्ते शिवालयं गत्वा तत्सेवामपि कुर्यात्।

तत्रायं क्रमः— देवालयसमीपं गत्वा गोपुरद्वारबाह्ये वा बलिपीठस्य बाह्ये वा स्थूललिङ्गात्मकस्य विमानस्य नमस्कारं कुर्यात् । ततो भद्रलिङ्गस्य बलिपीठस्य ध्वजस्तम्भस्य वृषभस्यापि नमस्कारं कृत्वा । (श्लो) ' अन्तः प्रवेशे शिवदर्शनेच शिवार्चनेतत्फलसिद्धिलाभे । देह्यभ्यनुज्ञां भगवन् प्रसन्न स्त्वत्पादपद्मप्रणतायमह्य'मिति वृषभं संप्रार्थ्य बलिपीठाग्रप्रदेशे साष्टाङ्गं शिवं प्रणमेत् । देहं वस्त्रेणाच्छाद्य नप्रणमेत् । शिवस्याग्रपृष्ठ वामभाग गर्भगृहेषु च नप्रणमेत् । प्रत्यङ्मुखे चोत्तरदिङ्मुखेच लिङ्गे वामभागे प्रणमेत्। प्रणम्यच देवस्य पुरतः पुष्पाञ्जलिं क्षिपेत्। ततः प्रदक्षिणंकुर्यात्। गर्भगृहेप्रदक्षिण मर्चकस्यैव। अन्तर्मण्डले प्रदक्षिणं दीक्षितानामेव। अन्तर्हारादिषु सर्वेषाम्। तत्रान्तर्हा रे प्रदक्षिण मेकगुणम्। मध्यहारेत्रिगुणम्। मर्यादायांचतुर्गुणं।महामर्यादायां पञ्चगुणं।क्षेत्रावधौषड्गुणं।एवंबलकालाधिकारानुरूपेप्रदेशे एकविंशतिपञ्चदशवा सप्तवापञ्चवात्रीणिवा प्रदक्षिणानिकुर्यात्। अत्यन्तमनवसरे एकंप्रदक्षिणंवा कुर्यात्। एवंप्रदक्षिणंकुर्वन् गर्भगृहेन्तर्मण्डलेच संभावितं सोमसूत्रलङ्घनं नकुर्यात्। तल्लङ्घनवर्जनार्थं गर्भगे हे सोमसूत्रप्रभृति सव्यापसव्यमेव कर्तव्यम् । ततोबहि रन्तर्मण्डलमात्रे सव्यापसव्यम् । तत्रैन्द्रादि सोमसूत्रादि वा कार्यमिति प्रागुक्तम् । प्रदोषेतु वृषादिचण्डनाथान्तं वृषभं सोमसूत्रकम् । पुनर्वृषं चण्डनाथं नाळदेशस्य पार्श्वतः ॥ पुनः प्रयाया च्चण्डञ्च तथैव वृषपृष्ठकम् । एवं सव्यापसव्यंतु प्रदक्षिण मिहोच्यते ॥ आद्यन्तं वृषदेवस्य चतुस्स्थान मुदाहृतम् । त्रिचण्डस्थानसंयुक्तं द्विस्थानं सोमसूत्रक'मित्युक्तप्रकारेण कर्तव्यम् । सोमसूत्रंच प्रासादाद्बहिर्नाळप्रदेशे प्रासादविस्तारमानं तदर्धमानं वा । तस्य लङ्घने दोषः । सूत्राद्बहिर्लंघनेतु नदोषः ॥ तदभ्यन्तरेऽपि सङ्कटे तृणादिक मन्तर्धाय लङ्घनीयम् । तृणैः काष्ठै स्तथा पर्णैः पाषाणै र्लोष्टकादिभिः । अन्तर्धानं पुनः कृत्वा सोमसूत्रं तु लङ्घयेत्' इतिवचनात् । क-

चिदपसव्यस्य निषेधो दृश्यते । 'सोमसूत्रद्वयं यत्र यत्र वा विष्णुमन्दिरम् । अपसव्यं नकुर्वीत कुर्यादेव प्रदक्षिण'मिति ॥ ततो द्वारपालं नन्दिकेश्वरं च नमस्कृत्य तत्तदनुज्ञयाऽन्तः प्रविश्य विघ्नराजं पुष्पाञ्जलिविकिरण मस्तकाहतिपूर्वकं नमस्कृत्य मण्डपं प्रविश्य देवदेवं नमस्कृत्य मस्तके हृदये वा ऽञ्जलिं बद्ध्वा यथाधिकारं वैदिकागमिक पौराणिक लौकिक द्राविडादिस्तोत्रैः स्तुवीत । तत्राचार्यस्यैव गर्भगृहं प्रविश्य सेवा । इतरेषां ब्राह्मणाना मर्धमण्डपं प्रविश्य । क्षत्रियाणा मर्धमण्डपद्वारसुखेऽवस्थाय । वैश्यानां वृषाग्रे । शूद्राणां वृषपृष्ठे । वैश्यशूद्राणां वृषाग्रे वृषपृष्ठेच गोमयेन चतुरश्रमण्डलं कृत्वा तत्रैव पुष्पाञ्जलिर्दातव्यः। एवं नृत्तमूर्त्यादीनामपिपुष्पोपहारपूर्वकं प्रणामः कार्यः । एवं प्रणामानन्तरं चण्डेश्वरं प्रणमेत् । इत्थं पीठादिचण्डान्तनमस्कारानन्तरं देवालये संभावितानाम पराधानां क्षाळनाय देवस्य सन्निधौ यथाशक्ति देवस्यमूलमन्त्रं जप्त्वा देवस्य पृष्ठीकरणं विना निर्गच्छेत् । अपराधाश्च शिवालयमध्ये वाहनारोहण सोपानहसंचारगोपुरप्रतिमाच्छायालंघन निर्माल्यस्पर्श तल्पङ्घन शिवबलिपीठमध्यसञ्चार प्रमदास्पर्श रागपूर्वकतद्वीक्षण वृथाहास गानभाषण सोत्तरीयप्रदक्षिणनमस्कारैकहस्तनमस्कार वामभागादिनमस्काराकालनमस्कारप्रभृतयः । एतेषु संभावितान् वर्जनीयानपराधान् क्षमाप्य निर्गच्छेत् । एवं शिवं सेवमानेन ग्रामभूषणादिपत्रपुष्पपर्यन्तेन द्रव्येणवा संमार्जनादिना शरीरव्यापारेण वा देवालयोपकारपर्यवसायिवाक्यात्रेणवा कैङ्कर्यं कृत्वैवसेवनीयम् । प्रतिदिनं सेवाया मशक्तश्चेत् अष्टम्यादिषु सेवेत । अष्टम्यामष्टभिर्दिवसैः पर्वणि पक्षेण संक्रान्तौ मासेनच कृतस्य पापस्य क्षयः । प्रदोषे त्रिविधकरणार्जितानां महत्तराणामपि पापानां क्षयः । त्रिपुवायनोपरागमहोत्सवादिषु सेवया शिवपदप्राप्तिः । ततः गृहमागत्य यथावसरं स्वल्पमात्रं वा सिद्धान्तशास्त्रश्रवणं तदभ्यासंवा दीक्षितैरसमहादीक्षितसन्निधिं परिहृत्य कु-

र्यात् । 'नप्रकाश्यमिदं ज्ञान मभक्तानां वरानने । रक्षणीयं प्रयत्नेन तस्करेभ्यो यथाधन'मिति वचनात् । अथ मध्याह्नसमये प्रपञ्चेन संक्षेपेनाष्टपुष्पिकामात्रेण वा पूजयेत् । कुतश्चिद्वैकल्यात् परिगृहीतलिङ्गार्चनालाभे तुल्यानुष्ठायिना परेणार्चिते लिङ्गे संक्षेपेणाष्टपुष्पिकामात्रं कुर्यात् । 'प्रणवो मातृका माया व्योमव्यापी षडक्षरम् । प्रासादोऽघोरमन्त्रश्च सप्त साधारणामताः '॥ एवं यथाकथंचित् शिवमभ्यर्च्य काले भोक्तुमिच्छन् सर्वस्मादपि पाकादग्रमुद्धृत्य तदर्धं शिवाय निवेद्य अर्धेन यथाधिकारं वैदिकं शैवं च होमं कुर्यात् । वैदिको वैश्वदेवहौमः । शैवः चुल्लीहोमः ॥

चुल्लीहोमः ॥

तस्यायं क्रमः । (१) चुल्लीं निरीक्षणादिभिस्संशोद्ध्य तत्राग्निं पूरककुंभकाभ्यां बिन्दुनाभिस्थानाभ्यां सहैकीकृत्य भौतिकबैन्दवजाठराग्नित्रयं रेचकेन निस्सार्य पिङ्गळया चुल्लिकाग्नौ निक्षिप्य तदनन्तरं अग्नये नमः । सोमाय नमः । सूर्याय नमः । बृहस्पतये नमः । प्रजापतये नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो विश्वेभ्यो नमः । अग्नये स्विष्टकृते नमः । इत्यग्नावाग्नेयादिपूर्वान्तमग्नयादीन् संपूज्यस्वाहान्तैस्तत्तन्मन्त्रैर्हुत्वा तान्विसर्जयेत् ॥

निर्माल्यभोजनम् ॥

ततो निवेदितं तच्छेषं वा भुंजीत । शिवनिवेदितभोजने फलवचनानि बहूनि श्रूयन्ते— 'मदीयभुक्तानिर्माल्यं पादांबु कुसुमं दळम् । धर्ममर्थंच कामञ्च मोक्षं च ददते क्रमात्'इति ॥ तन्निषेधवचनान्यपि श्रूयन्ते ' नधारयेत् क्वचिच्छंभो र्निर्माल्यं नच भक्षये'दित्यादीनि । एतेषां शिवदीक्षासहित तद्रहितविषयत्वेन व्यवस्था । ' निर्माल्यं निर्मलं शुद्धं निर्मलत्वा

१. बुद्धिमिति पाठभेदः ।

दनिन्दितम् । तस्मादभोज्यं निर्माल्य मशुद्धै रशिवात्मकैः ॥ जिह्वाचाप-ल्यसंयुक्त श्शिवसंस्कारवर्जितः । शिवनिर्माल्यभोजी चेत् रौरवं नरकं व्रजे' दिति शिवपुराणवचनादिति केचित् । कामिकादिसिद्धान्ततन्त्रेषु दीक्षि-तानामेव समयाचारविधानेन 'निर्माल्यं नचभुञ्जीते'ति ' शिवभक्तान्नं न निन्दये'दित्यादीनि निषेधवचनानि 'निर्माल्यभक्षणेऽघोरं प्रमादादयुतं-जपे'दिति प्रायश्चित्तविधानानि च श्रूयन्ते । अतः 'स्वाद्यानिचादनीयानि पेयान्यन्यानि यानि च । देयानि तानि वै शंभो रश्नीयाद्दासभावतः' इत्या दिपुराणवचनानि वैदिकपौराणिकपाशुपतादिविहित शिवसंस्कारेण ये दी-क्षितास्तेषामेव शिवनिर्माल्यं ग्राह्यम् । नतु कामिकादिसिद्धान्ततन्त्रेण दीक्षितानामिति केचित् । कामिक एव—'अशुद्धात्माऽशुचिर्लोभान्मद्भक्तं पावनं परम् । भक्षयन्नाशमाप्नोति रसभोक्ता यथाद्विजः ॥ मल्लिङ्गधारि-णोलोके देशिका मत्परायणाः। मदेकशरणास्तेषु योग्यं नैवान्यजन्तुषु' इति वचनात्, ' उपवाससहस्राणि प्राजापत्यशतानिच । शिवप्रसादसिद्धस्य कोटयंशेनापि नोसमाः' इत्यादिवातुळागमप्रभृतिवचनदर्शनाच्च । सि-द्धान्ततन्त्रे दीक्षितानामपि शिवनिवेदितं प्रशस्तमेव । शिवनिर्माल्यनिषेध-प्रायश्चित्तवचनानि तु ' देवस्वं देवताद्रव्यं नैवेद्यंच निवेदितम् । चण्ड-भुक्तबहिःक्षिप्त'मिति पञ्चविधनिर्माल्यविषयाणि। कामिके 'देवस्वं देवताद्रव्यं नैवेद्यंच निवेदितम् । चण्डद्रव्यञ्च निर्माल्यं निर्माल्यं षड्विधं भवेत् ॥ ग्रामादीशस्य देवस्वं देवद्रव्यं पटादिकम्। नैवेद्यं कल्पितं तस्मै देवोच्छि-ष्टं निवेदितम् ॥ चण्डद्रव्यंतु तद्दत्तं निर्माल्यं प्रेरितं बहि'रिति निर्माल्य-षाड्विध्य निर्माल्योपभोगदोषसंकीर्तन तत्प्रायश्चित्तोपदेशानन्तरमेव निवेदि-ताख्यनिर्माल्यस्वीकारानुमत्यर्थं 'मशुद्धात्माऽशुचिर्लोभा'दित्यादिसार्धश्लो-कद्वयस्य पठितत्वात् । एवञ्च सिद्धान्ततन्त्रेषु शिवनिवेदितनिषेधवचनानि

तदुक्तशिवदीक्षारहितविषयाणीत्यपरे ॥ सुप्रभेदे— 'सदाशिवस्य निर्माल्यं मनुष्याणां नभोजनम् । पशूनांच गजानांच जलेवाऽथ विनिक्षिपेत्॥ अथवा वह्निना दह्याद्भूमौवा खातयेद्बुधः'इति सदाशिवनिर्माल्यस्य मनुष्यमात्रसाधारण्येनाभोज्यत्वं प्रतिपाद्य तस्यभूवन्हिगोगजादिष्वेव प्रतिपत्तिवर्णनाच्च सदाशिवनिर्माल्यं दीक्षितानामप्यभोज्यमेव । तेषां शिवनिर्माल्यं प्रशस्तमिति वचनानि तु सकळनिर्माल्यविषयाणि । ' प्रतिमासु च सर्वासु न चण्डोऽधिकृतोभवे'दिति सकळेषु चण्डाधिकारनिषेधात् । कारणे'सकळानांच नैवेद्यं सर्वेषां भोजनं भवे'दिति सकळनैवेद्यानुमतिवर्णनात् । तदपि शिवदीक्षितैस्तत्परिचारकैरेव भोक्तव्यम् । सुप्रभेदे—'सदाशिवस्य निर्माल्य'मित्याद्युक्त्यनन्तरं'सकळानां तु निर्माल्यं परिचारकभोजनम् । तदन्यजनानां तु भोजने दोषकृद्भवेत्'इत्युक्तत्वादित्यपरे । सदाशिवनिर्माल्येष्वपि मनुष्यादिस्थापितशिवलिङ्गार्पितेष्वेव निषेधः । नतु चरलिङ्गादिषु । तेषु चण्डाधिकाराभावात्। 'बाणलिङ्गे चरे लोहे रत्नलिङ्गे स्वयंभुवि । प्रतिमासुच सर्वासु नचण्डोऽधिकृतो भवेत् ॥ लिङ्गेस्वायंभुवेबाणे रत्नजेरसनिर्मिते । सिद्धप्रतिष्ठितेलिङ्गे न चण्डोधिकृतोभवेत्' इति च वचनादित्येके । चललिङ्गादिषु चण्डाधिकारो नास्तीति वचनानि वैदिकपौराणिक वामदक्षिणतन्त्रादिविषयाणि । नतु कामिकादिसिद्धान्तविषयाणि । 'स्थिरेचरे तथा रत्ने मृद्दारौशैलकल्पिते । लोहचित्रमये बाणे स्थितश्चण्डोनियामकः ॥ सिद्धान्ते नेतरे तन्त्रे नवामे नच दक्षिणे'इति ॥ 'अव्यक्तव्यक्तलिङ्गेषु मण्डले स्थण्डिलेऽनले । चरे स्थिरे तथा रत्ने मणिचित्रादिके तथा ॥ गन्धान्नसंभवे लिङ्गे मृद्रुस्मफलकल्पिते । तथा पुष्पमये लिङ्गे चण्डपूजा नियामिके'ति च कालोत्तरादिषु विशेषदर्शनात् । अतो निर्माल्यविधिनिषेधयोश्चरस्थिरादिविषयत्वेननव्यवस्था । किन्तु निर्माल्यविशेषविषयत्वेन । 'तांबूलं भस्म तैलं च गन्धपुष्प मधूदकम् । फलादि भक्षणद्रव्यं निर्माल्य-

मिति नोच्यत'इति वचनादितिकेचित् । कामिके—'स्वेष्टलिङ्गे च यद्दत्तं चरुवत्तन्न संशयः । नैवेद्यं भ्रातृपुत्राणां भगिनीनां च दापये'दिति चरुदृष्टान्तवचनात् । कारणे—'स्फाटिकं बाणलिङ्गञ्च स्थापितं चरमेव वा । तन्निवेदितनिर्माल्यं न निर्माल्यं प्रकल्पयेत् ॥ बालानां युवतीनांच भोजनं बलवर्द्धन'मित्यनिर्माल्यत्वप्रतिपादनाच्च चरालिङ्गादिनिवेदितान्नमपि भोज्यमेव । किन्तु पूजकस्य न भोज्यम् । 'नैवेद्यं भ्रातृपुत्राणा'मित्यादिविशेषवचनात् । तांबूलादिमात्रस्य ग्राह्यत्ववचनंतु मनुष्यादिस्थापितलिङ्गविषयमित्यपिकेचित् । 'नैवेद्यं कल्पयित्वातु शिवायेतितदूर्द्धृतः । निवेद्यं मह्यमुच्छिष्टं भुङ्क्ते प्रत्यहमादरात् ॥ सोऽयं मत्सदृशः प्रोक्तः चरुद्रव्यस्तथाभवे'दिति कामिके निवेदनकर्तुरपि तदुच्छिष्टभोजनप्रतिपादनात्पूजकस्यापि शिवनिवेदितं भोज्यमेव । तस्य निवेदितभोजननिषेधवचनानितु संहाररुद्रादिनिवेदितविषयत्वेनयोज्यानीत्यपि केचनवदंति । सदाशिवमूर्तौ परमशिवावाहनपुरस्सरं तत्पूजानिरूपणावसानएव तन्निवेदितनिषेधस्यदिव्यागमेषुबहुशश्श्रवणात् विधिनिषेधसहस्रशबळितं सर्वविधमपि शिवनिर्माल्यंवर्जनीयमित्येवयुक्तम् । 'श्रूयतेचमहान्दोषःश्रूयतेच महाफलम् । फलं तत्रपरित्याज्यंदोषोहिबलवत्तर' इति वचनात् । नचकामिके—'पत्रंपुष्पं फलं तोयमन्नं पाद्यमथौषधम् । अनिवेद्य नभुञ्जीत भगवन्तं सदाशिव'मित्यनिवेदितभोजनेऽपि निषेधःश्रूयते इति वाच्यम् । तस्यातिथिसत्काररहितभोजननिषेधव त्तच्छेषभोजनविधिपरत्वसंभवात्, 'अन्नाद्य मौषधं तोयं पत्रं पुष्पं फलादिकम् । शिवाय दत्वातच्छेषं भोज्यं भुञ्जीत बुद्धिमा'नितिं सिद्धान्तशेखरे तथैवप्रतिपादनाच्चेत्येवमितरेवर्णयन्ति । एवं निर्माल्यविधिनिषेधवचनानां विचारे नव पक्षास्संपन्नाः । शिवसंस्कारूपदीक्षावतामेव शिवनिर्माल्यानुमतिरन्येषान्तन्निषेध इत्याद्यः पक्षः । शिवसंस्कारवत्स्वपि वैदिकदीक्षावतामेवात्याश्रमिप्रभृतीनांतदनुमतिः, नतुकामिकादिसिद्धान्ततन्त्रो-

क्षदीक्षावतां तन्निषेधतद्भक्षणप्रायश्चित्तविधानदर्शनादिति द्वितीयः पक्षः । निवेदितव्यतिरिक्तपञ्चविधनिर्माल्यविषय एव निषेधप्रायश्चित्तोपदेशः । निवेदितं तु तेषामपि ग्राह्यमिति तृतीयः पक्षः । निवेदितमद्ध्येऽपि शिवालिङ्गनिवेदितनिषेधात् सकळनिवेदितमेव ग्राह्यमिति चतुर्थः पक्षः । शिवालिङ्गनिवेदितं न सर्वनिषिद्धं, किन्तु मनुष्यादिप्रतिष्ठापित स्थिरलिङ्गनिवेदितमेव । चरलिङ्गादिनिवेदितन्तुग्राह्यम् । तत्र चण्डाधिकाराभावादिति पञ्चमः पक्षः । कामिकादिगत निवेदितनिषेधतदनुमतिवचनानां स्थिरचरादिविषयतया न व्यवस्था, कामिकादिसिद्धान्तमार्गे चरादिपूजायामपि चण्डसद्भावात्।किन्तु अन्नादिविषयो निषेध । फलापूपतांबूलादिविषयाऽनुमतिरिति व्यवस्था । तदितरेषुविशेषवचनसद्भावादितिषष्ठःपक्षः । चरलिङ्गादिनिवेदितमन्नादिकमपिग्राह्यमेव । किन्तु भ्रात्रादिभ्योदेयं, नतु पूजकेनभोक्तव्यमिति सप्तमःपक्षः। शिवार्पणबुद्ध्याशिवनिवेदितं पूजकेनापि भोज्यमित्यष्टमः पक्षः। फलनिषेधवचनयोर्निषेधवचनस्य बलीयस्त्वात् सर्वस्यापिशिवनिर्माल्यस्यवर्जनमेव युक्तमिति नवमःपक्षः ॥ एतेषु नवमःपक्षस्तावदत्यन्तमयुक्तः । शिवनिर्माल्यस्वीकारे महाफलप्रतिपादकानां बहूनां दिव्यागमपुराणादिवचसा मप्रामाण्यप्रसङ्गात् । नह्यार्षेषु वचनेषु वर्णमात्रमप्यप्रामाण्यं सहते । नितरां शिववाक्येषु । येष्वर्थवादकतया प्रामाण्योपपादनमपि महते प्रत्यवायायेति सर्वदिव्यागमघण्टाघोषः । 'श्रूयतेच महान्दोष'इत्यादि वचनं तु यत्र विधिनिषेधयोरुभयोरप्यन्यत्रप्रामाण्यावकाशः तत्र तयोः द्वयोः क्वचिन्मेळने निषेधोबलीयानित्येतत्परम् । यथाद्वादश्यामामलकप्राशस्त्यवचनप्रामाण्य मर्कवारमेळनरहितद्वादश्यां सावकाशं अर्कवारे तन्निषेधवचनप्रामाण्यं द्वादशीमेळनरहितेऽर्कवारे सावकाशम् । द्वादश्यर्कवारमेळने सत्यामामलकफलनिषेधवचनद्वयप्राप्तौ निषेधवचनं बलीय इति । फलवचनानां सर्वथैवाप्रामाण्योपपादकं निषेधवचनानां बलीयस्त्वंतु प्रा-

माणिका नाद्रियन्ते । अतो विधिनिषेधवचनानां विषयव्यवस्थाप्रदर्शनमेव युक्तम् ॥

(श्लो) तां तु प्रदर्शयिष्यामः पूर्वदर्शितवर्त्मना । सर्वागमाविरोधेन सर्वशैवानुमोदिनीम् ॥ शैवानां भोजनं त्रिविधम् । शिवपूजासमाप्तौ बाह्यकुण्डे शिवाग्निकार्यवत् तदनन्तरं शिवाग्निकार्यान्तर मात्मभोजनमिति भावनयैकम् । नैवेद्यसमये निवेद्यमानद्रव्याणां रूपार्पणात्मकं शिवे निवेदनस्यारम्भमात्रकृत मात्मभोजनंतु शिवाय तद्रुच्यर्पणात्मकनिवेदनपूरणमिति भावनया द्वितीयम् । प्रथमं निवेदनसमय एव परस्वदादियागीयहविरिव सूक्ष्मरूपतया नैवेद्यं रुच्यासह शिवेन उपभुक्तमेवात्मभोजनं शिवदासस्य कर्म तदुच्छिष्टस्वीकरणरूपमिति भावनया तृतीयम् । तत्राद्यं सुप्रभेदे वह्निकार्यपटलेप्रपञ्चितम्—'अग्निकार्यस्य चान्तेतु प्राणाग्नौहोममाचरेत्। तत्पार्श्वे वह्निशालायां भोजनस्थानमुच्यते ॥ गृहेवाऽपि प्रकर्तव्यं प्राणाग्नियजनं परम् । तत्स्थानं गोमयालिप्तं शुद्धं कृत्वा विशेषतः ॥ पिष्टचूर्णैरलंकृत्यसवितानं सदीपकम्। सौवर्णं राजतं ताम्रं कांस्यं वा कदळीदळम् । पात्रमेतत्तु सङ्गृह्यशोधयित्वा यथार्हकम् ॥ पात्रेऽशेषाणि संयोज्य स्वात्मस्थं शिवमर्चयेत्। आत्मातु यजमानोऽसौ बुद्धिस्तत्पत्निकास्मृता ॥केशरोमाणिदर्भास्युर्जिह्वाद्या यज्ञपात्रकम् । हृत्पुण्डरीकवेद्यां तमन्तस्थाग्नौ सुपूजयेत् ॥ रोमदर्भान्परिस्तीर्य प्रणवं शिवसंयुतम् । उच्चार्य परिषिच्याथ शिवेनोद्धृक्ष्य मन्त्रवत् ॥ शिवमन्त्रं जले जप्त्वा ब्रह्माण्यंगान्यनुक्रमात् । शिवं ध्यात्वा शिवायेति जलं पीत्वा हृदा पुनः ॥ शिवाय जुहुया दीशमन्त्राद्यै ब्रह्मपञ्चभिः । मध्यमानामिकांगुष्ठै रादायान्नं शनैश्शनैः ॥ यच्चामृतेत्यादिनैव जलं पीत्वा विशेषतः । पञ्चाहुतीश्च जुहुयात् प्राणमन्त्रैस्तु पञ्चभिः ॥ पात्रसंस्पर्शनं कृत्वा पश्चाद्भुञ्जीत साधकः । आचम्य च विधानेनादित्याभिमुखसंस्थितः ॥ उदरं शिवमन्त्रेण सव्येनाभिमृशेत्ततः । दक्षिणांगुष्ठकेनां-

भः पादांगुष्ठे तु दक्षिणे ॥ स्त्रावयेत्तु शिवं स्मृत्वा हृन्मन्त्रं तु समुच्चरन् । चुळकोदकमेतत्स्यात् स्वात्मनः पादमूलतः ॥ प्राणाग्निहोत्रमित्येवं नित्यमेतदुदाहृतम् । अग्निकार्य मिदं प्रोक्तं शृणुत्वं कुण्डलक्षण'मिति ॥ इदं भोजनमनिवेदितान्नेनैव कर्तव्यम् । तदर्थमनिवेदितान्नसद्भावः परार्थपूजाया 'मेकभागं निवेद्यं स्या देकभागं हुतं भवेत् । एकभागं तु बल्यर्थं शेषमाचार्यभोजन'मिति आगमवचनैर्दर्शितः । आत्मार्थपूजायां 'पाकादर्धं समुद्धृत्य तस्यार्धं शंभवेऽर्पयेत् । अग्नावर्धेन जुहुयात् तद्विश्वं निगद्यत'इत्यादि चुल्लीहोमप्रकरणागमवचनैर्दर्शितः । द्वितीयभोजनंतु वातुळोत्तरेदर्शितम्—'रूपं समर्प्य द्रव्यस्य रुचिमप्यर्पयेच्छिवे । उभयार्पणहीनं चेत् नैवेद्यं निष्फलं भवेत् ॥ तत्तत्प्रसादभोगान्तंनैवेद्यार्पणमुच्यते । प्रसाददानहीनं चेत् नैवेद्यमपि निष्फल'मित्यादिना । इदमारब्धासमाप्त निवेदनक्रियेणान्नेन कर्तव्यम् । नैवेद्योपचारसमये देवस्य पुरतो यन्नैवेद्यं निहितं तस्य तदानीं रूपार्पणेनारब्धा निवेदनक्रिया रुच्यर्पणपर्यन्त मनुवर्तत इति तदेवारब्धासमाप्तनिवेदनक्रियमन्नम् । तच्चं देवपित्राद्युद्देशेन दत्तमन्नं तत्समर्पणबुद्ध्येव पूजकश्शिवसमर्पणबुद्ध्या भुञ्जीत । तत्तृतीयं भोजनं । 'मल्लिङ्गधारिणो लोके देशिका मत्परायणाः । मदेकशरणास्तेषु योग्यं नैवान्यजन्तुषु ॥ स्त्राद्यानिचादनीयानि पेयान्यन्यानि यानि च । देयानितानिवै शंभो रक्षीया दासभावतः॥ दासमार्गप्रपन्नाये शैवे पाशुपते स्थिताः । तैरेव पेयंभोज्यं चाघ्रातव्यंच मुमुक्षुभि'रिति कामिकागमादिषु प्रसिद्धमिदं भोजनं निवेदितेनैव कर्तव्यम् । देवस्य पुरतो मुमुक्षुभि नैवेद्योपचारसमये यन्निहितं तत्तदानीमेव सूक्ष्मरूपेण रुच्यासह शिवेनोपभुक्तमिति निवेदितमुच्यते । तदेव शिवोच्छिष्टं शुश्रूषार्थं ब्राह्मणदास्यं प्रपन्नश्शूद्रस्तदुच्छिष्टमिव शिवदास्यं प्रपन्नः भुञ्जीत । एवंच शिवनिर्माल्ये यानि सामान्यतो निषेधवचनानि तानि शिवदास्यभावनारहितपशुरू-

पमनुष्यमात्रविषयाणि । यानि तु दीक्षितान् शिवदास्यभावनावत एवाधिकृत्य तन्निषेधवचनानि तानि निवेदितातिरिक्तपञ्चविधनिर्माल्यविषयाणीति व्यवस्थाद्वयं प्राचीनैरेव दर्शितम् । अत्र द्वितीयव्यवस्था 'निर्माल्ये षड्विधे भोज्य मेकमेव निवेदित मित्याद्यागमप्रसिद्धा । प्रथमव्यवस्था शिवपुराणे स्पष्टं प्रपञ्चिता । तत्रहि—'अनर्हं मम नैवेद्यं पादांबु कुसुमं दळम् । इतीश्वरेण कथितमिति केचिन्महर्षयः ॥ वदन्ति तत्कथं स्वामिन् यथार्थं कथयस्वमे' इति जैमिनिप्रश्ने—'देवदेवस्य वचसोविषयस्तत्र जैमिने । ये वीरभद्रशपिताश्शिवभक्तिपराङ्मुखाः ॥ शंभोरन्येषु देवेषु ये भक्ता ये न दीक्षिताः । ये शुद्रकर्मिणश्शंभो रन्यत्र समबुद्धयः ॥ तेषामनर्हमीशस्य तत्प्रसादचतुष्टय'मिति व्यासवचनं दृश्यते । अन्यानि चादीक्षिताना मभक्तानां शिवनिर्माल्यमयोग्य मित्यर्थे कामिकादिप्रसिद्धानि वचनानि प्रागुदाहृतानि । ननु शिवनिर्माल्यं सकलपातकहरं सकलव्याधिनिवर्तक मखिलयज्ञफलप्रद मशेषतीर्थस्नानतुल्यं भुक्तिमुक्त्येकसाधनमिति शिवशास्त्रज्ञैरुद्घुष्यते । भक्तिदीक्षारहितैर्नभक्ष्यं नस्प्रष्टव्य मित्यप्युच्यते । कथमेतदुपपद्यते । तथा सकलपापनिवर्तनशक्त्यादियुक्तं सर्वप्रायश्चित्तादिवच्छिवनामकीर्तनवद्वा सर्वसाधारणीभवितुमेवहि योग्यम् । कथं केषांचित् परिहरणीयं स्यात् । अतश्शिवनिर्माल्यं निकृष्टमित्येव केषांचित् परिहरणीय मासीदिति कुतो नभवति । हरदत्ताचार्यैरपि समुक्तरीत्योत्कर्षापकर्षसाधारण्येनैवोक्तम्—'उत्कर्षतः परिहरत्यपकर्षतो वा का वासना भवति कस्य कृते न विद्मः । यदीक्षितस्य पतितस्य च तुल्यरूपं प्रत्यादिशन्ति मुनयः कमनीयमन्नम् ॥ चण्डाल चण्डिलचितानल शौण्डिकानां गोब्राह्मण ज्वलनदीक्षितयोषितां वा । स्पर्शःकथंभवति भावनया निषिद्धः स्पृष्टेषु वा शिवकथा विहिता विशुद्धिः ॥ वर्ज्यान्नमाहु रपि दीक्षित मग्निकल्पं भोज्यान्नमेव कृतराजपरिक्रयं तम् । शङ्खास्थि पावन मपावनमस्थि

नृणामित्थं स्थिते वचनमत्र परायणं नः' इति ॥ तस्माद्विविच्येदं कथनीयमिति । किमुत्कर्षतः शिवनिर्माल्यं केषांचित्परिहरणीयं अपकर्षतोवेति । उच्यते । शिवनिर्माल्यं सकलपापहरत्वादिसर्वोत्कृष्टगुणशालीत्यत्र तावन्नविवादावकाशः । येषु पुराणागमेषु केषांचित्तन्निषेधः कृतः तेष्वेव तथाविधगुणशालीत्यपि प्रतिपादितत्वात् । श्रूयन्तेहिपुराणागमेषु वचनानि—'पादोदकं च निर्माल्यं भक्त्या धार्यं प्रयत्नतः । न तं स्पृशन्ति पापानि मनोवाक्कायजान्यपि ॥ भक्षये द्यो नरो भक्त्या पवित्रमिति शंसितः । शुद्धात्मा ब्राह्मणस्तस्य पापं क्षिप्रं विनश्यति ॥ मत्प्रसादोदकं पुष्पं सदा धार्यं महाश्रितैः । रोगिभिश्च विशेषेण विपदिग्वैश्च यत्नतः ॥ स्वेष्टलिङ्गे च यद्दत्तञ्चरुवत्तन्नसंशयः । राजसूयसहस्रस्य फलं प्राप्नोति नारद ॥ पृथूदकं महातीर्थं गङ्गा च यमुनानदी । नर्मदा सरयूर्विप्रास्तथा गोदावरीनदी ॥ सदासन्निहितास्त्वेता इशंभोः स्नानोदके मुने । शंभोस्स्नानोदकं सेव्यं सर्वतीर्थमयं हि तत् ॥ अयुतं योगवां दद्याच्छ्रोत्रियायाहिताग्नये । मम पादजले स्नात्वा तत्फलं समवाप्नुयात्' इत्यादीनिच ॥ वैद्यशास्त्रेच— 'निर्माल्यसलिलं प्राश्य देवदेवस्य शूलिनः । क्षयकुष्ठज्वरश्वासैर्मुच्यते किल्बिषै रपि'इति ॥ रामायणेऽपि— 'तत्र देवर्षिगन्धर्वा वसुधातलवासिनः । भवांगपतितं तोयं पवित्रमिति पस्पृशुरिति ॥ भागवतेऽपि—'किं वा शिवाख्य मशिवं नविदुस्त्वदन्ये ब्रह्मादयस्तदवकीर्यजटाःस्मशाने । तन्माल्यभस्मनृकपालवसत्पिशाचैर्ये मूर्द्धभिर्दधति तच्चरणावसृष्ट'मिति ॥ एवं परमपावनस्यापि शिवनिर्माल्यस्य स्पर्शे केषांचिन्निषेधश्शिवलिङ्गस्पर्शे निषेध इव तेषामनधिकारप्रयुक्त एव । यथाहिं पूर्वं लौकिकाशिलाविशेषरूपमपि शिवलिङ्गं प्रतिष्ठासंस्कारेण निरस्तमायाविकारभूताशुद्धरूपं चिन्मयं जातमिति तदनन्तरमदीक्षितानामस्पृश्यमासीत्, एवं निर्माल्यमपि निरीक्षणादिसंस्कारवृन्देन तथाभूतं जातं तदनन्तरं शिवेन स्वोपभोगयोग्यमित्युप-

मुक्तश्चेत्यतिविशुद्धं जात मतस्तेषामस्पृश्यमासीत् । एतदभिप्रायेणोक्तं वातुळोत्तरे—सुप्रतिष्ठितलिङ्गेषु न यथापूर्वभावना । तथा शिवप्रसादस्य पूर्वनामनसंस्मरेत्'इति ॥ एवंभूतं शिवनिर्माल्यं दीक्षया विधूतकल्मषाणां छिन्नपाशानांशिवभक्तानामेव शिवलिङ्गमिव स्पृश्यं तदाज्ञया भोज्यंच । ते हि शिवभक्ताश्शिवदीक्षया प्रतिदिवसपरिचीयमानभूतशुद्धिदंडमुण्डकलान्यासेन च शिवलिङ्गवच्छिवनिर्माल्यवच्चाप्राकृतरूपा स्संपन्नाः । 'हस्तपादादिसाधर्म्याद्गुरून्ममवपुर्धरान् । प्राकृता नेव मन्वानो नावजानाति बुद्धिमान्' इति वायुसंहितावचनात् । यत्तुसकलपापहरत्वादिगुणवत्त्वे सर्वप्रायश्चित्तत्वकिमिति सर्वसाधारणं नजातमिति शङ्कितं तदप्येतेन निरस्तम् । अतिशुद्धशिवनिर्माल्यस्पर्श एवान्येषा मनधिकारस्योक्तत्वात् । नाहि ब्रह्महत्यादिमहापातकहरमिति अघमर्षणादि वैदिकसूक्तं वेदश्रवणेऽप्यनधिकारिणामत्रैवर्णिकानां साधारणं भवति । नच तावतावैदिकसूक्तस्य काश्चिदपकर्षः । किंचोत्कर्ष एव । तदभिप्रायेणैव पुराणोष्वीश्वरवचनं 'अशुद्धात्माऽशुचिर्लोभान्मद्भुक्तं पावनं परम् । भक्षयन्नाशमाप्नोति शूद्रोह्यध्ययनादिव' इति ॥ यत्तु शिवनामवदतिविशुद्धमपि शिवनिर्माल्यं सर्वसाधारणं किमिति नजातमिति शङ्कितं तत्र ब्रूमः । अतिविशुद्धमप्राकृतमपि शिवनाम शिवाज्ञया सर्वसाधारणं जातम् । तद्घटितं वैदिकं पञ्चाक्षरं जीवरत्नमपि । तथाहि वायुसंहितायाम्—'कलौ कलुषिते काले दुर्जयेदुरतिक्रमे । अपुण्यतमसाच्छन्ने लोके धर्मपराङ्मुखे॥ क्षीणेवर्णसमाचारे संकरे समुपस्थिते । सर्वाधिकारे संदिग्धे निश्चिते वा विपर्यये ॥ गुरूपदेशेविहितेगुरुशिष्यव्यतिक्रमे । केनोपायेन मुच्यन्ते भक्तास्तव महेश्वरे' त्यंबिकायाः प्रश्ने । शिववचनम्—'आश्रित्यपरमां विद्यां हृद्यां पञ्चाक्षरीं मम । भक्त्याच भावितात्मनो मुच्यन्ते कलिजानराः ॥ मनोवाक्कायजैर्दोषैर्वक्तुं स्मर्तुमगोचरैः । दूषितानां कृतघ्नानां निर्दयानां खलात्मनाम् ॥ ब्र

द्धानां वक्रमनसा मपि मत्प्रवणात्मनाम् ॥ ममपञ्चाक्षरीविद्या संसारभय-तारिणी । मयैव मसकृदेविप्रतिज्ञातं धरातले ॥ पतितोऽपि विमुच्येत मद्भक्तो विद्ययाऽनये'ति ॥ पुनश्च—'कर्मयोग्यो भवेन्मर्त्योऽपतितो यदि सर्वथा। कर्मायोग्येन यत्कर्म कृतंतन्नरकायहि॥ ततः कथं विमुच्येत पतितोविद्ययाऽनये'ति अंबिकाप्रश्ने । शिववचनम्—'सत्यमेतत् त्वया प्रोक्तं तथाऽपि शृणु सुन्दरि । रहस्यमिति मत्वैतत् गोपितं यन्मया पुरा ॥ स्वकर्मपतितो मर्त्यः पूजयेद्यदि मोहतः। नारकी स्यान्नसन्देहो मम पञ्चाक्षरं विने'ति॥ एवं शिवाज्ञयासर्वसाधारण्यापादनादेवेदमाज्ञासिद्धमित्यपि तत्र व्यवहृतम् । 'तदल्पाक्षर मर्थाढ्यं वेदसारं विमुक्तिदम् । आज्ञासिद्ध मसंदिग्धं वाक्य मेतच्चिवात्मक'मिति ॥ तस्मादतर्कनीयश्शिवनाम्नो महिमेति तस्यपतितचण्डालादिसाधारण्यं युक्तमेवेत्यलं प्रपञ्चेन ॥ प्रकृतमनुसरामः ॥

यत्तु 'सदाशिवस्य निर्माल्यं मनुष्याणां नभोजन'मित्युदाहृतं, तच्चण्डसमर्पितसदाशिवनिर्माल्यविषयम् ॥ कामिके— 'निर्माल्यं तुसमानीय चण्डेशाय निवेदयेत् । यतो निर्मलतां याति तन्निर्माल्यं प्रकीर्तितम् ॥ चण्डस्याचमनं दत्वा निर्माल्यंतु विसर्जयेत् । अगाधेऽम्भसिवाऽग्नौवा गवां वा विनिवेदये'दिति चण्डसमर्पणानन्तरमेव जलादिषु प्रतिपत्तिविधानात्। तत्रैव—'चण्डभोज्यं दुराधर्षं वर्जनीयं प्रयत्नतः' इति, 'देवस्वं चण्डभोज्यं वा नान्यभोगाय कल्प्यत'इति च चण्डद्रव्यस्य सर्वाभोज्यत्वप्रतिपादनेन तावन्मात्रस्यैव जलादिषु प्रतिपत्यपेक्षत्वाच्च । नन्वेवं सति सर्वमपि शिवलिङ्गं निर्माल्य मभोज्यमेवेत्युक्तं भवति । 'लेह्यचोष्यान्नपानादि तांबूलंस्त्रग्विलेपनम् । निर्माल्यं निखिलं तुभ्यं प्रदत्तं तु शिवाज्ञये'ति चण्डसमर्पणमन्त्रलिङ्गानुसारेण सर्वस्यापि शिवनिर्माल्यस्यचण्डायसमर्पणीयत्वावगमादिति केचित् । मैवम् । कामिके—'परार्थपूजायाम् ऐशान्यां पूजयेच्चण्डं गन्धपुष्पादिभिः क्रमात् । तस्मै समर्पयेत्सर्वं निर्माल्यं यत्प्रकल्पित'मिति सर्व-

स्य निर्माल्यस्य चण्डेशाय समर्पणीयत्वपक्षमुक्त्वा 'लिङ्गमूर्ध्निस्थमित्येके पिण्डिकास्थमथापरे। ऐशान्यांपिण्डिकास्थंवा बाह्येचण्डगृहेनये'दिति गन्धपुष्पनिर्माल्यैकदेशसमर्पणपक्षस्याप्युक्ततया तन्न्यायेननिवेदितान्नेऽप्येकदेशसमर्पणपक्षांगीकारोन्नयनात्। अन्यत्रच—'शिवोपभुक्तं स्रग्गन्धमन्नपानादिकं तथा। निवेदितमिति प्रोक्तं सर्वपापहरं परम्॥ निर्माल्ये षट्विधे भोज्यमेकमेव निवेदित'मिति चण्डद्रव्यात्पृथक्निवेदितसद्भावस्य तद्भोज्यतायाश्च साक्षादेव प्रतिपादनाच्च। आत्मार्थपूजायां तु नैतच्छङ्कावकाशः। कामिकएव शिवपूजानिरूपणानन्तरं 'अन्ते चण्डेश्वरं यजे'दित्युपक्रम्य 'बाणे लोहे चले सिद्धे नचण्डेशस्स्वयंभुवी'ति चण्डपूजानिषेधात्। अर्चितेऽप्यात्मार्थपूजायाम्—न द्वारिपूजा कर्तव्या न चण्डेशनिवेदनम्। नाममन्त्रहविस्तत्र न नित्योत्सवमेवच'इति तत्प्रतिषेधात्। यदितु प्राग्दर्शितकालोत्तरवचनानुसारेण चण्डपूजाक्रियते, तथाऽपि न दोषः। अंशुमति चण्डेशार्चनपटले—'केवलंसहजं चैव स्वतन्त्रं च त्रिधामतम्। आत्मार्थं केवलं प्रोक्तं मण्डलेतु समर्पयेत्॥ यामाङ्गं सहजं ज्ञेयं चण्डरूपं प्रतिष्ठितम्। यामाङ्गं चेत् स्वतन्त्रंस्याच्चण्डेशस्यार्चनं त्रिधे'ति चण्डेशार्चनत्रैविध्यमुपक्रम्यात्मार्थयजनान्तचण्डपूजायां—'विलेपनं च दानं च दत्वा तन्मूलमन्त्रतः। नैवेद्यं चैवतांबूलं तन्मूलेनैव दापये'दिति पृथगेव गन्धपुष्पादिकमुक्त्वा 'केवलस्यार्चनं प्रोक्तं सहजस्यार्चनं शृणु। अन्तर्मण्डलदेशे तु मण्डलस्य च गोचरे॥ चण्डेशं स्थापयेद्विद्वान्निर्माल्येनैवचार्चये'दिति यामाङ्गचण्डेश्वरपूजायामेव निर्माल्यसमर्पणस्योक्तत्वात्। सिद्धान्तसारावळयामपि चण्डपूजाप्रकरणे—'नैवेद्यं तद्विधानोक्तं दत्वा तांबूलसंयुतम्॥ यामाङ्गश्चेच्छिवेनोपभुक्तं चापि निवेदये'दित्युक्तत्वाच्च। 'सदाशिवस्यनिर्माल्यं चण्डेशायसमर्पये'दिति आत्मार्थपूजागतसूक्ष्मवचनानुरोधेन चण्डेशाय निर्माल्यसमर्पणपक्षेऽपि नदोषः। परार्थपूजोक्तरीत्या त-

देकदेशसमर्पणसंभवात् । स्मृतिनिबन्धनेषुच— 'विष्वक्सेनाय दातव्यं नैवेद्यञ्च शतांशकम् । पादोदकं प्रसादं च लिङ्गे चण्डेश्वराय चे'ति निवेदितशतांशस्य चण्डांशस्यैव चण्डभागत्वप्रतिपादनाच्च । एवं 'सदाशिवस्य निर्माल्य'मिति सुप्रभेदवचनस्य कामिकवचनाद्यनुसारेण 'यत्सदाशिवनिर्माल्यं चण्डेशाय समर्पितम् तन्मनुष्याणांनभोज्य'मित्यर्थः ॥ अथवैवं तदभिप्रायः । शिवस्य निर्माल्यं शिवदास्यभावरहितानां पशुप्रायाणां केवलमनुष्याणां नभोज्यम् । अतः काम्यतया परार्थपूजाया मात्मार्थपूजायांवा समुद्भवमहाहविर्निवेदने सति तावद्भोजनासमर्थानां देवालये परिचारकाणां पूजकगृहवासिना मन्येषांच शिवदीक्षावतां शिवभक्तानामलाभे तेभ्योदत्तावशिष्टं यथाकथञ्चिन्मनुष्यमात्रेन दातव्यम् । किंतु गोगजेभ्यो देयम् । अगाधेऽम्भस्यग्नौवा क्षेप्तव्यं भूमौ वाखातव्यमित्येतत्परम् । यथाऽश्वमेधादिक्रतुषुऋत्विजां हविश्शेषभक्षणसामर्थ्या भावेऋत्विग्भ्योदत्तावशिष्टंहविरनुपनीतेषु वर्णान्तरेषु नदातव्यम् । किंतूपनीतेषु ब्राह्मणादिषुदातव्यमग्नौ वाक्षेप्तव्यमित्येतत्परं 'हविश्शेषान्भक्षयितु मृत्विजश्चेन्न शक्नुयुः । विप्रेभ्यस्संप्रयच्छेयुः क्षिपेयुर्वा हुताशन'इति वचनम् । यथावा 'ब्राह्मणोच्छिष्टभोक्तृतद्दासशूद्राभावे तदुच्छिष्ट मप्सुक्षेप्तव्यं भूमौवाखातव्यमित्येत्पर 'मशक्तौभूमौ निखने दप्सुवा प्रवेशये'दितिवचनम् । एतदभिप्रायेणैवोक्तं हरदत्ताचार्यैः—'यद्ब्राह्मणस्त्वमसिनाकसदां निकाये तुभ्यं निवेदितमभोज्यमिति स्मरन्ति । उच्छिष्टमीश्वर विशिष्टमपि द्विजानां भूमौ निखेय मथवा ऽम्भसिमज्जनीय'मिति । अस्य श्लोकस्य उच्छिष्टभोक्तृदाससद्भावेऽपि तदुच्छिष्टं भूमौ निखेय मंभसिवा मज्जनीयमिति न तात्पर्यम् । 'उच्छिष्टमन्नं दातव्यंशीर्णानि वसनानिचे'ति दासेन प्रपन्नाय शुश्रूषुशूद्रायेच्छिष्टदानस्मरणात् ॥ 'जीर्णान्युपानच्छत्रवासः कूर्चान्युच्छिष्टाशनं शिल्पवृत्तिश्चे'ति शुश्रूषुशूद्रधर्मस्मरणाच्च । एवमेव 'तुभ्यं निवेदितं भोज्य'मित्यत्रापि

शिवनिवेदितभोजनार्हस्य शिवदास्यं प्रपन्नस्यालाभे यस्मैकस्मैचिन्नदातव्यं किन्तु खननादिनैव तत्प्रतिपादनीयमिति तात्पर्यम् । इत्थमनेन श्लोकेनाचार्यैः रुत्कर्षतएवनिर्माल्यं दासातिरिक्तैः परिहार्यं नत्वपकर्षत इति विभावित मेव । 'उत्कर्षत' इत्याद्यनन्तरश्लोकैस्तु शिवोत्कर्षनिरूपणग्रन्थे तत्प्रसादोत्कर्ष निरूपणं नोपयोगीति विभावनाय प्रौढ्यासममुक्तरीतिरवलंबिता । या नितु स्वेष्टलिङ्गसमर्पितमपि भ्रातृपुत्रभगिन्यादिभ्य एव देयमित्येवंप्रतिपादितानि तान्यग्निकार्यरूपभोजनकर्तृशिवार्चकविषयाणि । तेन तत्स्वयंभोक्तुमशक्यम् । शिवाग्निकार्यरूपस्वभोजननैव प्रसङ्गात् (१)आपत्तिरूप स्वकार्यस्यापि सिद्धेः । अदीक्षितेभ्यस्तु तद्दानंप्रतिषिद्धं इष्टयादि हविश्शेषवदुपेक्षादोषपरिहाराय न्यायतो भक्षणेनैव प्रतिपादनीयम् । दीक्षितानाञ्च तद्भोजनं महाफलप्रदम् । अतः केभ्यो देय मित्याकांक्षायां स्वगृहदीक्षावत्वेऽपि येऽग्निकार्यानधिकारिणः स्त्रीबालादयस्तेभ्योदेय मित्येवंपराणि । यत्तु कामिके— ' निर्माल्यलंघनं कृत्वा दक्षिणस्यायुतं जपेत् लङ्घनेन समस्पर्श स्समे विक्रयभक्षणे'इति लङ्घननिर्माल्यस्पर्शेऽपि दीक्षितानां प्रायश्चित्तविधानम् । यच्च— 'यन्निर्माल्येन संस्पृष्टं तद्भुजा पुरुषेण वा । पादोनं तत्र पूर्वोक्तं स्पर्शलंघनभक्षण'इति निर्माल्यतद्भक्षयितृस्पृष्टस्य स्पर्शे प्रायश्चित्तविधानं तत्रसर्वत्रापि निर्माल्यपदं बहिः क्षिप्तनिर्माल्यविषयम्। तस्मिन् प्रायश्चित्तप्रकरणे देवस्वं देवताद्रव्यं 'नैवेद्यंच निवेदितम् । चण्डद्रव्यं च निर्माल्यं निर्माल्यं षड्विधं भवे'दिति बहिः क्षिप्ते विशिष्य निर्माल्यसंज्ञाकरणात् । पिण्डिकास्थं न निर्माल्यमपिदेवेविसर्जित'मितिदेवविसर्जनानन्तरमपि बहिः क्षेपपर्यन्तंस्पर्शप्रायश्चित्तपीरहाराय प्रायश्चित्तप्रकरणे ' देवस्वं देवताद्रव्य'मिति पदैर्निर्माल्यत्वाभाववर्णनाच्च । अन्यथा प्राय-

१. ' क्लृप्ति'इति कोशान्तरे ॥

श्चित्तविधानगतनिर्माल्यशब्दानां सर्वनिर्माल्यविषयत्वे तत्र बहिःक्षिप्तेति विशिष्य निर्माल्यसंज्ञाकरणस्य वैयर्थ्यप्रसङ्गात् । विसर्जनानन्तरमपि बहिः क्षेपपर्यन्तं निर्माल्यत्वाभाववर्णनस्यासामञ्जस्यप्रसङ्गाच्च । देवभूम्यादिस्पर्श तत्संस्पृष्टस्पर्शेषु दोषभावेन स्पर्शप्रायश्चित्तगतनिर्माल्यशब्दानां विशेषविषयत्वावश्यंभावाच्च । बहिः क्षिप्तञ्च तदुच्यते यन्महाहविर्निवेदनादिषु भक्तपरिचारकेभ्यो दत्तावशिष्टं गोगजादिभ्यो बहिर्नीतं जलादिषु क्षिप्तं बहिर्बल्यर्थं दत्तंवा । तत्सर्वं वचनबलाद्धूपोपस्थानानन्तरंधूपव दस्पृश्य मेव । न न्वेवं तर्हि तत्र निर्माल्यभक्षणादिप्रायश्चित्तोपदेशानां बहिःक्षिप्तमात्रविषत्वे 'देवस्व देवताद्रव्यनिवेद्यचण्डद्रव्याणां भक्षणादिषु प्रायश्चित्तविधानं नलभ्यतइति चेन्न । तत्रैव निर्माल्यभक्षणोपेक्षणदानविक्रयलंघनस्पर्शेषु, निर्माल्यतद्भक्षयितृस्पृष्टभक्षणलंघनस्पर्शेषुच प्रायश्चित्तविधानानन्तरं 'देवायतनवस्त्वन्यद्देवग्रामादिसंभवम् । व्रीह्यादियेनकेनैवोपाधिनाऽऽदायभक्षणम्॥ करोति यस्स संमूढोमलिनःस्तेनकृन्मत'इत्यादिना देवस्व देवताद्रव्यनिवेद्यचण्डद्रव्याणां भोगदानयोःपृथगेवस्तेयप्रायश्चित्तवर्णनात् । सूक्ष्मागमे—'निर्माल्यस्य निवेद्यस्य लङ्घने दानकर्मणि । चान्द्रायणं चरेत्तत्तुगोनागानां विनिक्षिपे'दिति निर्माल्यात्पृथक् निवेद्यग्रहणादपि प्रायश्चित्तोपदेशगत—निर्माल्यशब्दानां विशिष्य निर्माल्यसंज्ञिक बहिः क्षिप्तमात्रविषयत्वं ज्ञायते । अन्यथा तेषां षड्विधनिर्माल्यपरत्वे निवेदनस्यापि तदन्तर्भूततया प्राक् निवेदनग्रहणं व्यर्थं स्यात् । यत्तु कामिक एव— 'स्नानपानीयदुग्धाद्यैर्य दि सिक्तो भवेत्तदा । स्नायात् प्रक्षाळयेत् द्वेधानाभे रूर्द्धमधस्तथा ॥ चललिङ्गेऽप्ययं न्यायो विहितो यज्ञमन्दिरे'इति शिवस्याभिषेकसमये अभिषेकजल दुग्धदध्यादिकरण सेकेनाप्यूर्द्धतदधोगात्र विभागेन स्नानप्रक्षाळन विधानं, तत् शिवाभिषेकजलादिबिन्दूना मर्चकं प्रति अपवित्रताभिप्रायेण न भवति । शिवाभिषेकजलादिप्राशस्त्यस्य प्राक्प्रपञ्चितत्वात् ।

किन्तु तदनन्तरमर्चकेन करिष्यमाणं शिवस्य गन्धविलेपनादिकं तन्निर्मा-ल्यसंसिक्तगात्रेण कर्तुमयुक्तम्, गुरोरभ्यङ्गस्नपनं कृतवता तत्तैलबि-न्दुसंसिक्तगात्रेण शिष्येण गुरोर्गन्धविलेपनादिकमिवेत्याभिप्रायेण । एवम-न्यान्यप्येवं संभाव्यितानि वचनानि नेतव्यानि । तदित्थमग्निकार्यबुद्ध्या भुञ्जाने निवेदितशेषं भोक्तव्यं । दास्यबुद्ध्या भुंजाने निवेदितं भोक्त-व्यमिति व्यवस्था निरवद्या । तथाच वायुसंहितायामपि दर्शितम्— 'ततस्स्वयञ्च भुञ्जीत शुद्धमन्नं यथासुखम् । निवेदितंवा देवेशे तच्छेषं वा ऽऽत्मशुद्धये ॥ श्रद्दधानो नलोभेन न चण्डाय समर्पितम् । गन्धमाल्यादि यच्छान्यत्तत्राप्येष समो विधिः॥ नतुतत्र शिवोऽस्मीति बुद्धिं कुर्याद्विचक्षण' इति ॥ निवेदितं भुञ्जानः स्वहृत्पुण्डरीकान्तरवह्निमध्यगतशिवभावनया स्वस्य शिवाग्निकार्य रूप(१)शिवपूजाकर्तृतामभिप्रेत्य श्रीशिवोऽहमिति बुद्धिं न कुर्यात् । किन्तु शिवदास्यबुद्धिमेव कुर्यादित्यर्थः । एवं निवेदितान्न-भोजनं कुर्वता प्राणाहुतयोऽपि निवेदितेनैव कर्तव्याः 'प्राणाग्निहोत्रं यः कुर्याच्चिवस्यैव प्रसादतः । अश्वमेधायुतं पुण्यं सिद्धे सिद्धे भवेन्नरः'इति शिवपुराणवचनात् ॥

भोजन विधिः ॥

अथभोजनविधिः॥स्वाहान्तैः स्वसूत्रोक्तमन्त्रैःहुत्वातान्विसर्जयेत् । एवमग्नि-कार्यं निर्वर्त्यव्रौतांग्निकर स्समाचान्त श्शिवभक्तैस्सदाचारैस्सहितो हीनजाती-यानदीक्षितानेकपङ्क्तौ परिहरन् भोजनस्थानमासाद्य पीठे प्राङ्मुख उपविश्य चतुरश्रेण हस्तमानेनाचार्यपुत्रसाधकसमयिकमेण चतुस्त्रिद्व्येकरेखाङ्कितपरि तोभस्मरेखांकितेन मण्डले नभूषितभूतले सुवर्णरजतताम्रलोहान्यतमनिर्मितं

१. शिवस्याज्ञाकर्तृतामितिपाठभेदः ॥

कांस्यनिर्मितं वा सप्तधा भस्मना शोधितमघोराभिमन्त्रितं तदभावे कदळी-फलाशपद्मचूतमधूकाद्यनिन्दितपत्रं वा पात्रं निवेश्य तत्र घृतेनोपस्तिर्य परिवेषितं द्विरभिघारितं सव्यञ्जनं शुद्धमन्नमस्त्रेण संप्रोक्ष्यव्यक्षरमृत्युञ्जयपूर्वकेण मृत्युञ्जयाय वौषडिति मन्त्रेण सप्तवारमभिमन्त्र्य यथावर्णं परिषेचनादिकं कृत्वाग्रासार्द्धमात्रेणान्नेन नागकूर्मक्रकर देवदत्तधनंजयेभ्यः उपप्राणवायुभ्यः स्वाहेति स्वस्यदक्षिणभागे गोमयोपलिप्ते मण्डले दद्यात् । ततस्सव्यहस्तकनिष्ठिकया स्रुवेण नागादिभ्यश्चुळकोदकं दत्वा माषमज्जनार्हं शिष्टजलममृतमन्त्रेण प्राश्य प्राणाहुतिपञ्चकं कुर्यात् । तेन प्राणापानव्यानोदानसमानानां क्रमेण तदावाहिताना मात्मभूतयोनयः पाताळतलवासिनः पितरो देवा इत्येतेषांच तृप्तिं भावयेत् । ततो यथाकिञ्चिदुच्छिष्टान्नमादाय नरकवासिभ्यःस्वाहेति भूमौ दत्वा उत्तरापोशनानन्तरं तच्छेषजलं कनिष्ठांगुळ्यानि स्राव्य हस्तोद्वर्तनादि शुद्धाचमनान्तं कर्म कृत्वा भुक्तदोषशुद्ध्यर्थं दक्षिणकरांगुष्ठजलेन दक्षिणपादांगुष्ठाग्रस्थकालाग्निरुद्रं सेचयेत् । अनिवेदितभोजिनां तु भोजने विशेषः प्रागेव सुप्रभेदोदाहरणेन दर्शितः । निवेदितभोजिनामनिवेदितभोजिनाञ्च भोजनकालादन्यत्र यदन्यदौषधतांबूलपानीयादि भोज्यं गन्धपुष्पादि भोग्यं वोपतिष्ठते, तत्सर्वं मनसावादेवाय समर्प्यैव भोक्तव्यम् । 'पत्रं पुष्पं फलं तोय मन्नपानाद्य मौषधम् । अनिवेद्यनभुञ्जीत भगवन्तं समाहित'इति कामिकवचनात् । 'उपभोगाय पुरतो वस्तु यद्यदुपस्थितम् । तत्तत्समर्प्य देवाय विदधीतात्मसात्ततः'इति वातुळवचनाच्च । यत्तु—'अन्नाद्यमौषधं तोयं पत्रं पुष्पं फलादिकम् । शिवस्य दत्वा तच्छेषं भोज्यं भुञ्जीत बुद्धिमा'निर्त्यौषधादे र्निवेदितशेषस्य भोजनविधानं, तत् कार्यार्थमनिवेदितभोजनं कुर्वतो भोजनमध्यग्राह्यौ पधादिविषयम् । अन्यत्र शिवदासानां शिवोच्छिष्टमेव ग्राह्यम् । किञ्च भक्तेन यत्किञ्चित्फलमुद्दिश्यया क्रिया लौकिकी वैदिकीवा कर्तुमिष्यते सा सर्वाऽपि

शिवाराधनरूपेति भावेन कर्तव्या । तत्तत्क्रियाजन्यसुखमपि शिवस्तद्भो-क्तेति शिवे समर्प्यतद्भुक्तमेव सुखं मया भुज्यतइति भावेन भोक्तव्यम् । एवं विनैव स्वयत्नमुपनताश्शब्द स्पर्शरूपरसगन्धाख्या विषयाश्च शिव-समर्पण पूर्वकं तदुच्छिष्टबुद्ध्यैवस्वेन्द्रियैरनुभवितव्याः । तत्तद्विषयानुभवज-न्यंसुखमपि तदुच्छिष्टबुद्ध्यैवभोक्तव्यम् । 'या या क्रिया विधातव्या प्रस्तु-ता जायते पुरः । तां तां कुर्यान्महादेवसमर्पितधिया सुधीः ॥ इन्द्रियादा-मतं किञ्चिद्यत्सुखं तच्छिवार्पितम् । कृत्वा प्रसादं भोक्तव्यं तदिन्द्रियमुखे-नत्रे'तिवातुळश्रवणात्॥ तदर्थंच भक्तेन सदा सावधानेन भाव्यम् । संयो गेषु वियोगेषु सावधानोनिरन्तरम् । गच्छन्तिष्ठन्स्वपन्जाग्रद्बुद्धानो मै-थुनेरतः ॥ याश्शिवार्पितचेतस्कोभक्तिमांस्तु नचान्यथे'तिबृहत्कालोत्तरेश्रव-णात् । एवं क्रियासमर्पणपूर्वकं क्रियां कुर्वतः विषयसमर्पणपूर्वकं विष-याननुभवत स्तत्तज्जन्यसुखसमर्पणपूर्वकं सुखं भुञ्जानस्य च सावधानस्य भक्तस्य पूर्वजन्मवासनान्ते कचित् कचित् प्रमादान्निषिद्धक्रियां कुर्वतोऽपि निषिद्धविषयाननुभवतोऽपि निषिद्धसुखंभुञ्जानस्यापिनपापलेपोभवति। किंतु-सर्वं शिवसमाराधनमितिभावयत स्सर्वमपि शिवप्रीतय एव भवति।तत्रात्मभो गार्थं नृत्तावलोकनहर्म्योपवनदीर्घिकादिक्रीडारूपां क्रियामारभमाणस्तत्तत्क्रि-यासमये संभावितानां वाक्पाणिपादपायूपस्थरूपकर्मेन्द्रियव्यापारसाध्यानां श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणरूपज्ञानेन्द्रियजन्यतत्तद्विषयसाध्यानाञ्च सुखानां समर्प-णार्थंस्वकीये श्रोत्रादिज्ञानेन्द्रियपञ्चके वागादिकर्मेन्द्रियपञ्चके च क्रमेणाधि-ष्ठातृत्वेन सन्निहिताना मीशानादीनां श्रोत्रादिवागादीनि स्वकीयश्रोत्रादिष्वै-क्येनानुसंधाय तत्तादिन्द्रियव्यापारसाद्ध्यसुखान्यैशानादि मूर्तीरधिष्ठात्राशिवे-नानुभूयमानानि विभाव्य तान्येव सुखानि शिवोच्छिष्टबुद्ध्या स्वयं भुञ्जीत। अयत्नोपनमद्विषयसुखसमर्पणं तत्तद्विषयोपभोगसमयेष्वसावधानेनकर्तुमशक्तः प्रातर्वाशिवपूजावसानेवाभविष्यदेतत्समयपर्यन्तंभावितायत्नोपनमच्छब्दरूपरस

गन्धात्मकविषयानुभवतज्जन्यसुखानिशिवायार्पयामीति युगपदेवार्पयेत् । एवं युगपद्विषयार्पणं हृदयादिषु वा हृदयादिस्थानभावितस्यसांबशिवस्य श्रोत्रादिषुवा, हृदयादिस्थानभावितस्य सदाशिवस्य क्रमादीशानादिमुखगत-श्रोत्रादिषु वा स्वकीयश्रोत्रादैक्येन संहितेष्वीशानादीनां श्रोत्रादिषुवा कर्तव्यम् । सर्वत्रापि समर्पणे नमोन्तशिवमन्त्र एवमन्त्रः । तस्यच शिवायेदं नममेति अर्थो भावनीयः । सचार्थो मकारस्य जीववाचकस्य षष्ठ्यन्ततया लभ्यतइति सर्वमेतदतिरहस्यम् । एवं प्रतिदिनंप्रातश्शिवच्चिन्तनंशक्यस्नानविभूतिरुद्राक्षधारणसंध्योपासनपूर्वकं त्रिकालंद्विकालमेककालंवा चत्वारिंशता षोडशभिर्दशभिः पञ्चभिरुपचारै रष्टपुष्पिकामात्रेण वा शिवं पूजयन् यथावसरंशिवशास्त्राण्यधीयानश्शिवकथास्समाकर्णयन् भोजनकाले शिवाग्निकार्यबुद्ध्या शिवनिवेदितशेषं वा शिवदास्यबुद्ध्या शिवनिवेदितंवा स्वीकुर्वन् अन्यत्तांबूलपानीयगन्धपुष्पादिभोग्यजातं शिवसमर्पितं जानन् चिकीर्षितं कर्मजातं तत्फलरूपाणां सुखानां शिवोपभोग्यत्वं विभाव्य शिवाराधनबुद्ध्या कुर्वाणः स्वयत्नमनपेक्ष्य उपनतानपि विषयान् तत्तद्विषयोपस्थितिसमयेषु युगपद्वा शिवार्पितान्विदधानः सर्वाण्यपि सुखानि शिवोच्छिष्टबुद्ध्यैवानुभवन् बहिर्लौकिककार्यविचारकालेष्वनन्तशिवनामानुसन्धानेन सफलयन्नन्तरुच्चैः गमागमाभ्यां विहरंतीं निरतिशयप्रकाशामृतरूपिणीं मानन्दलेखामपि समयेष्वाकलयन् पञ्चाक्षरपरदेवता मशेषोपनिषदन्विष्यमाणचरणांबुज मखिलदेवतासार्वभौम मपारकरुणांबुधिं माश्रितरक्षाधुरन्धर मंबिकयासह निजहृदयजलरुहकुहरे विहरमाणमानन्दमन्दोहमूर्तिं परमशिवमनवरतमन्तर्दृशावलोकयन् इष्टबन्धुभिस्सह सुखमासीत ॥

वेलद्धीशच्चिनद्योम्मविभोरुदारे
चित्ते च धामनि चिरादभिवर्धमानाम् ।

अर्चाविधां पशुपते रमराभिनन्द्या
मित्थं समाचकलमीश्वरशासनेन ॥

सद्राजयोगनिजचंचुरनाहताज्ञा-
शक्त्यादिसारसमुदञ्चितदिव्यतेजाः ।
आवाहनक्रमकलानिपुणोऽतिधीरः
श्रीबोम्मभूपतिलकादिशवपूजकस्स्यात् ॥

करोतु ज्वरकण्ठेशस्स्वकीयार्चनचन्द्रिकाम् ।
आकल्पस्थायिनी मेनां द्युस्थले चन्द्रिकामिव ॥

हरिः ओम् ॥

शुभमस्तु । गुरुभ्यो नमः ॥

भजामिज्वरकण्ठेशमृत्युञ्जयपदांबुजम् ।
यदाश्रितो नखञ्याजा द्वाति जैवातृकस्मदा ॥

शिवार्चनाचन्द्रिका समाप्ता ॥

